Na	25×3.5	140-641	5	60	C	O	From Brahmāṇḍa purāṇa
,,	36×4.4	One	7	72	C	D.W	
,,	27×3	7-76	5	50	Inc.	O.W	
,,	13.8×4	218-220	10	26	C	O.D	
,,	21×4	99-100	11	44	C	O	Form Brahmāṇḍapurāṇa
Te	22.4×3.5	81-88	8	44	C	D.W	

1	2	3	4	5	6
16457	P. 9633/41	Śanipradoṣavratakathā			Pl
E16458	P. 9643/18	,,			,,
16459	P. 9743/4	,,			,,
16460	C. 3569/2	,,			P
16461	C. 3730/26	,,			,,
16462	C. 3996	,,			,,
E16463	P. 6866/32	Śanivāravratakathā			Pl
16464	P. 8041/2	,,			,,
E16465	P. 7696/3	Śaradāvratakathā			,,
E16466	C. 3911	Śivapancakavrata-kathā			P
E16467	P. 8301/1	Śivapūjavratakathā			Pl
E16468	P. 4335/45	Śivamuṣṭivratakathā			,,

7	8	9	10	11	12	13	14
Na	32×4	99–102	8	80	C	O	Form Brahmottara-kahaṇḍa
,,	35×3	84–87	6	56	C	O	
,,	44×4	6–8	6	54	C	G	From Skāndapurāṇa
,,	20.5×10.5	53–62	9	20	C	G	,,
Kan	29×20	170–173	22	22	Inc.	O	
D	20×10	1–10	7	18	C	O.D	
Na	33×3.5	96–97	9	50	Inc.	O.W	From Skāndapurāṇa
Kan	33.5×3	2–4	6	44	C	D	,,
Te	24×4	95–96	9	62	Inc.	O	
D	25×10.5	1–9	10	25	C	O	
Na	27.3×3.3	1–34	5	56	C	O.D	Form Brahmāṇḍa purāṇa
,,	34×5	289–291	7	36	C	O	From Śivadharmottara purāṇa

1	2	3	4	5	6
16469	C. 224/18	Śivamuṣṭivratakathā			P
E16470	P. 188/3	Śivarātrivratakathā			Pl
16471	P. 1960/2	,,			,,
16472	P. 2117/43	,,			,,
16473	P. 2370/62	,,			,,
16474	P. 4218/27	,,			,,
16475	P. 4676				,,
E16476	P. 6297/3	,,			,,
16477	P. 7488/16	,,			,,
16478	P. 7696/14	,,			,,
E16479	P. 8165/35	,,			,,
16480	P. 9760/51	,,			,,

7	8	9	10	11	12	13	14
D	26×10	1–4	7	24	C	O	From Śivadharmo-ttarapurana
Gr	44.5×3.5	4–20	7	75	C	O.D	Form Skandapurāṇa
Na	43×4	1–19	7	82	C	D.W	,,
Gr	41.5×4	111–113	11	86	C	O.D	
Na	52×3.5	95–96	6	82	C	G	
,,	29×3.5	95–96	7	68	C	W	From Brahmottara-khaṇḍa
Gr	28×3	1–43	8	38	C	D.W	From Skandapuraṇa
,,	36.5×3.5	3–5	8	56	C	G	
Na	40.2×4.1	27	6	76	C	D.W	From Skandapurāṇa
Te	24×4	150–157	9	62	C	O	,,
Na	37×3.5	73–79	7	100	C	G	,,
Te	48×3.4	87–88	7	84	C	D.W	

1	2	3	4	5	6
16481	C. 3459	Sivarātrivratakathā			P
16482	C. 3730/18	,,			,,
E16483	C. 4324/2	Śukravāravratakathā			,,
E16484	P. 6297/5	Śravaṇavratakathā			Pl
E16485	P. 6000/45	Śrāvaṇaśanivara-vratakathā			,,
16486	P. 8165/46	,,			,,
16487	P. 9760/34	,,			,,
16488	P. 9916/39	,,			,,
16489	P. 9952/62	,,			,,
E16490	P. 2268/35	Saṅkaṭaharagaṇapati-vratakathā (Sankaṣṭacaturthi-vratakathā)			,,
16491	P. 4218/29	,,			,,
16492	P. 7486/51	,,			,,

7	8	9	10	11	12	13	14
Na	20.5×16	1–13	15	22	C	G	From Liṅgapurāṇa
Kan	20×29	122–132	22	22	C	O	From Skāndapurāṇa
D	20.5×10 5	1–3	11	34	C	O.D	"
Gr	36.5×3.5	8–9	8	56	Inc.	G	
Na	25×3.5	137–139	5	60	C	O	From Skāndapurāṇa
"	37×3.5	105–108	7	100	C	G	From Bhaviṣyottarapuraṇa
Te	48×3.4	66–67	7	84	C	D.W	"
Kan	40×3.8	152–155	6	64	C	O.D	"
Na	41×3	121–122	8	80	C	G	From Skandapurāṇa
Gr	30×4.5	56–59	14	64	C	G	"
Na	29×3.5	100–103	7	72	C	G	"
"	32.5×3.2	Four	6	76	Inc.	O.D	

1	2	3	4	5	6
16493	P. 8210/2	Saṅkaṭaharagaṇapati-vratakathā			Pl
16494	P.9643/33	,,			,,
16495	P. 9760/76	,,			,,
16496	P. 9787/18	,,			,,
16497	P. 9952/68	,,			,,
E16498	C. 160/12	,,			P
E16499	P. 7408/4	Satyanārāyaṇa-vratakathā			Pl
E16500	C. 575/1	Santānagopāla-vratakathā (Gopālavratakathā)			I
E16501	P. 5574/13	Sarasvatīvratakathā			Pl
16502		Siddhivināyaka-vratakathā			
E16503	P. 4335/31	Siriyālaṣaṣṭhīvrata-kathā			I
16504	P. 8025/9	,,			

7	8	9	10	11	12	13	14
Na	27×3	94–98	5	50	C	D.W	From Skandapurāṇa
,,	35×3	188–194	5	56	C	O	From Nāradīya purāṇa
Te	48×3.4	136–140	7	84	C	D.W	From Padmapurāṇa
Kan	36×3.5	45–49	7	60	C	G	From Liṅgapurāṇa
Na	41×3	136–138	8	80	C	G	From Nāradīya purāṇa
D	16×11	1–5	10	22	C	G	From Ganeśapuraṇa
Na	39.2×3.2	13–30 +2	5	52	C	D	From Skndapurāṇa
Kan	21×10.5	2–4	14	22	C	W	,,
Na	39×4	45–47	6	66	C	W	,,

Please see Vināyakacaturthīvratakatha

7	8	9	10	11	12	13	14
Na	34×5	199–200	7	32	C	D	From Garuḍapurāṇa
,,	32×3.5	One	5	42	C	O.D	78th. folio.

1	2	3	4	5	6
16505	P. 8410/7	Siriyālaṣaṣṭhīvrata-kathā			Pl
E16506	P. 4218/80	Sūryacandravratakathā			,,
16507	P. 9760/28	,,			,,
E16508	P. 2370/25	Sūryacandravratodyā-panakathā			,,
16509		Sūryanārāyaṇa-vratakathā			
E16510	P. 2268/17	Somavāravratakatha			Pl
16511	P. 4218/38	,,			,,
16512	P. 5573/13	,,			,,
16513	P. 6496/38	,,			,,
16514	P. 8725/2	,,			,,
16515	P. 9170/1	,,			,,
E16516	P. 9916/27	,,			,,

7	8	9	10	11	12	13	14
Na	21×4	15–16	11	44	C	O	From Garuḍapuraṇa
,,	29×3.5	253–258	6	68	C	G	From Brahmāṇḍa purāṇa
Te	48×3.4	57–59	7	84	C	D.W	From Skāndapurāṇa
Na	52.5×3.5	36–38	6	80	C	G	From Bhaviṣyottarapurāṇa
Please see Niraśanabhānuvaravratakatha							
Gr	30×4.5	26–28	12	64	C	W	
Na	29×3.5	129–130	7	68	C	G	From Brahmottarakhaṇḍa
,,	43.8×3.5	82–83	6	68	C	G	From Ādityapurāṇa
,,	26×4	156–159	9	46	C	G	From Matsyapurāṇa
Kan	26×5	13–58	10	46	C	O	14–17 & 21–41 folios missing From Skāṇdapuraṇa
Gr	36×3	One	8	42	Inc.	D	
Kan	40×3.8	127–129	6	64	C	O.D	

1	2	3	4	5	6
16517	C. 3564/3	Somavāravratakatha			P
E16518	P. 7922/3	Somāmāvasya-vratakathā			Pl
16519	P 9939/5	,,			,,
16520	P. 9950/11	,,			,,
E16521	P. 2579/74	Svarṇagaurīvrata kathā			,,
16522	P. 2868/17	,,			,,
16523	P. 4218/4	,,			,,
16524	P. 4257/6	,,			,,
16525	P. 5293/8	,,			,,
16526	P. 5946/7	,,			,,
16527	P. 5948/4	,,			,,
E16528	P. 6000/66	,,			,,

7	8	9	10	11	12	13	14
Na	20×11	12-29	10	20	C	G	From Brahmottara-khaṇḍa
Te	24×3	5-14	7	44	C	D	From Mahābhārata
,,	24.4×2.8	35-42	5	38	Inc.	G	From Bhaviṣyottarapurāṇa 37-41 folios missing
Na	35×4	126-131	7	84	C	O	From Bhaviṣyottarapurāṇa
,,	29×3	208-209	5	45	C	O.D	From Gaurikhaṇḍa
,,	36×3	40-42	6	60	C	O	From Skandapurāṇa
,,	29×3.5	14-16	6	52	C	G	,,
Gr	23×4	1-2	7	48	C	O.D	,,
Na	46.5×4.5	7-8	7	88	C	G	,,
Te	19.5×5.8	2-3	13	38	C	G	From Bhaviṣyottarapurāṇa
Na	21×3.5	18-21	6	42	Inc.	G	
,,	25×3.5	6-9	5	60	Inc.	O	

1	2	3	4	5	6
16529	P. 6496/5	Svarṇagaurīvrata-katha			Pl
16530	P. 7143/2	,,			,,
16531	P. 7441/9	,,			,,
16532	P. 7486/5	,,			,,
16533	P. 7936/4	,,			,,
E16534	P. 7938/4	,,			,,
16535	P. 7958/4	,,			,,
16536	P. 8015/6	,,			,,
16537	P. 8025/1	,,			,,
16538	P. 8025/11	,,			,,
16539	P. 8025/26	,,			,,
16540	P. 8165/51	,,			,,

7	8	9	10	11	12	13	14
Na	26×4	58-60	9	44	C	G	From Skandapurāṇa
Te	35×4	9-12	4	48	C	G	"
Na	26×5	24-28	8	42	C	O	"
"	32.5×3.2	One	6	76	Inc	D.W	"
Te	40×3	Three	4	68	C	D.W	"
Na	42.8×3.8	26-28	6	72	C	D.W	"
"	32×3.5	20-23	5	50	C	O.W	"
Te	42.5×3	17-19	6	82	C	O.W	"
Na	32×3.5	5-8	5	42	C	O	"
"	32×3.5	81-83	5	52	C	O	"
"	32×3.5	167-169	5	46	C	O.D	"
"	37×3.5	117-118	7	100	C	G	"

1	2	3	4	5	6
16541	P. 8198/2	Svarṇagaurīvrata-kathā			P
16542	P. 8341/15	,,			,,
16543	P. 8410/11	,,			,,
16544	P. 8758/5	,,			,,
16545	P. 8769/14	,,			,,
16546	P. 8870/9	,,			,,
16547	p. 9356/2	,,			,,
16548	P. 9633/34	,,			,,
16549	P. 9643/8	,,			,,
16550	P. 9668/4	,,			,,
16551	P 9698/4	,,			,,
16552	P. 9760/63	,,			,,

7	8	9	10	11	12	13	14
Na	27×3	4–7	5	50	C	O.W	From Skandapurāṇa
,,	38×4	29–30	8	75	C	O.D	,,
,,	21×4	25–26	11	44	C	O	,,
Te	25×3	18–20	8	38	C	G	,,
,,	37×3.5	2–3	8	60	C	G	,,
Kan	38×3.5	2–4	6	60	C	O.D	From Bhaviṣyottarapurāṇa
Te	2 .5×3.5	28–29	6	46	C	D.W	
Na	32×4	80–81	8	80	C	O.D	From Bhaviṣyottarapurāṇa
,,	35×3	27–29	6	56	C	O	From Skandapurāṇa
,,	36×3.5	9–10	7	60	C	G	,,
,,	41.5×4	Two	6	58	C	G	,,
Te	48×3.4	101–102	7	84	C	D.W	,,

1	2	3	4	5	6
16553	P. 9787/4	Svarṇagaurīvrata-kathā			Pl
16554	P. 9787/16	"			"
16555	P. 9879/2	"			"
16556	p. 9916/10	"			"
16557	P. 9939/8	"			"
16558	P. 9945/62	"			"
16559	P. 9952/70	"			"
16560	P. 10024/11	"			"
16561	P. 10297/7	"			"
16562	C. 3032/20	"			P
E16563	P. 4217/19	Haritālikāvratakathā (Mandaramālavrata-katha)			Pl
16564	P. 7486/45	"			"

7	8	9	10	11	12	13	14
Kan	39.5×3.6	9–11	5	60	C	O.D	From Bhaviṣyottarapurāṇa
,,	36×3.8	25–26	6	56	C	G	From Skandapurāṇa
Te	32.5×3.2	Three	5	54	C	O.D	,,
Kan	40×3.8	36–37	6	64	C	O.D	,,
Te	24.4×2.8	One	7	58	Inc No beginning	G	50th. folio.
Na	24×3.5	9–11	8	54	C	O	From Skāndapurāṇa
,,	41×3	140–142	8	80	C	O	,,
,,	21.5×3.5	166–168	5	34	C	O.D	,,
Te	35×3.5	73–75	6	80	C	D	,,
D	20×10	77–79	12	32	C	G	,,
Na	29×3.5	69–72	6	70	C	G	From Bhaviṣyottarapurāṇa
,,	32.5×3.2	93–97	6	76	C	O.D	,,

1	2	3	4	5	6
16565	P. 7772/2	Haritalikavratakatha			Pl
16566	P. 8211/3	,,			,,
E16567	P. 9643/35	,,			,,
16568	P. 9760/22	,,			,,
16569	C. 214/6	,,			P
16570	C. 214/10	,,			,,
16571	C. 214/11	,,			,,
16572	C. 4292/8a	,,			,,
16573	C. 4292/8b	,,			,,
16574	C. 4293/4b	,,			,,
E16575	C. 3568/2	Himakedāreśvaravratakatha			,,

7	8	9	10	11	12	13	14
Te	37.5×4	4-8	5	60	C	G	Form Liṅgapurāṇa
Na	27×3	104-110	5	50	C	O.D	From Bhaviṣyottarapurāṇa
,,	35×3	196-200	6	50	C	O	
Te	48×3.4	43-45	7	84	C	D.W	From Bhaviṣyottarapurāṇa
D	25.5×11	1-6	8	32	C	O	,,
,,	26×10	1-10	8	34	C	O	,,
,,	26×10	1-10	8	34	C	O	Translation to Marāṭi language
,,	21×11	1-11	9	26	C	O.D	
,,	21×11	1-11	9	26	C	O.D	Marāṭi language
,,	12×10	Two	11	22	Inc.	O.D	
Na	20.5×10.5	19-34	10	20	C	G	From Bhaviṣyottarapurāṇa

APPENDICES

APPENDIX 1

EXTRACT

1

Sl. No. 13818 **अक्षतारोपणव्रतम्** Ms. No. P. 504/4

Beginning :

श्रीसूत:—

मुनय: सम्प्रवेक्ष्येऽहं अक्षतारोपणं क्रमम् ।
अक्षतारोपणे नृणां लक्ष्मीवृद्धि: प्रजायते ।।
तथा राज्यादिवृद्धिश्च मोक्षसिद्धि: परत्र च ।
अक्षतारोपणात्पुंस. न किञ्चिदपि दुर्लभम् ।।

End :

गृहीत्वाऽथाशिषं तेभ्य: स्वयं भुञ्जीत बन्धुभि: ।
एवं य: कुरुते मर्त्यो भक्त्या परमया युत: ।।
भुक्त्वेह सकलान्भोगानन्ते शिवपदं व्रजेत् ।

Colophon:

इति श्री शिवरहस्ये ब्रह्मविष्णुसंवादान्तर्गते लक्षप्रजाप्रकरणे अक्षतारोपणो द्यापनविधि: ।

2

Sl. No. 13820 **अखण्डैकादशीव्रतम्** Ms. No. P. 3121/13

Beginning :

श्रीराजोवाच —

अखण्डैकादशीं ब्रह्मन् विधिं सम्यक्समादिश ।
विष्णो: संप्रीणनार्थाय प्रसादं कर्तुमर्हसि ।।

ऋषिरुवाच —

श्रृणुध्व नृपशार्दूल एकादश्याः विधिं शुभम् ।
पुरा वै भगवान् विष्णुः नारदाय यदुक्तवान् ॥

End :

पूर्णपात्रप्रदानेन व्रतं सम्पूरितं भवेत् ।
×× च सफलं चैव तीर्थस्नानफलं भवेत् ॥
विप्रैः सम्भाषितं यस्य सम्पूर्णं तस्य तत्फलम् ज्ञ
वित्तशक्तिर्गृहेनास्ति कृतं चैकापयीव्रतम् ॥

Colophon :

इति श्रीस्कान्दपुराणे मार्गशीर्षमाहात्म्ये (?) एकादशोऽध्यायः ।

3

Sl. No .13821 — अखण्डैकादशीव्रतम् — Ms. No. P. 8995/8

Beginning :

चतुर्भुजमुदाराङ्गं शेषपर्यङ्कशायिनम् ।
सलक्ष्मीकं सुरारातिहन्तारं चिन्तयेद्धरिम् ॥

ध्यानम् ।

ब्रह्मादिदेवताव्यूहैरभ्यर्चितपदाम्बुज ।
आगच्छ पूजां गृह्णीष्व मयावश्यं कृतां हरे ॥

End :

प्रार्थनम् ।

कृष्णाय गोपीनाथाय चक्रिणे मुरवैरिणे ।
नन्दगोपकुमाराय गृहाणर्घ्यं नमोऽस्तु ते ।

इदमर्घ्यम् । हिरण्यरूप इति सुवर्णपुष्पम् । फलदानम्

सुप्रीतोऽस्म्यहमेवाद्य सायुज्यं प्रददामि च ।
इह पुत्रैश्च पौत्रैश्च मोदन्ते सह जातिभिः ।

Colophon :

इति श्री पद्मसंहितायां अखण्डाख्यैकादशीकल्पः समाप्तः ।

4

Sl. No : 13823 अखण्डैकादशीव्रतोद्यापनम् Ms. No : 9147/2

Beginning :

युधिष्ठिरः —

देवदेव जगन्नाथ पुराणपुरुषोत्तम ।
नमस्ते पुण्डरीकाक्ष देवकीनन्दन प्रभो ॥
निष्कामकं व्रतं ब्रूहि सर्वपापप्रणाशनम् ।
विष्णुप्रीतिकरं नृणां सर्वसौख्यप्रदं शुभम् ॥
अखण्डैकादशीनाम व्रतानामुत्तमं व्रतम् ।

End :

धर्मजोऽपि तथा चक्रे भ्रातृभिः परिवारितः ।
व्रतं कृत्वा महाराजः सर्वान्कामानवाप्तवान् ॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
ज्ञानाज्ञानकृतात्पापात् मुच्यते नात्र संशयः ॥

Colophon :

इति मार्कण्डेयपुराणे अखण्डैकादशीव्रतोद्यापनं समाप्तम् ।

5

Sl. No : 13824 अङ्गारकचतुर्थीव्रतम् Ms. No : P. 2370/23

Beginning :

स्कन्द उवाच—

शृणु देवि प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
सर्वपापप्रशमनं सर्वदेवाधिपूजितम् ॥
सर्वसंपत्प्रभावश्च सर्वसौभाग्यवर्धनम् ॥

End :

सर्वसौभाग्यमाप्नोति सर्वसिद्धिं प्रयाति सः।
य इदं शृणुयाद्देवि पठेद्वा प्रातरुत्थितः।
षष्टिवर्षसहस्राणि शिवलोके महीयते॥

Colophon;

इत्यङ्गारकचतुर्थीव्रतं समाप्तम्।

6

Sl. No. 13826 अङ्गुलीयकव्रतम् Ms. No. P. 6496/53

Beginning :

शुभे शोभनेत्यादिदेशकालौ सङ्कीर्त्य, निर्विघ्नेन सूर्यप्रसादसिध्यर्थं आदौ विघ्नेश्वरपूजां करिष्ये । वृत्तं त्रिकोणवृत्तं च —

End :

ताम्बूलदानम्। नवग्रहधान्यदानानि। दश दानानि। भूरिदानानि। द्वादशब्राह्मण-भोजनम्। यस्य स्मृत्येत्यादि समर्पणम्।

Colophon

इति श्री सौरपुराणोक्तांगुलीपर्वव्रतं सम्पूर्णम्।

7

Sl. No : 13827 अतसीव्रतकल्पः Ms. No : P. 2027/20

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ अस्माकं सकुटुम्बानां समग्रस्थैर्यवीर्यायुरारोग्यैश्वर्याभिवृद्ध्यर्थं .... परिहारार्थं आयुरादिवृद्ध्यर्थं अतसीसहितश्रीमहाविष्णु-प्रीत्यर्थं कल्पोक्तप्रकारेण यावच्छक्ति ध्यानावाहनादिषोडशोपचारपूजां करिष्ये।

End :

प्रतिमादानमन्त्रः—

लक्ष्मीपते नमस्तुभ्यं भक्तानां वरदायक।
तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छमे॥

८

Sl. No : 13828 अतसीव्रतकल्पः Ms. No : P. 7063/1

Beginning :

युधिष्ठिर उवाच—

गङ्गासूनो महाभाग मत्कुलानां पितामह ।
चातुर्मास्यां व्रतन्दानं यच्छ्रेष्ठतरमुच्यते ।
तद्वदस्व ममाद्य त्वं द्रौपद्या सहितस्य च ॥

End :

भीष्मः—

यदा सुमङ्गली नारी भक्त्या दत्वाऽतसीसुमम् ।
सौवर्णं प्रतिजन्मादौ च × × × ×
× × × न्मुनिसौभाग्यं अन्ते लक्ष्मीपदं व्रजेत् ।
चातुर्मास्यव्रतं सर्वं कृत्वा यत्फलमाप्नुयात् ।
तत्फलं समवाप्नोति वैकुण्ठपदमाप्नुयात् ॥

Colophon :

इति भविष्ये अतसीपुष्पदानविधिः समाप्तः ।

९

Sl: No : 13830 अधिमासव्रतम् Ms. No : P. 2370/51

Beginning :

गृहकुम्भेन शिशिरं मीनमेषे वसन्तकम् ।
गोपतीमिथुने ग्रीष्मऋतुभिश्चयमुत्तमम् ॥
कार्तिके सुरिवर्षं च कन्याशौलीशरदृतुः ॥

End :

त्रैलोक्याधिपतिर्भूत्वा दैत्यनामधिपो भवेत् ।
करोति यद्व्रतं भक्त्या कारयेद्वा समाहितः ॥
सर्वपापविनिर्मुक्तः सूर्यलोके महीयते ॥

Colophon

इति श्रीस्कन्दपुराणे अधिमासव्रतं समाप्तम् ॥

10

Sl. No : 13835 अधिमासव्रतम् **Ms. No. P. 9760/42**

Beginning

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥

नारद उवाच—

शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
अधिमासव्रतं नाम चाधिक्यं प्राप्नुयाद्यतः ॥

End :

अनेन विधिना यस्तु अधिमासव्रतं चरेत् ।
सर्वेभ्योऽधिकतां याति सर्वान्कामानवाप्नुयात् ॥

Colophon :

इति श्रीस्कन्दपुराणे अधिमासव्रतकल्पः सम्पूर्णः ॥

11

Sl. No. 13836 अधिमासव्रतम् **Ms. No. P. 9916/36**

Beginning :

अधिमासे तु संप्राप्ते द्वादश्यामथ पौर्णमी ।
व्यतीपातदिने वाऽपि किञ्चिद्दानं महाफलम् ॥
सर्वयागेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ॥

End :

व्यतीपात नमस्तेऽस्तु सोमसूर्यसुत प्रभो ।
यद्दानादिकृतं सर्वं तदक्षय्यमिहास्तु मे ॥

Colophon:

अधिकमासव्रतं सम्पूर्णम् ॥

12

Sl No. 13837 अधिमासव्रतम् Ms. No. C. 4292/7

Beginning :

शुक्लाम्बरधरेत्यादिश्लोकान् पठित्वा, श्रोच्चारित ... मम × × मलमासप्रयुक्तविष्णवादित्रयस्त्रिंशद्देवताप्रीत्यर्थं त्रयस्त्रिंशदपूपदानानि करिष्ये । तत्रादौ त्रयस्त्रिंशद्देवतापूजनम् ।

End :

मन्त्रैरेतैश्च यो दद्यात् त्रयस्त्रिंशदपूपकान् ।
प्राप्नोति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपदम् ॥
यस्य स्मृत्येत्युक्त्वा , परमेश्वरार्पणमस्तु ॥

Colophon :

— — —

13

Sl. No. 13838 अनङ्गदानव्रतम् Ms. No. C. 3072/65

Beginning :

वर्णाश्रमाणां प्रभवः पुराणेषु मया श्रुतः ।
सदाचारस्य भगवन् धर्मशास्त्रविनिश्चयः ॥
परस्त्रीषु सदाचारं श्रोतुमिच्छामि तत्वतः ॥

ईश्वरः—

तस्मिन्नेव पुरे ब्रह्मा सहस्रैः सह षोडश ॥

End :

सर्वपापप्रशमनं ह्यनन्तफलदायकम् ।
कल्याणीनां च कथितं तत्कुरुष्व वरानना: ॥

करोति यश्शेषमखण्डमेतत्
कल्याणिनी माधवलोकसंस्था ।
संपूजितादेववरैरशेष—
× × × × × मुपैति विष्णोः ॥

End :

इति अनङ्गदानव्रतं समाप्तम् ॥

14

Sl. No : 13842 अनन्तप्रतिष्ठाव्रतम् Ms. No: P. 6297/25

Beginning :

अनन्तप्रतिष्ठाप्रयोगः कथ्यते — मार्गशीर्षे शुक्लपक्षे पञ्चम्यामेकादशव्रत विधानेन अनन्तप्रीत्यर्थं अनन्तप्रतिष्ठां करिष्ये। आदौ पुण्याहवाचनं कृत्वा अभ्युदयं कृत्वा —

End :

अग्निमुत्तरदेशे अश्वत्थपर्णरूपाय तस्योपरि चक्रं निक्षिप्य भूर्भुवस्सुवरोमिति मन्त्रः । प्रदक्षिणम्, विश्वभुजे नमः, आत्मने नमः, एतैर्मन्त्रैश्चतुर्वारं प्रदक्षिणम् । ब्राह्मणान् भोजयेत् ।

Colophon :

इत्यनन्तप्रतिष्ठापना समाप्ता ॥

15

Sl. No : 13843 अनन्तचतुर्दशीव्रतम् Ms. No : P. 1346/8

Beginning :

सङ्कल्पः— शुभदिने शोभने मुहूर्ते भगवदाज्ञया भगवत्प्रीत्यर्थं श्री अनन्तपद्म नाभप्रीतिद्वारा + + + + + + अनन्तपद्मनाभमुद्दिश्य अनन्तपद्मनाभव्रते क्रियमाणे × × ×

End :

हरिश्चन्द्रो ययातिश्च मैथिल्यां जनकेन च ।
एते चान्ये च बहवो राज्यं भुक्त्वा दिवं गताः ।।

Colophon:

इति ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे अनन्तव्रतकल्पः संपूर्णः ।।

16

Sl. No. 13853 अनन्तचतुर्दशीव्रतम् Ms. No. P. 5293/12

Beginning :

एवंगुण × × × × शुभतिथौ, वर्षे वर्षे × × × प्रयुक्त श्रीअनन्तपद्मनाभदेवतामुद्दिश्य अनन्तपद्मनाभदेवताप्रीत्यर्थं अनन्तपद्मनाभपूजाङ्ग यमुनापूजां करिष्ये ।

क्षीरोदार्णवसंभूते इन्द्रनीलसमप्रभे ।
त्वत्प्रसादान्महादेवि ! विष्णुरूपे नमोऽस्तु ते ।।
यमुने ते नमस्तुभ्यं सर्वकामप्रदायिनि !
सर्वसौभाग्यदे देवि ! यमुने ते नमोऽस्तु ते ।।

End

एतत्ते कथितं सर्वं व्रतानामुत्तमं व्रतम् ।
कृत्वा व्रतमिदं पुण्यं पापेभ्यो मुच्यते बुधः ।
स कामानखिलान् प्राप्य मम लोकं गमिष्यति ।।
ये शृण्वन्ति सततं वाच्यमानं नरोत्तमैः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमा गतिम् ।।

Colophon :

इति पद्मपुराणे कृष्णयुधिष्ठिरसंवादे अनन्तव्रतकल्पं सम्पूर्णम् ।।

17

Sl. No. 13853 अनन्तचतुर्दशीव्रतम् Ms. No. P. 5293/12

Beginning :

कृत्वा दर्भमयं देवं परिधानसमन्विम् ।
फणसप्तान्वितं देवं पिङ्गलाभं चतुर्भुजम् ॥
दक्षिणाग्रकरे पद्मं शङ्खं तस्याप्यधः करे ।
चक्रमूर्ध्वकरे वामे गदां ध्यायेत् पुनः पुनः ॥

End :

अनन्तः सर्वनागानां अधिपः सर्वकामदः ।
व्रतेनानेन सुप्रीतः भवत्विह सदा मम ॥

दानमन्त्रः —

अनन्तः प्रतिगृह्णातु अनन्तो वै ददाति च ।
अनन्तः स्तावकोभाभ्यां अनन्ताय नमोनमः ॥

इति प्रतिग्रहमन्त्रः । यस्य स्मृत्या च ॥

Colophon:

इति अनन्तव्रतविधिः समाप्तः ।

18

Sl. No : 13857 अनन्तचतुर्दशीव्रतम् Ms. No: P. 5946/9

Beginning :

कृत्वा दर्भमयं देवं वाराग्निविससंन्वितम् ।
फणास्सप्तान्वितं देवं पिङ्गलाक्षं चतुर्भुजम् ॥
दक्षिणाग्रकरे पद्मं शङ्खं तस्याप्यधः करे ।
अनन्तध्यानसंस्थानं कथितं ब्रह्मवित्तमैः ॥

End :

उपायनम्

अनन्तः सर्वनागानां अधिपः सर्वकामदः ।
दानेनानेन सुप्रीतो भवत्विह सदा मम ।।
अनन्तः प्रतिगृह्णातु अनन्तो वै ददाति च ।
अनन्तस्तारकोभाभ्यां अनन्ताय नमो नमः ।।

Colophon :

— — —

19

Sl. No : 13859 अनन्तचतुर्दशीव्रतम् Ms. No : P. 6297/18

Beginning :

चतुर्दशानां लोकानां आचारः परमः प्रभुः ।
पूर्वं पुरुषसूक्तेन स्नापयित्वा ततः परम् ।
आवाहनाद्यैराचारैः धर्मैरेतैः सनातनम् ।
पूजयेद्देवदेवं तं पुरुषः पुरुषोत्तमम् ।।

End :

×××नातिरिक्तान्यपरिस्फुटानि
यानीह कर्माणि मया कृतानि ।
कर्माणि चैतानि मम क्षमस्व
प्रयाहि तुष्टः पुनरागमाय ।।
अनेनैव विधानेन वत्सराणि चतुर्दश ।
जपित्वोद्वासनं कुर्यात् ततः सर्वं समापयेत् ।।

Colophon :

इत्यनन्तसमाराधनविधिः समाप्तः ।

अनन्त: प्रतिगृह्णातु अनन्तो वै ददाति च ।

अनन्तस्तारकोऽभाभ्यां अनन्ताय नमो नम: ।।

उपायनदानम् ।

Colophon ·

20

Sl. No : 13*67 अनन्तचतुर्दशीव्रतम् Ms, No : 7515/9

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ अस्माकं...आदि चतुर्विधपुरुषार्थसिद्ध्यर्थं-श्रीमदनन्तकल्पोक्तसम्पूर्णसमग्रसकलफलावाप्त्यर्थं ... . .धनकनकवस्तुवाहनादि सकलसंपत्समृद्ध्यर्थं....

End :

अनन्त: सर्वनागानां अधिप: सर्वकामद: ।

व्रतेनानेन सुप्रीत: भव प्रीति: सदा मम ।।

उपायनदानम् —

अनन्त: प्रतिगृह्णातु अनन्तोऽनन्तं ददातु च ।

अनन्तस्तारकोभाभ्यां अनन्ताय नमोनम: ।।

End :

इति अनन्तव्रतविधि: ।

21

Sl. No : 13872 अनन्तचतुर्दशीव्रतम् Ms. No : P. 8000

Beginning :

स्कन्द उवाच—

अनन्तव्रतमुद्दिश्य समग्रं परमेश्वर ।

उद्यापनविधिं शम्भो कथयस्व विधानत: ।।

ईश्वरउवाच—

वर्षे चतुर्दशे पूर्णे उद्यापनमथाचरेत् ।

मध्येऽप्युद्यापनं कुर्यात् यथावित्तानुसारत: ।।

End :

सगरेण दिलीपेन रघुणा भरतेन च।
अनुष्ठानवतां तेषां सर्वेषां भोगमोक्षदम् ।
कार्तिकेयः करोत्येनं व्रतस्योद्यापनं श्रियम् ।
सभुक्त्वा विपुलान् भोगान् अन्ते विष्णुपदं व्रजेत् ॥

Colophon:

इति स्कान्दपुराणे अनन्तव्रतोद्यापनविधिः समाप्तः ।

22

Sl No. 13882 अनन्तचतुर्दशीव्रतम् Ms. No. P.-8758/9

Beginning :

सूत उवाच—
अरण्ये वर्तमानास्ते पाण्डवाः दुःखकर्शिताः ।
कृष्णं दृष्ट्वा महात्मानं प्रणिपत्य यथाक्रमम् ॥
युधिष्ठिरस्तु धर्मात्मा प्रोवाच जगदीश्वरम् ।

युधिष्ठिर उवाच—
अहं दुःखीहसञ्जातो भ्रातृभिः परिवारिभिः।
कथं मुक्तिर्भवेदस्माकमनन्ताद् दुःखसागरात् ॥

श्रीकृष्ण उवाच—
अनन्तव्रतमस्त्यन्यत् सर्वपापहरं शुभम् ।

End :

अनन्तव्रतधर्मेण सम्यक्चीर्णेन पाण्डव।
एतत्ते कथितं सर्वं व्रतानामुत्तमं व्रतम् ॥
यत् श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ।

एतत् शृण्वन्ति सततं वाच्यमानं नरोत्तमैः।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे श्रीमदनन्तपद्मनाभव्रतकल्पं सम्पूर्णम् ।

23

Sl: No: 13890 अनन्तचतुर्दशीव्रतम् Ms. No: P. 9745

Beginning:

यमुनापूजा ।
क्षीरोदार्णवसंभूता इन्द्रनीलसमप्रभा ।
त्वत्प्रसादान्महादेवि विष्णुरूपे नमोऽस्तु ते ॥
ध्यानम् ।
यमुने ते नमस्तुभ्यं सर्वकामप्रदायिनि ।
सर्वसौभाग्यदे देवि यमुने ते नमोऽस्तु ते ॥

End:

एतच्छृण्वन्ति सततं पठ्यमानं नरोत्तमाः ।
ते सर्वपापनिर्मुक्ताः यास्यन्ति परमां गतिम् ।

Colophon:

इति श्रीभविष्योत्तरपुराणे अनन्तव्रतकल्पः संपूर्णः ।

24

Sl. No: 13892 अनन्तचतुर्दशीव्रतम् Ms. No: P. 9787/13

Beginning:

एवंगुणविशेषणविशिष्टायां शुभतिथौ ममाचरितव्रतस्य संपूर्णफलतावाप्त्यर्थं पद्मपुराणोक्तप्रकारेण संभावितनियमेन .... पूजां करिष्ये ।

End:

दानेनानेन सुप्रीतो भवत्विह सदा मम ।
वायनदानम् ।

Colophon :

इति अनन्त पूजाविधानं सम्पूर्णम् ।

25

Sl. No : 13904 अनन्तचतुर्दशीव्रतम् Ms. No : C. 201/1

Beginning :

यमुनापूजा ।

प्रातरुत्थाय संकल्प्य दन्तधावनपूर्वकं ।

अनन्तं हृदये ध्यात्वा स्नानं कृत्वा यथाविधि ॥

End :

अभिष्टसृष्टिगर्वैःकिंचिदग्नौ च पुष्कलम् । (?)

पुष्कलानि च चत्वारि अनन्ते परिकीर्तिता: ॥

Colophon :

इति श्रीमदनन्तपूजाविधि: समाप्त: ॥

26

Sl No : 13907 अनन्तचतुर्दशीव्रतम् Ms. No: C. 3466/2

Beginning :

कृत्वा दर्भमयं देवं वारान्निधिसमन्वितम् ।

फणासप्तान्वितं देवं पिङ्गलाक्षं चतुर्भुजम् ॥

पीताम्बरधरं देवं शङ्खचक्रगदाधरम् ।

अलङ्कृतं समुद्रेण तत्स्वरूपं विचिन्तयेत् ॥

ओं नमो भगवते वासुदेवायेति ध्यानम् ॥

End :

यथा त्वं सर्वदेवानां इन्द्रादीनां च रक्षकः ।
तथा मां त्राहि देवेश त्वदङ्घ्रिशरणागतम् ॥
इति पुष्पाञ्जलिं दद्यात् ।

Colophon :

इति पूजाविधानं सम्पुर्णम् ॥

27

Sl. No : 13908 अनन्तचतुर्दशीव्रतम् Ms. No C. 3537/1

Beginning :

यमुनापूजा। आगमार्थं तु .....ध्यानम्। एवंगुणविशेषणविशिष्टायां अस्यां शुभतिथौ अस्माकं सकुटुम्बानां समस्तदुरितपरिहारपूर्वकक्षेमस्थैर्यविजयायुरारोग्य-संपत्सन्तानसौभाग्यैश्वर्यादीनामुत्तरोत्तराभिवृद्ध्यर्थं—

End :

एवं सूतमुखाः सर्वे मुनयस्ते तपोधनाः ।
अनन्तव्रतमहात्म्यकथां श्रेयस्करीं शुभाम् ।
श्रुत्वा प्रमोदभरिताः आसन् व्रतपरायणाः ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे श्रीमदनन्तपद्मनाभव्रतकथा ॥

28

Sl No. 13912 अनन्तव्रतोद्यापनम् Ms. No : P. 2370/17

Beginning :

युधिष्ठिर उवाच —
अनन्तव्रतमित्युक्तं समस्तं पुरुषोत्तम ।
उद्यापनं कथं तस्य सम्यग्दानफलं तथा ॥
श्रीकृष्ण उवाच —
शृणुष्व पाण्डवानां तु व्रतोद्यापनमुत्तमम् ॥

End :

ये चरन्ति यथाप्रोक्तं ये पठन्ति नरोत्तमाः ।
ये चरन्ति यथा पार्थ ते परं फलमैप्नुयुः ॥
पुत्रपौत्रैः परिवृतः ततो मोक्षमवाप्स्यति ॥

Colophon

इति श्रीभविष्योत्तरपुराणे सूतवाक्ये अनन्तव्रतोद्यापनं समाप्तम् ॥

29

Sl. No. 13916 अनन्तव्रतोद्यापनम् Ms. No: P. 5293/28

Beginning :

कृत्वा दर्भमयं देवं वरांनिधिसमप्रभम् ।
फणासप्तान्वितं देवं पिङ्गलाक्षं चतुर्भुजम् ॥
दक्षिणाग्रकरे पद्मं शङ्खं तस्याप्यधःकरे ।
चक्रमूर्ध्वकरे वामे गदां ध्यायेत्प्रयत्नतः ॥

End :

न्यूनातिरिक्तान्यपरिस्फुटानि त्वदीयकर्माणि मया कृतानि ।
क्षम्यानि चैतानि मया कृतानि त्वया हि तुष्टः पुनरागमाय ॥
इति प्रार्थना ॥ उपायनदानमन्त्रः ॥
दानेनानेनसुप्रीतो भवत्विह सदा मम ॥

Colophon :

इति अनन्तपूजाविधानं संपूर्णम् ॥

30

Sl. No : 13919 अनन्तव्रतोद्यापनम् Ms. No: P. 5573/4b

Beginning :

श्रीस्कन्दः

अनन्तव्रतमुद्दिश्य समग्रं परमेश्वर ।
उद्यापनं कथं शम्भो कथयस्व विधानतः ।

ईश्वर उवाच–वर्षे चतुर्दशे पूर्णे उद्यापनमथाचरेत् ।
मध्येऽप्युद्यापनं कुर्यात् यथावित्तानुसारतः ॥

End :

ब्राह्मणेभ्यो वस्त्रवेष्टितपरिकरसहितकलशम × × × × × × × कौपीनवस्त्र-
हिरण्यदक्षिणान्नदानेन भगवान् सर्वात्मकः श्रीमदनन्तप्रीतिरस्त्विति समर्पयेत् ।

Colophon :

इति स्कान्दपुराणे अनन्तव्रतोद्यापनविधिः सम्पूर्णः ॥

31

Sl. No : 13925 अनन्तव्रतोद्यापनम् Ms. No. P, 6867/27

Beginning :

युधिष्ठिर उवाच–
कृष्ण कृष्ण महाबाहो देवकीनन्दन प्रभो ।
अनन्तोद्यापनं ब्रूहि विस्तरेण ममाधुना ॥
कस्मिन् काले तु कर्तव्यं को मन्त्रस्तस्य को विधिः [
होमः को वात्र किं दानं सर्वमाचक्ष्व हे प्रभो ॥

End :

सगरेण दिलीपेन रघुणा भरतेन च ।
अनुष्ठानवतां तेषां सर्वेषां भोगमोक्षदम् ।
एवमुक्तेषु मासेषु करोत्युद्यापनं नरः ।
स भुक्त्वा विपुलान् भोगान् अन्ते याति परां गतिम् ॥

Colophon :

इति श्री स्कन्दपुराणे श्रीमदनन्तोद्यापनविधिः समाप्त ॥

32

Sl. No : 13936 अनन्तव्रतोद्यापनम् Ms. No : 9950/8

Beginning :

श्रीस्कन्द उवाच
अनन्तव्रतमुद्दिश्य समग्रं परमेश्वर ।
उद्यापनविधिं शम्भोः कथयस्व विधानतः ॥

श्रीईश्वर:– वर्षे चतुर्दशे पूर्णे उद्यापनमथाचरेत् ।
उद्यापनविधौ स्कन्द × × × न कारयेत् ॥

End :

जितेन्द्रियस्सत्यवादी ब्रह्मभूयाय कल्पते ।
यद्व्रतं पुण्यमाख्यातमनन्तोद्यापनाश्रितः ।
पठेद्वा शृणुयाद्वाऽपि विष्णुलोके महीयते ॥

Colyphon :

इति श्रीस्कन्दपुराणे ईश्वरस्कन्दसंवादे अनन्तोद्यापनविधिः ॥

33

Sl. No : 13939 अनन्तव्रतोद्यापनम् Ms. No : C. 3032/33

Beginning :

मण्डपपूजाविधिः—एवंशुभतिथौ मम सपत्नीकस्य समस्तपातकापनुत्तये सकलजन्मार्जितत्तापत्रयनिवारणार्थं चिरायुर्बहुलक्ष्मीसम्पादनार्थं मण्डलदेवतापूजां करिष्ये ।

End :

ततः स्विष्टकृदादि पूर्णाहुतिहोमशेषं समापयेत् । ततः ब्राह्मणान् पूजयित्वा श्रेयस्संपादनं वायनदानं कुर्यात् । ततः नमस्कारप्रदक्षिणं कुर्यात् ॥

Colophon :

इत्यनन्तोद्यापनविधिस्समाप्तः ॥

34

Sl. No : 13941 अन्नपूर्णाव्रतम् Ms. No : C. 224/1

Beginning :

संकल्प्य, उपात्तसमस्तदुरितक्षयद्वारा श्री अन्नपूर्णामुद्दिश्य अन्नपूर्णाप्रसादसिद्ध्यर्थं संभवद्भिर्द्रव्यैः आवाहनादिषोडशोपचारपूजां करिष्ये। कलशस्याधः चतुरश्रं मण्डलं कृत्वा–

End :

एवं षोडशोपचारं मूलमन्त्रेण कुर्यात् । तत्र मूलमन्त्रः – ओं नमो भगवति शङ्करप्रियायै गौर्यै नमः । ततः यस्य स्मृत्येत्युक्त्वा, अनेन पूजनेन भगवान् सर्वात्मकः (?) अन्नपूर्णा प्रीयताम् । श्रीः ॥

Colophon :

— — —

35

Sl. No : 13943 | अपामार्जनव्रतम् | Ms. No: P. 3121/22

Beginning :

भगवन् रागिणस्सर्वे विषरोगाद्युपद्रवैः ।
दृष्टग्रहोगघातैश्च सर्वकामविवर्जिताः ॥
× × रिकृकृत्याभिः सर्वरोगैश्च दारुणैः ।
× × × तिष्ठन्ति मुनिसत्तम ॥

End :

य इमं धारयेद्विद्वान् श्रद्धाभक्तिसमन्वितः ।
ग्रहास्तान्नोपसर्पन्ति नरा × × × ।
धन्यो यशस्यः शत्रुघ्नः ध्रुवोऽयं मुनिसत्तम ।
पठतां श्रृण्वतां चैव ददाति परमां गतिम् ॥

Colophon

इति श्री अपामार्जनं संपूर्णम् ॥

36

Sl. No. 13945 | अमासोमवारव्रतम् | Ms. No. P. 938/2

Beginning :

× × × × × स्वनराधिपा
भविष्यति गुणीपुत्रः सर्वलोकेषु विश्रुतः ।
श्रुत्वाचैतन्महद्वाक्यं प्रत्युवाचयुधिष्ठिरः ।
× × × × × × ×
× × प्रकाशितं मर्त्ये केनेदं कारितं पुरा ॥

End :

य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सपुत्रपौत्रसहितः सुखी स्यान्नात्र संशयः ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे भीष्मयुधिष्ठिरसंवादे अमासोमवारव्रतकल्पं संपूर्णम् ॥

37

Sl. No : 13949 अमासोमवारव्रतम् Ms. No. P. 2290/1

Beginning :

युधिष्ठिर उवाच

अमासोमव्रतस्यास्य उद्यापनविधिं वद ।

कर्तव्यं केन विधिना कथयस्व यथोदितम् ॥

भीष्म उवाच—

अजातशत्रो नारीभिः कर्तव्यं पुरुषैरपि ।

अमावास्या तिथिः पार्थ सोमवारान्विता यदा ॥

End :

कर्तव्यमग्रे यत्नेन तस्याभीष्टं भवेद्ध्रुवम् ।

व्रतमिदमतुलं नरेन्द्र विष्णो

सततमिह प्रविधाय तां त्वया च ।

पतिसुतधनमिभन्ति पुरन्ध्री (?)

भुवि वितनोत्यखिलं यशः प्रयत्नात् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे भीष्मयुधिष्ठिरसंवादे नारदाय ब्रह्मणा प्रोक्त-ममावास्यासोमवारव्रतोद्या × × कल्पं संपूर्णम् ॥

38

Sl. No. 13947 अमासोमवारव्रतम् Ms. No. P. 2868/1

Beginning :

पूर्वोक्त एवं गुणविशेषणविशिष्टायां शुभतिथौ मम आचरितस्य व्रतस्य संपूर्णसमग्रफलावाप्त्यर्थं पूर्वजन्मनि इह जन्मनि जन्मान्तरेषु + + + + + + + + अमासोमवारप्रयुक्त अश्वत्थमुद्दिश्य अश्वत्थनारायण-प्रीत्यर्थं भविष्योत्तरपुराणोक्तप्रकारेण षोडशोपचारपूजां करिष्ये ।

End :

तथाऽस्त्विति वरस्सोमा कृत्वा व्रतमकल्मषम् ।
जीवपुत्रा भवेन्नारी व्रतस्यास्य प्रभावतः ॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
तेषां पुत्राश्च पौत्राश्च वर्धन्ते नात्र संशयः ॥

Colophon :

इति स्कन्दपुराणे अमासोमवारव्रतकथा संपूर्णा ॥

39

Sl. No. 13949 अमासोमवारव्रतम् Ms. No. P. 5293/20

Beginning :

शरतल्पगतं भीष्मं उपगम्य युधिष्ठिरः ।
कृत्वा प्रणामं धर्मात्मा हितं वचनमब्रवीत् ॥

युधिष्ठिर उवाच

हतेषु कुरुमुख्येषु भीमसेनेन कोपिना ।
तथा परेषु भूतेषु हतेषु युधि जिष्णुना ।

End :

कुर्यात् प्रदक्षिणावर्तं सोऽपि पूर्णं लभेत् फलम् ॥
व्रतमिदमखिलं नरेन्द्र विष्णोः श्रुतमनवाधिपराक्रम त्वया ।
पतिसुतधनमिच्छति पुरंध्री सपदि करोति न चात्र × × ॥

Colophon :

इति भविष्योत्तरपुराणे धर्मभीष्मसंवादे सोमदारामावास्याकथा समाप्ता ॥

40

Sl No. 13950 अमासोमवारव्रतम् Ms. No. C. 6000/24

Beginning :

चतुर्भुजैः शङ्खचक्रगदापद्मोपधारिणम् ।
एवं अश्वत्थमूलेशं वासितं चिन्तयेद्धरिम् ।
अश्वत्थनारायणाय नमः । ध्यानम् ।

आवाहयामि देवेश अश्वत्थस्थानसंस्थितम् ।
भवन्तं पुण्डरीकाक्षं ह्यत्रागच्छ च सर्वदा ॥

आवाहनम् ।

End :

कुर्याद्व्रतान्ते सद्भक्त्या ब्राह्मणान् भोजयेत्ततः ।
तदाशिषःसमादाय बन्धुभिः सह भोजयेत् ।
व्रतराजस्य माहात्म्यं यः पठेच्छ्रावयेन्नरः ।
इह भुक्त्वाऽखिलान्भोगान् स्वर्गलोकमवाप्नुयात् ॥

Colophon

इति श्रीभविष्योत्तरपुराणे अमावास्यासोमवारव्रतकल्पः सम्पूर्णः ॥

41

Sl: No : 13952 अमासोमवारव्रतम् Ms. No : P. 6496/58

Beginning :

सोमवारे त्वमावास्या मध्याह्नव्यापिनी तिथिः ।
तस्यां तिथ्यामेकभुक्तं स्नानं दानं महत्फलम् ॥
प्रदोषव्यापिनी सा चेत् शिवपूजा महत्फला ॥

End :

अज्ञानिना मया देव व्रतमेतत्सुदुर्लभम् ।
कृतं भवतु मे देव अर्पयामि सदा शिव ॥

नक्तव्रतसमर्पणम् ॥

Colophon :

इति श्रीनागरखण्डे अमावास्यासोमवारव्रतं सम्पूर्णम् ॥

42

Sl. No : 13959 अमासोमवारव्रतम् Ms. No : P. 8385

Beginning :

पूर्वोक्तैवंगुणेत्यादितिथौ अश्वत्थनारायणमुद्दिश्य अमासोमवारव्रताङ्गं अथर्वण-शाखोक्तप्रकारेण पुरुषसूक्तप्रकारेण कलशपूजादिषोडशोपचारपूजां करिष्ये ।

End :

भक्ष्यैः फलैः सुधापुष्पैश्च पाण्डव । (?)
कुर्यात्प्रदक्षिणं भक्त्या सोऽपि पूर्णफलं लभेत् ॥
उद्यापनमथो वक्ष्ये व्रतराजस्य तत् शृणु ।
उद्यापनविहीनन्तु व्रतं निष्फलतामियात् ॥

Colophon:

इति श्रीब्रह्मपुराणे सोमभीमसंवादे अमासोमवारव्रतकल्पं सम्पूर्णम् ॥

43

Sl. No. 13975 अमासोमवारव्रतम् Ms. No. C. 2511/1a

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ अश्वत्थनारायणदेवतामुद्दिश्य अश्वत्थ-नारायणदेवताप्रीत्यर्थं कल्पोक्तप्रकारेण अमाप्रयुक्तसोमवारव्रतं करिष्ये । तदङ्ग कलशाराधनं करिष्ये ।

End :

भीष्म उवाच

फलैः पुष्पैस्तथा भक्ष्यैः वस्त्राद्यैरपि पाण्डव ।
व्रतं सम्पूर्णतां याति न वैधव्यं कदाचन ।
कुर्यात्प्रदक्षिणावर्तं परिपूर्णफलं भवेत् ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे भीष्मयुधिष्ठिरसंवादे अमावास्याव्रतं सम्पूर्णम् ।
अमासोमवतीव्रतं सम्पूर्णम् ॥

44

Sl. No. 13977 **अमासोमवारव्रतम्** Ms. No. C. 3032/47

Beginning :

अथ अमासोमवारव्रतं लिख्यते—

सङ्कल्पः, विघ्नेश्वरस्मरणं, तथा तिथ्यादिकथनं, एवंगुणेत्यादि, मम यावज्जीव-सौभाग्यावैधव्यपुत्रपौत्रभ्रातृप्रभृतिसर्वसुहृदायुष्यनिरतिशयसुखावास्त्यर्थं सोमवारव्रतं करिष्यन्, तदङ्गभूतामश्वत्थपूजां करिष्ये ।

End :

भगवत्युवाच

काऽसौ सोमा त्वया प्रोक्ता का जातिः कुत्र संस्थिता ।
तन्मे ब्रूहि महाभाग न विलम्बं सहाम्यहम् ॥

द्विज उवाच

सोमा तु रजकी जात्या सिन्धुद्वीपे सुशोभने ।
नगरे सिंहलपुरे स्थितिरस्यास्ति निश्चितम् ॥
लब्ध्वा व्रतफलस्सोऽपि विष्णोः सायुज्यमाप्नुयात् ॥

Colophon :

इति भविष्योत्तरपुराणे सोमवारामावास्याव्रतं सम्पूर्णम् ॥

45

Sl. No : 13979 **अमासोमवारव्रतोद्यापनम्** Ms. No : P. 55/3

Beginning :

उद्यापनविधिं वक्ष्ये शृणु पार्थ महामते ।
यं विना पूर्णता न स्यात् व्रतस्य सफलं भवेत् ॥

End :

दशदानानि कुर्वीत व्रतस्य परिपूर्तये ।
यथाशक्ति ब्राह्मणेभ्यः कारयेद्भूरिभोजनम् ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे अमासोमवारव्रतोद्यापनं संपूर्णम् ॥

46

Sl. No: 13981 अमासोमवारव्रतोद्यापनम् Ms. No: P. 1617/10

Beginning:

युधिष्ठिरः—उद्यापने व्रतस्यास्य को विधिर्वद सुव्रत ।
कर्तव्यं केन किं द्रव्यैः कथयस्व यथोदितम् ॥

End:

एवं कृते धर्मराज भक्त्या तुष्यति केशवः ॥
व्रती साङ्गफलं लब्ध्वा विष्णुलोकं स गच्छति ॥

Colophon:

इति भविष्योत्तरपुराणे अमासोमवारव्रतोद्यापनं नाम त्र्यशीतितमोऽध्यायः ॥

47

Sl. No. 13986 अमासोमवारव्रतोद्यापनम् Ms. No. P. 8769/15

Beginning:

उद्यापनविधिं वक्ष्ये शृणु पार्थ महामते ।
यं विना पूर्णता न स्यात् व्रतस्य न फलं भवेत् ॥

End:

अष्टोत्तरशतं हुत्वा अष्टोत्तरसहस्रकम् ।
× × × स्विष्टकृतं होमशेषं समापयेत् ॥

Colophon:

इति ब्रह्माण्डपुराणे उद्यापनविधिस्संपूर्णः ॥

48

Sl. No. 13987 अमासोमवारव्रतोद्यापनम् Ms. No. P. 9667/16

Beginning:

प्रदक्षिणद्रव्य । आम्राणि च रसालानि रज्जुदण्डगुडानि च ।
दलानि नागवल्लीनां क्रमुकादि लवङ्गवाः ॥

End:

तत्क्षणादेव नश्यन्ति भुजङ्गान् गरुडो यथा ।
ततः सङ्कल्पसिद्धेन सर्वदा सुखमश्नुते ॥

Colophon:

इति ब्रह्मवैवर्ते अमासोमव्रतोद्यापनं संपूर्णम् ॥

49

Sl. No : 13989 **अमासोमवारव्रतोद्यापनम्** Ms. No - P9945/2

Beginning :

ब्रह्मकैवर्ते — श्री भीष्म: —

उद्यापनविधिं ब्रूहि अमासोमव्रतस्य च ।
तर्पणं हवनं विष्णो: पूजनं विधिपूर्वकम् ।
सर्वं वद महाभाग व्रतसाद्गुण्यकारणात् ॥

End :

एकप्रदक्षिणं कुर्यात् भूप्रदक्षिणमुत्तमम् ।
अष्टोत्तरशतं कुर्यात् जन्मजन्मान्तकल्मषम् ।
तत्क्षणादेव नश्यन्ति भुजङ्गान्मारुतो यथा ।
तत: स × × सिध्यते सर्वथा सुखमश्नुते ॥

Colophon :

इति ब्रह्मकैवर्ते अमासोमवारव्रतोद्यापनं सम्पूर्णम् ॥

50

Sl. No : 13993 **अमुक्ताभरणव्रतम्** Ms. No : P. 7918/28

Beginning :

युधिष्ठिर उवाच —

यथाप्यमुक्ताभरणीं सप्तमीव्रतमुत्तमम् ।
कुर्याद्वन्ध्यात्वनाशाय भविष्योत्तरभाषितम् ॥

श्रीकृष्ण उवाच —

मुनीनां रोमशो नाम मथुरामागत: पुरा ।
सोऽर्चितो वसुदेवेन देवक्या च युधिष्ठिर ॥
उपविष्ट: कथा: पुण्या: कथयित्वा मनोरमा: ।
× × × × × कथामेतां प्रचक्रमे ॥

End :

तेषां सन्ततिविच्छेदो न कदाचिद्भविष्यति ।
स्त्रियश्च याश्चरिष्यन्ति व्रतमेतत्सुतप्रदम् ॥
मर्त्यभावे × × × × × ।
या तु कुर्याद्व्रतमिदं स्रग्वीसमेतं
चक्रे चराचरगुरुं हृदये निधाय ।
दद्यात्करोति कलुपस्य विभूतिदक्षं
सा श्रीयुता भवति शोभनजीवनी ।

Colophon :

× × × त्तरपुराणे × × अमुक्तव्रतकल्पः सम्पूर्णः ॥

51

Sl. No : 13995 अमुक्ताभरणव्रतम् Ms. No. C. 3032/30

Beginning :

मुनीन्द्रो लोमशो नाम मथुरायां गतः पुरा ।
स प्रेषितः सुदेवेन देवक्यां च युधिष्ठिर ।
उपविष्टः कथाः पुण्याः कथयित्वा मनोरमाः ।
मत्तः कथयितुं भूयः कथामेतां प्रचक्रमे ॥
व्रतमाख्यानसहितं सोऽपि पापैः प्रमुच्यते ।

End :

य इदं शृणुयान्नारी जीववत्सा भवेत्सती ॥
किल्बिषान्मुच्यते पापैः स याति परमां गतिम् ।
सर्वसौख्यमवाप्नोति भुक्तिमुक्तीस्तथैव च ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे देवक्या कृतं अमुक्ताभरणव्रतं समाप्तम् ॥

52

Sl. No : 13996 **अमृतलक्ष्मीव्रतम्** Ms. No : P. 7958/23

Beginning :

सूत उवाच—

तथामृतफलं वक्ष्ये सर्वसौभाग्यदायकम् ।
अमृतोपमक्षीरं भुवनेर्विहि सर्वदा ॥(१)

End :

सर्वसौभाग्यसम्पन्ना सर्वभाग्ययुतान्विता ।
लक्ष्मीभिर्न द्वितीयाऽसौ सर्वपूज्या भवेद्ध्रुवम् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे अमृतलक्ष्मीव्रतं संपूर्णम् ॥

53

Sl. No : 13997 **अर्धनारीश्वरव्रतम्** Ms. No : C. 3537

Beginning :

वैशाखशुद्धपौर्णिमायां सन्ध्यावन्दनादि नित्यकर्म यथावत् विधाय पूजामण्टपमागत्य, उपविश्य, आचम्य, आगमार्थं त्विति घण्टानादं कृत्वा, प्राणानायम्य, देशकालौ संकीर्त्य, एवंगुणविशेषण......शुभतिथौ ।

End :

अर्धनारीश्वरस्वामिन् चन्द्रशेखर शङ्कर ।
प्रतिमां तव दास्यामि प्रसन्नो भव मे सदा ।

इति प्रतिमादानं कृत्वा, फलतांबूलदशदानानि विधिवत् कुर्यात् । ब्राह्मणाशीर्वादान् परिगृह्य, ब्राह्मणान् भोजयित्वा, बन्धुमित्रादिभिः सह स्वयमपि भुञ्जीयात् ॥

Colophon

इत्यर्धनारीश्वरव्रतकल्पः ॥

54

Sl. No : 13998 अर्घोदयकल्पः Ms. No. P. 2370/68

Beginning :

आदित्य उवाच—

अर्घोदयविधिं वक्ष्ये सर्वपापप्रणाशनम् ।
इदं मुख्यं व्रतं राजन् व्रतानामुत्तमव्रतम् ।
अर्घोदयेति विख्यातं सर्वशास्त्रेषु निश्चितम् ॥

End :

ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रास्तथाऽपरे ।
तेषामप्यविकारोऽस्ति व्रतेऽस्मिन् राजसत्तम ॥

Colophon :

इति श्री मार्कण्डेयपुराणे अर्घोदयविधानकल्पं समाप्तम् ॥

55

Sl. No : 14000 अर्घोदयकल्पः Ms. No : P. 6000/49

Beginning :

भास्कर उवाच—

अर्घोदयविधिं वक्ष्ये सर्वपापप्रणाशनम् ।
इदं सर्वप्रदं राजन् व्रतानामुत्तमव्रतम् ।
अर्घोदय इति ख्यातं सर्वशास्त्रेषु निश्चितम् ॥

End :

अश्वमेधसहस्राणि वाजपेयशतानि च ।
कृत्वा तत्फलमाप्नोति ततो लक्षगुणं भवेत् ॥
इह लोके सुखी भूत्वा प्रेत्य स्वर्गमवाप्नुयात् ।
नारी वा पुरुषो वाऽपि मम लोके महीयते ॥

Colophon :

इति श्री आदित्यपुराणे अर्घोदयव्रतं संपूर्णम् ॥

56

Sl. No : 14001 अर्धोदयकल्पः Ms. No: P. 7958/15

Beginning :

स्कन्द उवाच—

देव देव महादेव सर्वदेव महेश्वर ।

ह्यर्धोदयस्य वरः सम्यग्वद सम्यगृदस्व मे ॥ (!)

महादेव उवाच—

शृणु वत्स प्रवक्ष्यामि भक्त्या व्रतमनुत्तमम् ।

यस्य स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥

End :

एतत्ते कथितं पुत्र व्रतानामुत्तमव्रतम् ।

यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥

Colophon :

इति श्री स्कन्दपुराणे अर्धोदयव्रतं सम्पूर्णम् ॥

57

Sl. No : 14002 अर्धोदयकल्पः Ms. No. P. 8025/7

Beginning :

कथं नु सुखिनस्स्युस्ते चिन्तेयं महती मम ।

यदि कश्चिदुपायोऽस्ति मम ब्रूहि सुनिश्चितम् ।

करुणाय सर्वमर्त्यानां समाचक्ष्व विशेषतः ।

ईश्वरः—

शृणु पुत्र प्रवक्ष्यामि सर्वपापप्रणाशनम् ॥

End :

प्रार्थना—

× × एकादन्य मरुद्गणानां

× × मधाता परमं निधानम् । (!)

पूज्योऽसि सिद्धामरसर्वसङ्घ
पाहि × मास्मन्द्भगवन् मतमस्ते ॥

Colophon :

इति श्री सौरपुराणे अर्धोदयकल्पः समाप्तः ॥

58

Sl. No. 14008 अर्धोदयकल्पः Ms. No : P. 10041/87

Beginning :

अर्धोदयविधिं वक्ष्ये सर्वपापप्रणाशनम् ।
इदं सर्वव्रतं राजन् व्रतानामुत्तमं व्रतम् ।
अमार्कपातश्रवणैः युक्ता चेत्पुष्यमाघयोः ॥

End :

इदं व्रतं मया प्रोक्तं तदनुग्रहकाम्यया ।
तस्मात्सर्वप्रयत्नेन त्वमिदं कुरु भूतये ॥
ब्राह्मणा क्षत्रिया वैश्याः स्त्रियः शूद्राः तथापरे ।
तेषामप्यधिकारोऽस्ति व्रतेऽस्मिन् राजसत्तम ॥

Colophon :

इति ब्रह्माण्डपुराणे अर्धोदयव्रतकल्पः ॥

59

Sl. No. 14009 अर्धोदयकल्पः Ms. No. P. 10041/88

ginning :

अमार्कपातः श्रवणैर्युक्ता चेत्पुष्यमाघयोः ।
अर्धोदयः स विज्ञेयो राहुपर्वशताधिकम् ॥
सत्राजितिरुवाच—
अर्धोदयव्रतं ब्रूहि किं दानं कस्य पूजनम् ।
विधानं किं फलं पुण्यं सर्वमेव यथाक्रमम् ॥

End :

विप्रेभ्यो दक्षिणां दद्यात्प्रत्येकं निष्कमानतः ।
नमस्ते देवदेवेश कालचक्रप्रवर्तक ।
मया कृतं व्रतं यत्तु सम्पूर्णमिहमस्तु मे ॥
नमस्ते देवदेवेश लोकनाथ जगद्गुरो ।
परमान्नेन दत्तेन प्रीतो भव दिवाकर ॥
इति दानमन्त्रः ॥

Colophon

इति अर्घोदयकल्पः संपूर्णः ॥

60

Sl. No. 13986 अमासोमवारव्रतोद्यापनम् Ms. No. P. 8769/15

Beginning :

युधिष्ठिर उवाच—
कृष्ण कृष्ण महाबाहो दुष्टनिग्रहकारण ।
व्रतानि विविधान्येवं श्रुतानि मुखतस्तव ॥
तथाप्यतुष्टवद्भाति मनो मे कञ्जलोचन ।
भीष्मद्रोणमुखप्रेष्ठसर्वश्रेयोऽभिवर्धकम् ॥

End :

अथवा दशसंख्यानां दानं दद्यात् द्विजातये ।
आचार्यपूजां कृत्वैवं आशिषः प्रतिगृह्य च ।
एवं यः कुरुते भक्त्या सोऽन्ते विष्णुपदं लभेत् ॥

Colophon :

इति अलवणव्रतं समाप्तम् ॥

61

Sl. No: 14011 अमासोमवारव्रतोद्यापनम् Ms. No: P. 6297/47

Beginning

अशनिव्रतकल्पं व्याख्यास्यामो वसन्ते ग्रीष्मे शरदि काले वा देवगृहे प्रासादे राजगृहे ग्राममध्ये गोष्ठे जनसमूहेऽश्वसमूहे धनधान्यसमूहे ब्राह्मणसमूहे बृन्दावने पनसनारिकेल—

End :

अष्टोत्तरसहस्रं अष्टोत्तरशतं अष्टाविंशतिं वा ब्राह्मणान् भोजयित्वा यथाशक्ति दक्षिणां ददाति। अशनिहतश्निर्भवतीत्याह बोधायनः ॥

Colophon :

इत्यशनिव्रतकल्पः समाप्तः ॥

62

Sl. No : 14012 अन्नपूर्णाव्रतम् Ms. No : C. 3032/8

Beginning :

× × × × शतत्रयम् ।
द्द्दुर्भयाः सर्वे विहाय सममञ्जसा ।
विदा × × बलादाश्रममाश्रितान् ॥
संभारान् जगदुः शीघ्रं सैनिकाः पापबुद्धयः ।
यथेष्टं भोजयाञ्चक्रुः नृपतौ वाऽनुमोदिताः ॥

End :

शृणु भूप प्रवक्ष्यामि न प्रख्याता इमाः कथाः ।
इतरेषां च धर्माणां कथं ख्यातिश्च भूतले ।
राजसास्तामसा भूमौ बहवः कामुका जनाः ।
इच्छन्त्यैहिकभोगांश्च पुत्रपौत्रादिसंपदः ॥
क्वचित् कथञ्चन कापि ज × × × ।

63

Sl. No : 14013 अश्वत्थकल्पः Ms. No : P. 251/19

Beginning :

× × × उवाच—

भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
स्त्रीणां पुत्रविहीनानां नराणां विविधापदाम् ॥
केनोपायेन मे ब्रूहि सुखसिद्धिः भवेत् पुरा ।

सूत उवाच—

पुरा ब्रह्मादयो देवाः सर्वे विष्णुं समाश्रिताः ।
नत्वाऽथ देवदेवेशं राक्षसैः पीडिता वयम् ॥

End :

पुत्र कामस्तु देवर्षे श्वेतवर्णं सुशोभनम् ।
सबीजपूरककरं वरदाभयपाणिनम् ॥
शङ्खचक्रसमायुक्तं सलक्ष्मीकं च सुव्रतम् ॥

Colophon :

इति अश्वत्थकल्पे प्रदक्षिणविधिः ॥

64

Sl. No : 14020 अश्वत्थनारायणव्रतम् Ms. No : P. 5293/31

Beginning

पूर्वोक्तैवंगुणविशेषणविशिष्टायां शुभतिथौ अश्वत्थनारायणमुद्दिश्य अश्वत्थनारायणप्रीत्यर्थं अश्वत्थनारायणस्य षोडशोपचारपूजां करिष्ये । ओम्

आग्नेयाभिमुखं देवं सुखतः कामरूपिणम् ।
इष्टकाम्यार्थसिध्यर्थं पुत्रपौत्रप्रवर्धनम् ॥

End :

प्रतिग्रहमन्त्रः देवस्य त्वेति ।

न्यूनातिरिक्तान्यपरिस्फुटानि

यानीह कर्माणि मया कृतानि ।

क्षन्त्यानि चैतानि मम क्षमस्व

प्रयाहि तुष्टः पुनरागमाय ॥

प्रार्थना ।

इति पूजाविधानं समाप्तम् । अनन्तरं अष्टोत्तरप्रदक्षिणं कुर्यात् ॥

Colyphon :

— — —

65

Sl. No : 14023 अश्वत्थनारायणव्रतम् Ms. No. P. 8165/25

Beginning :

जन्मकर्मनिवारणार्थं स्वर्गादिफलभोगसमवाप्त्यर्थं अनुष्ठितार्थं अनेक-जन्मसहस्रपुण्यफलावाप्त्यर्थं अमावास्यासोमवासरे अश्वत्थनाराय पूजां करिष्ये ।

पूर्वद्वारे– भद्राय पार्वतीप्रियाय विष्णवे अग्ने श्रीपरमेश्वराय

End :

नमोऽस्तु विष्णवे तुभ्यं नमस्ते महदं फलम् ।

पुनरर्घ्यं प्रदास्यामि नमस्ते विष्णुवल्लभ ॥

द्वादशार्घ्यं– त्रिलोकनाथ देवेशोते ।

गोभूमिफल उपायनदानम् ।

अष्टोत्तरशत प्रदक्षिणम् ।

अश्वत्थस्तोत्रेण पुरुषसूक्तेन च इति ॥

Colophon :

— — —

66

Sl. No: 14025 अश्वत्थनारायणव्रतम् **Ms. No: P. 8769/1**

Beginning:

एवंगुणविशेषणविशिष्टायां शुभतिथौ मम समस्तपापक्षयद्वारा आयुष्मत्स्वरूप सुगुणानेक (?) आयुरारोग्यैश्वर्यचिरकालसुवासिनीत्वसिद्ध्यर्थं ...... अश्वत्थ नारायणदेवताप्रीत्यर्थं भविष्योत्तरपुराणोक्तप्रकारेण... अश्वत्थपूजां करिष्ये।

End:

कृत्वा व्रतमिदं नारी चिरकालं सुवासिनी।
पतिं प्राप्य सुखं तेन लभते नात्र संशयः॥
या नारी कुरुते भक्त्या व्रतमिष्टार्थसिद्धिदम्।
सा प्राप्नोति मनोऽभीष्टं ध्रुवमेतन्न संशयः॥

Colophon:

इति पूजाविधानं सम्पूर्णम्॥

67

Sl. No: 14029 अश्वत्थप्रतिष्ठाकल्पः **Ms. No P: 2914/81**

Beginning:

अश्वत्थप्रतिष्ठाविधिं व्याख्यास्यामः॥

उदगयने आपूर्यमाणपक्षे पुण्यनक्षत्रे इदं विष्णुर्विचक्रमेति मन्त्रेण अश्वत्थ समिद्भिः पायसेनाष्टोत्तरशतं जुहुयात्सुवर्णादियुक्तान् पूर्णकलशान्—

End:

प्रागादिदिक्षु संस्थाप्य—

त्रिशघोरनवकार्थं (?) काञ्चनेन वितानेन रुद्रन्यासमाश्रितः। ब्रह्मलोक मवाप्नोति ब्रह्मलोकं गमिष्यति। श्रीवीरपुत्रस्मरणात् सर्वकामार्थसिद्धिदः मर्त्यो वृद्धिमवाप्नोति विमलायमिदं जगत्॥(?)

68

Sl. No. 14039 अश्वत्थप्रतिष्ठाकल्पः Ms. No C. 210/1

Beginning:

अश्वत्थप्रतिष्ठाविधिं व्याख्यास्यामः ॥
उदगयन आपूर्य (?) आपूर्यमाणपक्षे पुण्ये नक्षत्रे इदं विष्णुरिति मन्त्रेण ब्राह्मणैः पायसेन आज्येन अष्टोत्तरशतं जुहुयात् ।

End:

आवाहनादि स्नानपर्यन्तं कृत्वा, वस्त्रयुग्मेन संवेष्ट्य गन्धपुष्पनैवेद्यादीनि दत्वा विष्णोर्नुकमिति सूक्तेन प्रदक्षिणीकृत्य अनुज्ञां गृहीत्वा दक्षिणां दत्वा गृहं प्रविशेत् ।

कृत्वाऽश्वत्थप्रतिष्ठां यो विधिनानेन मानवः ।
स याति वैष्णवं लोकं अश्वत्थदलसंख्यया ॥

Colophon

इति अश्वत्थप्रतिष्ठाविधिः ॥

69

Sl No. 14040 अश्वत्थप्रदक्षिणव्रतम् Ms. No: P. 2268/25

Beginning:

आग्नेय्याभिमुखं देवं सुखतः कामरूपिणम् ।
इष्टकाम्यार्थसिद्ध्यर्थं पुत्रपौत्रप्रवर्धनम् ॥

\+ + + + + + + +

प्राणानायम्य, संकल्प्य– सोमवारयुतामायां अश्वत्थप्रदक्षिणं करिष्ये– अनन्तरं विष्णुपूजां करिष्ये–

End:

अश्वत्थविष्णुरूपेण अभीष्टार्थप्रदायक ।
अनेन वस्त्रदानेन यथोक्तफलदो भव ॥

यथाशक्ति ब्राह्मणान् भोजयेत् । तत्सत् ब्रह्मार्पणं कुर्यात् ॥

Colophon :

— — —

70

Sl. No : 14042 अश्वत्थप्रदक्षिणव्रतम् Ms. No : P. 7401/136

Beginning

भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
स्त्रीणां पुत्रविहीनानां नराणां विविधापदाम् ॥
केनोपायेन मे ब्रूहि सुखसिद्धिः कथं भवेत् ।
\+ + + + + + + +

विष्णुरुवाच—

अश्वत्थतरुरूपेण सम्भवामि च भूतले ।
तस्मात्सर्वप्रयत्नेन कुरुध्वं तरुसेवनम् ॥

End

यं यं कामयते कामं तत्तदाप्नोत्यसंशयः ।
इहैव विपुलान् भोगान् विष्णुसायुज्यमाप्नुयात् ॥

Colophon :

इत्यध्यात्मसारे अथर्वशाखायां सर्वोत्पातशान्तिकराश्वत्थकल्पं संपूर्णम् ॥

71

Sl. No : 14033 अश्वत्थप्रदक्षिणव्रतम् Ms. No. P. 10297/3

Beginning :

पितामहपुराणोक्तं कुर्यादश्वत्थसेवनम् ।
पापोपन्नातमर्त्यानां इति (?) लोकहिताय च ॥

प्रारब्धा कथं पूर्वं को वाऽत्र विधिरीरितः ।
ऋत्विजो....माः को वा यजमानाश्च के पुनः ॥
\+ + + + + + + +
एवं संशोध्य वृक्षेन्द्रं स्वयं पूर्वमुपोष्य च ।
आचार्यं वरयेत्पूर्वं शान्तं दान्तं कुटुम्बिनम् ॥

End:

अनेन विधिना यस्तु तरुं प्रार्थयते नरः ।
सर्वान् कामानवाप्नोति सर्वयज्ञफलं लभेत् ॥
त्रिसप्तकं मण्डलं वा कार्यसिध्यन्तमेव वा ।
कृत्वा प्रदक्षिणं विद्वान् सर्वान् कामानवाप्नुयात् ॥

Colophon:

इति ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे अश्वत्थप्रदक्षिणविधिकल्पे कर्मविपाके सप्तत्रिंशोऽध्यायः ॥

72

Sl. No. 14044 **अश्वत्थप्रदक्षिणव्रतम्** Ms. No. P. 545/6

Beginning:

नारदीयपुराणे–
अश्वत्थप्रदक्षिणपूजाविधिः—
मन्दवारे द्विजो मौनी प्रातरुत्थाय भक्तिमान् ।
पुण्यतीर्थे शुचिः स्नात्वा प्राप्य अश्वत्थं हरिप्रियम् ॥
पौराणेन विधानेन सम्पूज्य प्रणवेन वा ।
कुर्यात्सर्वोपचारोऽथ शतकृत्वः समाहितः ॥

End :

मुच्यतेऽहरहर्दोषैः शुचिरद्द्रुमसेवनात् ।
दुःस्वप्नदुर्ग्रहक्लान्तिमहाद्भुतभयेषु च ॥
नृणां किमन्यच्छरणं विना विप्र द्रुमाश्रयात् ।
एवमश्वत्थवृक्षोऽयं न गण्यस्तरुषु प्रभुः ॥
इत्यष्टादशाध्याये × × × ।

Colophon

— — —

73

Sl. No : 14055 **अश्वत्थविवाहकल्पः** **Ms. No : P. 4180/74**

Beginning :

स्थापनाद्द्वादशे वर्षे अश्वत्थस्य विवाहयेत् ।
तन्मासे तद्दिने वाऽपि तन्मुहूर्ते तदाचरेत् ॥
अश्वत्थस्य विवाहं च कुर्यादर्चां यथाविधि ।
पूर्ववद्वेदिकादीनि निर्माय च तथा पृथक् ॥

End :

ये चैव धर्मरहिता ये च ब्राह्मणनिन्दकाः ।
ये चैवायुष्यमस्माकं येचैव परिहिंसकाः ॥
ये चैवागमसक्तोऽपि तेषां देहि च सद्गतिम् । इति
प्रार्थ्य चैवं तरुं नत्वा ब्राह्मणान् भोजयेत्क्रमात् ।
आचार्याय च तद्वृक्षं सोपस्कर निवेदयेत् ॥
अन्येभ्यो दक्षिणां दत्वा बन्धुभिः सह भोजयेत् ॥

Colophon :

इति रुद्रयामिले अश्वत्थविवाहविधिः ॥

74

Sl. No : 14060 अश्वत्थविवाहकल्पः **Ms. No. P. 4710/2**

Beginning :

अश्वत्थप्रतिष्ठा-उपनयनादि व्याख्यास्यामः ॥

शौनकः —

शौनकोऽहं प्रवक्ष्यामि अश्वत्थस्योप × ।
× × × × द्वादशैकादशेऽपि वा ।
उक्तकालः प्रशस्त × × पनायनम् ।
तत्रोत्तराय × × × × को रते ।

End :

आ × रचक्षुषात् हुत्वा ओं नमो भगवते वासुदेवायेति स्वा × हुतिर्हुत्वा होमद्रव्याणि चरुतिलव्रीहिभिर्यवद्विक्षीरला × श्च होम × × × × प्र × × × रसहस्रमष्टोत्तरशतमष्टाविंशतिर्वा कल्पोक्तमन्त्रैर्जुहुयात् ॥

Colophon :

इति अश्वत्थविवाहविधिः ॥

75

Sl. No. 14063 अश्वत्थोपनयनकल्पः **Ms. No. P. 5579/3**

Beginning :

ऋषयो देवतास्सर्वे नैमिशारण्यवासिनः ।
यस्यानुष्ठानमात्रेण सर्ववर्णाः श्रुताः खलु ॥
तं धर्मं वद कृष्ण त्वं सर्वपापहरं परम ।
सर्वकामप्रदं चैव सर्वोपद्रवनाशनम् ॥

End :

एवं श्रुत्वा धर्मराजः कृतवां नैव सेवयेत् । (?)
विवाहं पिप्पलस्यापि कृत्वा मोक्षं जगाम च ॥
तत्सूक्तं केन भक्त्या च सर्वपापप्रणाशनम् ।
करिष्यामो वयं चापीत्युक्त्वा कृत्वा दिवं ययुः ॥

Colophon

इति भविष्योत्तरपुराणे अश्वत्थविवाहः समाप्तः ॥

76

Sl. No: 14068 अश्वत्थविवाहकल्पः Ms. No: C. 7899/35

Beginning :

ऋषय ऊचुः—
ऋषयो देवताः सर्वा नैमिषारण्यवासिनः ।
व्रतधुर्यं पुराणेषु सर्वधर्मादनुत्तमम् ॥
अस्यानुष्ठानमात्रेण सर्वधर्माः श्रुताः खलु ॥

End :

एवं श्रुत्वा धर्मराजः कृतवान् नैमिषे वने ।
विवाहं पिप्पलस्याऽपि ततो मोक्षं जगाम सः ॥

ऋषय ऊचुः —
नाथ त्वं देव भवता सर्वपापप्रणाशनम् ।
करिष्यामो वयं चैनत् इत्युक्त्वा ते दिवं ययुः ॥

Colophon :

इति श्री भविष्योत्तरपुराणे सर्वदेवतासम्मते श्रीकृष्णप्रोक्ते अश्वत्थविवाहकल्पः सम्पूर्णः ॥

77

Sl. No : 14072 अश्वत्थविवाहकल्पः Ms. No : P. 9167/7

Beginning :

शौनकोऽहं प्रवक्ष्यामि अश्वत्थस्य विवाहिकम् ।
स्थापनादष्टमे वर्षे द्वादशैकादशेऽपि वा ।
अष्टादशे तु कालाः स्युः प्रशस्ते च शुभे दिने ।
मार्गशीर्षे च माघे च वैशाखे ज्येष्ठ एव च ॥

End :

ब्राह्मणान् भोजयित्वा तु स्वयं भुञ्जीत बन्धुभिः ।
अश्वमेधशतं चैव वाजपेयशतानि च ॥
गोप्रदाने सहस्रं तु कलां नार्हति षोडशीम् ।
भुक्त्वा च निखिलान् भोगान् अन्ते सायुज्यमाप्नुयात् ॥

Colophon :

इति शौनकीये अश्वत्थविवाहः संपूर्णः ॥

78

Sl. No : 14076 अश्वत्थविवाहकल्पः Ms. No : C. 210/3

Beginning :

ऋषयो देवताः सर्वे नैमिषारण्यवासिनः ।
पप्रच्छुः कृष्णमासाद्य सर्वधर्ममनुत्तमम् ॥
यस्यानुष्ठानमात्रेण सर्वधर्ममनुत्तमम् ।
तं धर्मं वद कृष्ण त्वं सर्वपापहरं शुभम् ॥
श्रीकृष्णः –
अश्वत्थस्य महाराज विवाहमकरोच्च सः ॥

End :

एवं श्रुत्वा धर्मराजः कृतवान् नैमिषे वने ।
विवाहं पिप्पलस्यापि ततो मोक्षं जगाम सः ॥ ऋषय ऊचुः–

साधूक्तं देव भवता सर्वपापप्रणाशनम् ।
करिष्यामो वयं चैतत् इत्युक्त्वा ते दिवं ययुः ॥

Colophon :

इति विष्णुधर्मोत्तरपुराणे कृष्णयुधिष्ठिरसंवादे अश्वत्थविवाहः ॥

79

Sl. No : 14077 **अश्वत्थविवाहकल्पः** **Ms. No. C. 251**

Beginning :

अथाश्वत्थविवाहः —
ऋषयो देवतास्सर्वे नैमिषारण्यवासिनः ।
परिपृच्छुः कूर्मरूपं सर्वधर्ममनुत्तमम् ॥
यस्यानुध्यानमात्रेण सर्वधर्मः कृतो भवेत् ।
तं धर्मं वद कृष्ण त्वं सर्वपापहरं शुभम् ॥

End :

सर्वतीर्थाभिगमनाद्यत्फलं लभते नरः ।
तत्फलं समवाप्नोति पिप्पलस्य विवाहतः ॥
कोटिविप्रविवाहे च यत्फलं लभते भुवि ।
तत्फलं कोटिगुणितं विष्णुलोकं च शाश्वतम् ॥

Colyphon :

इति अश्वत्थविवाहविधिः ॥

80

Sl. No : 14081 **अश्वत्थोपनयनकल्पः** **Ms. No : P. 1723/26**

Beginning :

अश्वत्थोपनयनविधिरुच्यते —
शौनकोऽहं प्रवक्ष्यामि अश्वत्थस्योपनायनम् ।
स्थापनादष्टमे वर्षे द्वादशैकादशेऽपि वा ॥
उक्तकालश्च यः सद्भिः कुर्यात्तस्योपनायनम् ।
तत्रोत्तरायणे श्रेष्ठं गुरुशुक्रप्रकाशने ॥

End :

ब्राह्मणान् भोजयेदष्टौ भुञ्जीयाद्बन्धुभिः सह ।
एवं यः कुरुते तस्य वर्धमाने धनायुषी ।
कुलकोटिं समुद्धृत्य ब्रह्मसायुज्यमाप्नुयात् ॥

Colophon :

इति शौनकीये अश्वत्थोपनयनविधिः समाप्तः ॥

81

Sl. No : 14085 अश्वत्थोपनयनकल्पः Ms. No : P. 2579/52

Beginning :

शौनकोऽहं प्रवक्ष्यामि अश्वत्थस्योपनायनम् ।
स्थापनादष्टमे वर्षे दशमे द्वादशेऽपि वा ॥
उक्ताः कालाः प्रशस्ताः स्युः कुर्यात्तत्रोपनायनम् ॥

End :

कोटिजन्मप्रतिष्ठानां अधिकं फलमश्नुते ।
कुलकोटिं समुद्धृत्य ब्रह्मसायुज्यमाप्नुयात् ॥
अश्वत्थोपनयनं यः करोति नरोत्तमः ॥

Colophon :

इति शौनकोक्ताश्वत्थोपनयनविधानं संपूर्णम् ॥

82

Sl. No : 14095 अश्वत्थोपनयनकल्पः Ms. No. P. 5579/2

Beginning :

अश्वत्थोपनयनम् ।
शौनकोऽहं प्रवक्ष्यामि अश्वत्थस्योपनायनम् ।
स्थापनादष्टमे वर्षे द्वादशैकादशेऽपि वा ॥
उक्तकालव्यतीतस्य न कुर्याच्चोपनायनम् ।
तत्रोत्तरायणे श्रेष्ठं गुरुशुक्रप्रकाशिते ॥

End :

अन्येषामपि विप्राणां स्वशक्त्या पूजयेत्ततः ।
ब्रह्मणे दक्षिणां दद्यात् यथावित्तानुसारतः ।
ब्राह्मणान् भोजयेत्पश्चाद्भुञ्जीयाद्बन्धुभिः सह ॥
एवं यः कुरुते तस्य वर्धते परमायुषः ।
कुलकोटिं समुद्धृत्य ब्रह्मसायुज्यमाप्नुयात ॥

Colophon :

इति शौनकीये अश्वत्थोपनयनं सम्पूर्णम् ॥

83

Sl. No : 14112 अश्वत्थोपनयनकल्पः Ms. No : P. 10070/5

Beginning :

शौनकोऽहं प्रवक्ष्यामि अश्वत्थस्योपनायनम् ।
स्थापनाद्दशमे वर्षे द्वादशेऽष्टादशेऽपि वा ॥
उक्तकालास्त्रयः शस्ताः कुर्यात्तस्योपनायनम् ।
तत्रोत्तरायणं श्रेष्ठं गुरुशुक्रे प्रकाशिते ॥

End :

ब्रह्मणे दक्षिणां दद्यात् होमं वित्तानुसारतः ।
ब्राह्मणान् भोजयित्वाऽथौ भुञ्जीयाद्बन्धुभिः सह ॥
एवं यः कुरुते तस्य वर्धते कमलाशुपी । (?)
कुलकोटिं समुद्धृत्य ब्रह्मसायुज्यमाप्नुयात् ॥

Colophon

दक्षिणामूर्तिमीशानं ध्यायेद्देवं सदाशिवम् ॥

End:

शैवं पदमनुप्राप्या रमन्ते प्रमुदान्विताः
तदा प्रभृति लोकेऽस्मिन् तस्यैवमुदितं व्रतम् ॥
राजानो यदि कुर्वन्ति विशेषा बहवो गताः ।
अनेकयुगपर्यन्तं शिवलोके महीयते ॥

Colophon:

इति श्री स्कन्दपुराणे, भविष्योत्तरपुराणे (?) कृष्णयुधिष्ठिरसंवादे केदारेश्वर व्रतकल्पं सम्पूर्णम् ॥

185

Sl. No: 14444 केदारेश्वरव्रतोद्यापनम् **Ms. No. P. 2370/7**

Beginning:

त्रयोदश्यां दन्तधावनपूर्वकः स्नानादि नित्यकर्माणि शिवपूजां च कृत्वा शिवप्रसादं च लब्ध्वा हारेण (?) भूत्वा शिवपुराणानि श्रुत्वा अहश्शेषं नयेत् । ततः परेऽहनि .....

End:

घृतपायससयुक्तेन घृतान्नेन तोषयित्वा तेषां ताम्बूलानि दत्त्वा मन्त्राक्षता संगृह्य तेषामनुज्ञां प्राप्य आगन्तुकैः अन्नादिभिः इष्टमित्रबन्धुभिस्सह पारणां कुर्यात् ।

Colophon:

— — —

186

Sl. No: 14445 केदारेश्वरव्रतम् Ms. No: P. 5648/19

Begining:

उद्यापनं ततो वक्ष्ये केदार व्रतपूर्तये ।
आदौ मध्ये तथाचान्ते कुर्यादुद्यापनं चरेत् ॥
शृणु भाद्रपदे शुक्लदशम्यां व्रतकं नरः ।
पूर्ववद्व्रतमारभ्य तद्रात्रौ विधिपूर्वकम् ॥
सुवर्णेन प्रमाणेन कृत्वा केदारनायकम् ।
+ + + + + + + +

End:

ब्राह्मणान् भोजयेत्पश्चात्स्वयं भुञ्जीत बन्धुभिः ।
इदं यः कुरुते भक्त्या पापेभ्यो मुच्यते नरः ॥
सर्व पापविनिर्मुक्तः सर्वकामानवाप्नुयात् ।

Colophon:

इति श्री भविष्योत्तरपुराणे केदारेश्वरव्रतोद्यापनविधिः समाप्तः ।

187

Sl. No: 14446 केदारेश्वरव्रतोद्यापनम् Ms. No: P. 6496/36

Begining:

ब्रह्मोवाच—

उद्यापनं विना यस्मात् व्रतचर्याथ निष्फला ।

उद्यापनप्रकारोऽयं सङ्क्षेपात् कथ्यते मया ॥
पक्ष आश्वयुजे कृष्णे चतुर्दश्यां समाहृतम् ॥

End :

इह लोके चिरं पश्चात् शिवलोके महीयते ।
अपूर्णे तु त्रयोदश्यां पूर्णे कुर्याच्छुभे दिने ।

Colophon :

इति श्री ब्रह्माण्डपुराणे केदारेश्वरव्रतोद्यापनं संपूर्णम् ॥

188

Sl. No : 14448 केरम्बलीव्रतम् Ms. No : P. 5865/59

Begining :

सूतः —

कृतं पुरातु × × × शच्या च अरुन्धत्या तु भामिनी ।
अकुमन्त्र्या च वैदेह्या कृतं भामिनि पूर्वतः । (!)
तमप्येकं कुरुष्वार्थे अष्टसंख्या तु वत्सरात् ।
अतः परं तु निर्वत्या उद्यापनविधानतः ॥

End :

शृणोति च मुदा विप्रो मुच्यते सर्वकिल्बिषात् ।
तेषां च न भयं प्रोक्तं पन्नगेभ्यो न संशयः ॥
पन्नगेन्द्र नमस्तेऽस्तु लक्ष्मीकान्तस्य धारक ।
इमां मेया कृतां पूजां गृहीत्वा वरदो भव ।

Colophon :

इति श्री गरुडपुराणे उमामहेश्वरसंवादे केरेम्बलीव्रतं संपूर्णम् ॥

189

Sl. No. 14450 कोकिलाव्रतम् Ms. No : P. 8209/1

Beginning :

आषाढपौर्णिमायां तु कोकिलाव्रतम् ।
आषाढस्याधिमासत्वेऽन्ये कानुष्ठितं तु निः श्राणं तु तद्विधिः । (!)

आचम्य प्राणानायम्य मासपक्षतिथीः ज्ञात्वा ममेह जन्मनि सर्वपापक्षयार्थं
..........कोकिलाव्रतं करिष्ये इति सङ्कल्प्य ।

End :

देवि चैत्रमघोत्पन्ने विन्ध्यपर्वतवासिनि ।
अर्चिता पूजितासि त्वं कोकिले हरवल्लभे ।
कोकिले कलकण्ठाक्षि माधवे मधुरस्वरे ।
वसन्ते वाससे देवि गच्छ त्वं नन्दनं वनम् ॥

Colophon :

इति कोकीलाव्रतपूजा ॥

190

Sl. No : 14451 कोटिपूजाव्रतम् Ms No : C 3032/1

Beginning :

कोटिपूजां प्रवक्ष्यामि विष्णोरमिततेजसः ।
दीपानां कोटिपूजां च कार्तिके तु समाचरेत् ॥
यद्यद्दौ भवेत्पुष्पं सम्भवेच्च तदर्पयेत् ।
एकैकं मूलमन्त्रेण विष्णुसूक्तेन वा पुनः ॥

End :

गोघृतेन समायुक्तं सर्वकामार्थसिद्धये ।
प्रदक्षिणनमस्कारान् कृत्वा मूर्ध्निकृताञ्जलिः ।
क्षमापयेत्ततो देवं ब्राह्मणान् भोजयेच्छतान् ।
एवं यः कुरुते पूजां तस्य विष्णुः प्रसीदति ॥

Colophon :

इति श्री स्कान्दपुराणे कोटिपूजाविधिः ॥

191

Sl. No : 14453 क्षीरवर्धनव्रतम् Ms No P 5865,39

Beginning :

श्री सौरपुराणे क्षीरवर्धनविधिः उच्यते ।
माघमासे शुक्लपक्षे सप्तम्यां भानुवारे ।

स्त्रियो वा पुरुषा वाऽपि स्नात्वा धौताम्बरान्विताः।

नित्यकर्माणि निर्वर्त्य देशकालादीन् संकीर्त्य चतुर्विधपुरुषार्थसिध्यर्थे एकैकार्थं यथाकामं क्षीरवर्धनव्रतं करिष्ये।

End :

घृतशर्करसंयुक्तं प्रीतो भव दिवाकर।

दानमन्त्रः

त्वया दत्तमिदं पात्रं भाण्डं ब्रह्माण्डमुत्तमम्।

सघृतं गृह्णामि प्रीतता सर्वपात्रमिदं रविः॥

भाण्डदानमन्त्रः। नमः सवित्रेति नमस्कुर्यात्॥

Colophon :

इति श्री पद्मपुराणे क्षीरवर्धनविधिः॥

192

Sl. No : 14455 — क्षीरवर्धनव्रतम् — Ms. No : P. 6496/42

Begining :

पुराणोक्तक्षीरवर्धनव्रतकल्पोक्तसंपूर्णसमग्रफलवाप्त्यर्थं समस्तपापक्षयार्थं पुत्रपौत्राभिवृद्ध्यर्थं तत्प्रधान—

End :

कृत्वा यत्फलमाप्नोति तत्फलं समवाप्यते।

इह लोके सुखी भूत्वा प्रेत्य स्वर्गे महीयते॥

एवं कुर्याद्व्रती सम्यक् नरो वा पुरुषो भवेत्॥

Colophon :

इति श्री पुराणसारोक्तक्षीरवर्धनं संपूर्णम्॥

193

Sl. No. 14456 — क्षीरवर्धनव्रतम् — Ms. No : P. 8165/44

Beginning :

यन्त्राधिष्ठितदेवेश क्षीरपान दिवाकर।

आगच्छ परमं धाम पुनरागमनाय च॥

एवंगुणविशेषणविशिष्टायां तिथौ मम चिन्तितमनोरथफलावाप्त्यर्थं दान-
फलप्राप्त्यर्थं कल्पोक्तप्रकारेण श्रीसूर्यनारायणप्रीत्यर्थं क्षीरवर्धनं करिष्ये ॥
शुचौ देशे द्वादशदलपद्मं निर्माय—

End :

स्वर्णं पवित्रममलं स्वर्णं पापप्रणाशनम् ।
स्वर्णं हि शङ्करं यस्मात् अतश्शान्तिं प्रयच्छ मे ॥

गोदानमन्त्रः—

यज्ञसाधनभूतानां विश्वास्याघप्रणाशनम् ।
सर्वकामप्रदा धेनुः अतः शान्तिं प्रयच्छ मे ॥

प्रतिमादानमन्त्रः—

दिवाकरनमस्तुभ्यं सर्वपापप्रणाशनम् ।
प्रतिमां ते प्रदास्यामि ममाभीष्टप्रदो भव ॥

Colophon :

इति क्षीरविवर्धनं सम्पूर्णम् ।

194

Sl. No. 14460 क्षीरवर्धनव्रतोद्यापनम् **Ms No. P. 9067/47**

Beginning ;

कदाचिद्ब्रह्मलोकस्थं पद्मयोनिं पितामहम् ।
नारदः प्राह धर्मात्मा प्रणिपत्य जगद्गुरुम् ॥

नारदः ।

भो ब्रह्मन् वद देवेश कथं क्षीरविवर्धनम् ।
का तिथिः कस्य मासे तु तद्विधं वद मे प्रभो ॥

End :

पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ।
मोक्षार्थी मोक्षमाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति श्रीआदित्यपुराणे ब्रह्मनारद संवादे क्षीरवर्धनं सम्पूर्णम् ।

195

Sl. No: 14461 गङ्गाकृष्णवेणीव्रतम् Ms. No: C. 4292/3

Beginning :

विष्णुपुराणे श्री गजाननः—

स्वभावादतिचाराद्वा गुरौ कन्यागते सति ।
जाह्नवी कृष्णवेणीं हि समायाति न संशयः ॥
आदावन्ते च मध्ये च उपवासं तु कारयेत् ।
वपनं तीर्थश्राद्धं च दानं वै विष्णुपूजनम् ॥

\+ + + + + + + +

पुनः स्वभावतो विप्राः यदा याति हि तं गुरुः ॥
तत्रापि कार्यं विप्रेन्द्र उपवासादिकं तथा ।
अद्य स्थित्वा निराहारः श्वो भोक्ष्येऽहं जनार्दन ।
तेन सद्गतिमायान्तु पितरो निरयादपि ॥

End :

पाद्मे—

भक्त्या स्नानादिकं कार्यं कृष्णायां कन्यगे गुरौ ।
भागीरथ्यादितीर्थेषु यज्ञदानजपादिषु ॥
तत्फलं कोटिगुणितं कृष्णायां कन्यगे गुरौ ॥

Colophon :

— — —

196

Sl. No; 14464 गजगौरीव्रतम् Ms. No: P. 5293/37

Beginning :

हरिः ओम् । पूर्वोक्तैवं गुणविशेषणविशिष्टायां शुभतिथौ गजगौरीपूजां करिष्ये —

गजकुम्भस्थितां ध्यायेत् वितरन्तीं बहून् वरान् ।

गजगौरीध्यानम् —

आवाहयामि देवि त्वां आहूतां देवदानवैः ।

End:

प्रयच्छन् सर्वकार्याणि प्रियाङ्के सर्वदा स्थिते ।

पुत्रं देहि महादेवि यशो देहि निरन्तरम् ॥

सौभाग्यं कुरु मे नित्यं गजगौरि नमोऽस्तु ते ॥

इति मनुप्रार्थनम् । यस्य स्मृत्या च ॥

Colophon:

इति पूजाविधानं सम्पूर्णम् ॥

197

SI. No; 14465 गजगौरीव्रतम् Ms. No: P. 5984/24

त्रिलोकेशीं महादेवीं सर्वाभरणभूषिताम् ।

चतुर्भुजां पीतवस्त्राम् गजारूढां महेश्वरीम् ॥

ध्यानम् ॥

उमायै नमः आवाहनम् ॥ गजगौर्यै नमः आसनम् ॥

End:

राज्यान्वितं शुभमनुत्तममायुर्भोगं

इच्छन्ति ये तदनु मोक्षसुखं च मर्त्याः ॥

ते शङ्करप्रणयिनीचरगन्धहस्ती

च्छतोपरिस्थितिवतीं परिपूजयन्ति ॥ (?)

Colophon

इति श्री स्कन्दपुराणे गौरीकाण्डे गजगौरीव्रतं समाप्तम् ॥

198

SI. No: 14472 गजगौरीव्रतम् Ms. No. P. 8383/1

Beginning:

पूर्वोक्तैवंगुणेत्यादितिथौ मम चिरकालसुमङ्गलीत्वसिद्ध्यर्थं गजगौरीदेवता

...दिव्यगजगौरीदेवताप्रीत्यर्थं + + ध्यानावाहनादिकल्पोक्तपूजां करिष्ये ॥

End :

एतदालोक्य गान्धारी व्रतं तत्याज लज्जिता ।
सप्तव्रतपरित्यागाच्च्सुतास्तु लयं गता: ।।
चकार विधिवत्कुन्ती व्रतं षोडशवार्षिकम् ।
तस्माच्चद्व्रतमाहत्म्यत्रपया लोकविश्रुता: ।
अरन्निरूपमहात्म्याल्लक्ष्मीवाज्यमुपागत: ।
अव्याहतं सुखमनुत्तममाशु भोक्तु-
मिच्छन्ति ये तदमृताक्षसुखं च मर्त्या: ।
ते शङ्करप्रणयिनीनवगन्धहस्ति
कुम्भोपरि स्थितवतीं परिपूजयन्ति ।।

Colophon :

इति श्री गौरीकाण्डे गजगौरीव्रतमहात्म्यं सम्पूर्णम् ।।

199

Sl. No : 14479 गजगौरीव्रतम् Ms No C 3032/43

Beginning .

मम सर्वाभीष्टमनोरथसिद्ध्यर्थं गजगौरीपूजां करिष्ये ।
हेमाद्रितनयां देवीं शङ्करप्रियतां शुभाम् ।
गिरिजां विश्वजननीं गौरीं ध्यायेत् सदा शुभम् ।।
इति ध्यानम्—
आगच्छ गिरिशे शम्भुशान्तगौरिगणाधिपै : ।

End :

सर्वमङ्गलमाङ्गल्ये वरदा भव सर्वदा ।
व्रताङ्गै: सर्वदेवेशि सम्पूर्णफलदायिनि ।।
भक्ताभीष्टप्रदे देवि + + × ×
इदमर्घ्यं मया दत्तं व्रतसंपूर्णकारणात् ।
संपूर्णफलमाप्नोति षोडशार्घ्यैर्नमोऽस्तु ते ।।

Colophon :

इति गजगौरीपूजाविधानं समाप्तम् ।।

200

Sl. No; 14480 **गजगौरीव्रतम्** **Ms. No: C. 3621/1**

Beginning :

हस्तिगौरीपूजाप्रारम्भः। सुमुखश्चेत्यादि – शुभतिथौ मम इह जन्मनि जन्मान्तरे च अखण्डितसौभाग्यधनधान्यप्राप्तये पुत्रपौत्राद्यभिवृद्ध्यर्थं राज्यकामनया हस्तिगौरीव्रताङ्गत्वेन ध्यानावाहनादिषोडशोपचारपूजां करिष्ये।

End :

आसन्निरूपमश्लाघ्यं लक्ष्मीराज्यसमन्वितम्।
राज्यान्वितं सुखमनुत्तमास्तुमेरक्‌- (?)
सिच्छन्ति ये तदनुभोक्ष्यसुखं च मर्त्याः।
ते शङ्करप्रणयिनीवरगन्धहस्ती-
कुम्भोपरि स्थितवतीं परिपूजयन्ति ॥

Colophon :

इति श्री स्कन्दपुराणे गजगौरीपूजाकथा समाप्ता ॥

201

Sl. No: 14548 **गजगौरीव्रतोद्यापनम्** **Ms. No: P. 1418/21**

Beginning :

सूत उवाच —
ग्वेर्हस्त + शंवरे समये शुद्धया मुदा।
कृत्वा दन्तावलं भद्रं सर्वलक्षणसंयुतम् ॥
तत्र संस्थापयामास गौरीप्रतिकृतिं शुभाम्।
देवीं तत्र समभ्यर्च्य वस्त्रालङ्कारभूषणैः ॥

End :

व्रती तत्र कथां श्रुत्वा ब्राह्मणान् भोजयेत्ततः।
एवं कृत्वा व्रियं कुन्ती सुजातां लभते श्रियम् ॥
इह लोके सुखी भूत्वा गौरीसायुज्यमाप्नुयात् ॥

Colophon :

श्री स्कान्दपुराणे गौरीसंवादे गजगौरीव्रतोद्यापनं समाप्तम् ॥

202

No : 14483 गरुडपञ्चमीव्रतम् Ms. No : P. 277/5

Beginning :

...............नागेन्द्रस्य पूजनम् ।
यस्मिन् सम्पूजिते गौरि विष्णुः सम्पूजितो भवेत् ।
इन्द्रादिलोकपालाश्च प्रीताः स्युर्नात्र संशयः ॥
गौर्युवाच—
भगवन्तं नमस्कृत्य गौरीं चैव सदाशिवम् ॥

End :

पन्नगेन्द्र नमस्तेऽस्तु वल्मीकान्तर्निवासक ।
इमां मया कृतां पूजां गृहाण वरदो भव ॥

Colophon :

इति गरुडपुराणे गरुडपञ्चमीव्रतकल्पः संपूर्णः ॥

203

Sl. No ; 14484 गरुडपञ्चमीव्रतम् Ms. No : P. 1720/6

Beginning :

पूर्वोच्चरित एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ मम दीर्घसौमङ्गल्या- भिवृद्ध्यर्थं .... समस्तपीडापरिहारार्थं नागेन्द्रदेवताप्रीत्यर्थं गरुड- पुराणोक्तप्रकारेण—

End :

नागेन्द्रः प्रतिगृह्णातु नागेन्द्रो वै ददाति च ।
नागेन्द्रस्तारकोभाभ्यां नागेन्द्राय नमो नमः ॥

Colophon :

इति अर्चनाविधिः ॥

204

Sl. No. 14488 **गरुडपञ्चमीव्रतम्** **Ms.No. P. 4383/17**

Beginning :

श्री सूतः —

कैलासशिखरे रम्ये सिद्धगन्धर्वसेविते ।
वज्रवैडूर्यमाणिक्यखचिते हेमपीठके ।।
सुखोपविष्टमीशानं पार्वती परया मुदा ।
पप्रच्छ व्रतमे × × सर्वकामफलप्रदम् ।।

End :

याश्च कुर्वन्ति सततं न विषं विद्यते भुवि ।
न भ्रातृमरणं तासां सौभाग्यं चाप्नुयुस्ततः ।।
एतत् शृण्वन्ति सततं विज्ञाः पठति शीलिनः ।
यथाकामं च सौभाग्यं प्राप्नुयुः नात्र संशयः ।।

Colophon :

इति श्री स्कान्दपुराणे गरुडपञ्चमीव्रतं सम्पर्णम् ।।

205

Sl. No. 14497 **गरुडपञ्चमीव्रतम्** **Ms. No. P. 8410/6**

Beginning :

शृणु गौरि प्रवक्ष्यामि पतगेन्द्रस्य पूजनम् ।
तस्मिन् संपूजिते गौरि विष्णुः संपूजितो भवेत ।।
इन्द्रादिलोक × × × नात्र संशयः ।

गौर्युवाच —

भगवन्तं नमस्कृत्य गौर्याह च सदाशिवम् ।।

End :

शृणोति यस्सदाविप्रः मुच्यते सर्वकिल्बिषैः ।
एतेषां निर्णयं प्रोक्तं पन्नगेभ्यो न संशयः ।।

पन्नगेन्द्र नमस्तेऽस्तु वल्मीकं तस्यधारणम् ।
इमा तु मत्कृतां पूजां गृहीत्वा वरदो भव ॥

Colophon:

इति श्री गरुडपुराणे गरुडपञ्चमीव्रतकल्पः सम्पूर्णः ॥

206

Sl. No: 14498 गुरुवासरैकादशीव्रतम् **Ms No: P. 700**

Beginning:

गुरुवसारैकादशीव्रतकल्पप्रारम्भः—
कैलासशिखरारामे तटे कल्पमहीरुहः ।
विनोदेन समासीनं शिवं पप्रच्छ पार्वती ॥
पार्वत्युवाच—
देव देव महादेव सर्वज्ञ जगदीश्वर ।
रजोदोषापहृतये त्वयोक्तमतिपावनम् ॥

End:

इमां कथां यः शृणुयाच्छ्रावयेद्वा समाहितः ।
याश्च व्रतं चरन्त्येतत्ते स्युः प्रियतमा मम ॥
इति शम्भोर्वचः श्रुत्वा संहृष्टा सर्वमङ्गला ।
व्रतं तन्मुनिपत्नीभिः ख्यापयामास शङ्करी ॥

Colophon

इत्युमामहेश्वरसंवादे गुरुवारैकादशीरङ्गवल्लीव्रतकथा सम्पूर्णा ॥

207

Sl. No: 14500 गोद्वादशीव्रतम् **Ms. No: P. 2370/43**

Beginning:

पार्वत्युवाच—
सुरूपत्वं सुसौभाग्यं सौख्यमायुष्यवर्धनम् ।
धनधान्यसमृद्धिं च सुपुत्रत्वमवन्ध्यताम् ॥
पुत्रपौत्रसमृद्धिं च सत्पतिं भ्रातृवर्धवम् ॥

End:

सर्वदेवप्रिये नित्यं जगत्पूज्ये नमोऽस्तु ते ॥

प्रदक्षिणनमस्कारौ ॥

कपिले सुप्रजे भद्रे नमस्ते लोकविश्रुते ।
सुरूपत्वं सुसौभाग्यं देहि मे कुलवर्धिनि ॥

Colophon:

इति पूजाविधिः ॥

208

Sl. No : 14502 गोद्वादशीव्रतम् Ms. No : P. 2370/45

Beginning :

श्री पार्वत्युवाच—

कथितं भवता देव व्रतानामुत्तमं व्रतम् ।
तस्योद्यापनं ब्रूहि सर्वकामफलप्रदम् ॥

ईश्वर उच—

शृणु देवि प्रवक्ष्यामि व्रतस्योद्यापनक्रियाम् ॥

End :

हरिसायुज्यमाप्नोति पुनरावृत्तिवर्जितम् ।
य इदं शृणुयाद्वाऽपि भक्तियुक्तेन चेतसा ॥
पठेद्वा यो नरो देवि सर्वपापैः प्रमुच्यते ॥

Colophon :

इति श्री स्कन्दपुराणे उमामहेश्वरसंवादे गोद्वादशीव्रतोद्यापनं समाप्तम् ।

209

Sl. No : 14504 गोपद्मव्रतम् Ms. No. P. 3121/3

Beginning

श्रीसूतः—

शृणुध्वमृषयः सर्वे सर्वपापप्रणाशनम् ।
सर्वसम्पत्करं नृणां पुत्रपौत्रादिमोक्षदम् ॥

गोपद्मव्रतमाहात्म्यं तत् शृणुष्व समाहितः ।
पुरा वै द्वापरस्यान्ते वनं प्राप्ताश्च पाण्डवाः ॥

End .

एवं कृते द्रौपदीति साम्रज्यश्रियमाप्नुयात् ।
इत्यानम्य ततः कृष्णः द्वारकां प्रजगाम सः ॥
यः पठेदिदमाख्यानं शृवण्न्ति श्रद्धयाऽन्विताः ।
ते सर्वेऽपि विनिर्मुक्ताः विष्णुसायुज्यमाप्नुयुः ॥

Colophon :

इति श्रीस्कान्दपुराणे गोपद्मव्रतकल्पं संपूर्णम् ॥

210

Sl. No : 14505 गोपद्मव्रतम् **Ms. No : P. 4335/41**

Begining :

आषाढे शुक्लपक्षे तु एकादश्यामुपोषते ।
द्वादश्यां प्रातरुत्थाय नदीतीरे समुद्रगाम् ॥
स्नात्वा धौताम्बरं धृत्वा गन्धमाल्यादिभूषणैः ॥

\+ + + + + + +

गोष्ठे वाऽथ नदीतीरे गोमये लेपिते स्थले ॥
त्रयस्त्रिंशच्च पद्मानि अर्चयित्वा मनोहरम् ।

End :

पद्मसंख्यातुलस्यैर्वा तन्मध्ये कृष्णमर्चयेत् ॥
एवं कृते द्रौपदि ते सांमज्यश्रिय सक्षिते । (?)
इत्याख्याय ततः कृष्णो द्वारक्यां निजगाम सः ॥
यः पठेदिदमाख्यानं शृण्वन्ति श्रद्धयाऽन्विताः ।
स याति पापनिर्मुक्तो विष्णुलोकं निरामयम् ॥

Colophon :

इति श्रीपद्मपुराणे गोपद्मव्रतं सम्पूर्णम् ॥

211

Sl. No : 14507 **गोपद्मव्रतम्** Ms. No : P. 5762/2

Beginning :

अथ गोपद्मव्रतम् —

सूत उवाच

ब्रह्मविष्णुमहेशाना ऋषयश्च तपोधनाः ।
दिक्पाला द्वादशादित्याः वसवः काल एव च ॥
चित्रगुप्ताश्च गन्धर्वाः कृष्णव्यासौ च नारदः ।
अन्य एव महात्मानः पुराणस्मृतिपारगाः ॥

End :

समाप्य गौः प्रदातव्या दद्याद्ब्राह्मणमेव तत् ।
तस्यामेव च राज्यां तु प्रहरेषु चतुर्ष्वपि ॥
कारयित्वा व्रतं तत्र कल्पोक्तविधिना ततः ।
पुनरेव सभा तूर्ष्णीं मासि मासि यथापुरा ।
ततः प्रभातवेलायाम् × × × ॥

Colophon :

— — —

212

Sl. No : 14518 **गोपद्मव्रतम्** Ms. No P. 8410/24

Beginning :

भास्वत्किरीटवलयं शङ्खचक्रगदाधरम् ।
लक्ष्मीममेतं गोविन्दं नारायणमुपास्महे ॥
विष्णुं भास्वत्किरीटांगदवलयगलत्कल्पहारोदराङ्घ्रिम्
श्रोणीभूपांसवक्षोमणिमकुटगदाकुण्डलैर्मण्डिताङ्गम् ॥
× × × × × दिनकरसदृशं पद्मसंस्थं नमामि ॥ (?)

End :

एवं यः कुरुते भक्त्या व्रतानामुत्तमं व्रतम ।
इह भुक्त्वा तु विपुलान् भोगानन्ते हरिं व्रजेत् ॥
ये पठन्तीदमारव्यानं श्रृण्वन्ति श्रद्धया नराः ।
तेऽत्र सम्पत्समृद्धाश्च मोक्षं यान्ति न संशयः ॥

Colophon :

इति श्रीस्कन्दपुराणे गोपद्मव्रतकल्पः समाप्तः ॥

213

Sl. No : 14520 गोपद्मव्रतम् Ms. No : P. 9633/32

Beginning :

× × × × × कमलापते ।
नूपुरं देवदेवेश गृहाण त्वं मयार्पितम् ॥
आभरणम् ।
गन्धं मनोहरं दिव्यं विलेपार्थं मयार्पितम ।
प्रीत्या संगृह्य देवेश शेषशायि नमोऽस्तु ते ॥

End :

एवं यः कुरुते विप्र तस्य श्रीरचला भवेत् ।
यं यं कामयते कामी तं च प्राप्नोत्यसंशयः ।
अन्ते विष्णुपदं गच्छेत् सर्वपापविवर्जितः ॥

Colophon

इति श्री नारदीयपुराणे गोपद्मव्रतकथोद्यापनं संपूर्णम् ॥ (?)

214

Sl. No : 14533 गोपद्मव्रतम् Ms. No : C 3032/56

Beginning:

धर्म उवाच—

कृष्ण कृष्ण महायोगिन् भक्तानुग्रहकारक ।
व्रतानामुत्तम ब्रूहि व्रतं यदस्ति माधव ॥

कृष्ण उवाच —

ब्रह्मविष्णुमहेशाना: ऋषयश्च तपोधना: ।

दिक्पाला: द्वादशादित्या: वसव: काल एव च ॥

End :

प्रतिमावस्त्रसंयुक्तान् दक्षिणाभिश्च संयुतान् ।

प्रत्येकं ब्राह्मणेभ्यश्च दद्याद्भक्त्या समन्वित: ॥

भोजनं कारयेत् पश्चात् भक्ष्यभोज्यादिभि: सुधी: ।

द्वात्रिंशत्संख्याकान् विप्रान् वेदवेदाङ्गपारगान् ॥

दक्षिणाभि: × × × × × ।

Colophon :

— — —

215

Sl. No. 14535 गोपद्मव्रतोद्यापनम् **Ms. No : P. 5648/24**

Beginning :

गोष्ठे वृन्दावने चैव नदीतीरे विशेषत: ।

पद्मानि च सुरम्याणि पञ्चवर्णमयानि च ॥

तन्मध्ये देवमावाह्य मन्त्रेणानेन भक्तित: ।

आगच्छ जगतामीश परमात्मन् सनातन ॥

End :

अन्येभ्योऽपि यथा प्रीत्या हिरण्यादीन् प्रदापयेत् ।

ब्राह्मणान् भोजयेत्पश्चात्स्वयं भुञ्जीत बन्धुभि: ॥

एवं य: कुरुते देव उद्यापनमनुत्तमम् ।

सर्वान् कामानवाप्नोति यमलोकं न पश्यति ॥

Colophon

इति श्री पद्मपुराणे सुभद्राकृष्णसंवादे गोपद्मव्रतोद्यापनं सम्पूर्णम् ॥

216

Sl. No. 14536 **गोपद्मव्रतोद्यापनम्** Ms. No : P. 5865/54

Beginning :

युधिष्ठिर उवाच—

देवदेव जगन्नाथ कथमेतदनुत्तमम् ।

जि × × × यादपुत्राश्च तद्वदस्व जगत्पते ॥

श्रीकृष्ण उवाच—

आषाढे शुक्लपक्षे तु द्वादश्यां च तथैव च ।

गोपद्मव्रतमाख्यातं तद्विधानं वदामि ते ॥

End :

उपचारैः समभ्यर्च्य नैवेद्यं तं समर्पयेत् ।

आचार्यं पूजयित्वा तु वस्त्रैराभरणैस्सह ॥

कृष्णधेनुं सवस्त्रं च प्रतिमां च प्रदापयेत् ।

एवं श्रुत्वा तु सा कुन्ति माम्राज्यं श्रियमाप्नुयात् ॥

Colophon :

इति श्रीविष्णुधर्मोत्तरे गोपद्मव्रतोद्यापनं समाप्तम् ॥

217

Sl. No : 14541 **गोमयभक्षणव्रतम्** Ms. No : P. 9760/29

Beginning :

एवंगुणविशेशणविशिष्टायां पुण्यतिथौ मम सम्भावितपापक्षयार्थं × ×
भविष्योत्तरपुराणोक्तगोमयभक्षणव्रतं करिष्ये । तदङ्गं सूर्यपूजां करिष्ये—

End :

दिव्यं विमानमारुह्य व्रतस्यास्य प्रभावतः ।

कल्पकोटिसहस्राणि सूर्यलोके महियते ॥

Colophon :

इति भविष्योत्तरपुराणे गोमयभक्षणव्रतकल्पः संपूर्णः ॥

218

Sl. No : 14542 गोसावित्रीव्रतम् **Ms. No. P. 9643/15**

Beginning:

एवंगुणविशेषणविशिष्टायां शुभतिथौ मम .... अस्माकं ....
सिध्यर्थं सर्वकालसौमङ्गल्याभिवृध्यर्थं पुत्रपौत्रादिवृध्यर्थं + + + + +
ब्रह्माण्डपुराणोक्तप्रकारेण कल्पोक्तविधानेन गोसावित्रीदेवतामुद्दिश्य गोसावित्री-
प्रीत्यर्थं गोपूजां करिष्ये ।

End :

देवतार्थं च पित्रर्थे यज्ञार्थं तु विशेषतः ।
फलदः सर्वकर्माणां नमस्ते मोक्षदायिनी ॥
नमस्कारं यद्गाव × × × प्रार्थनं गवये नमः ।
पुनरर्घ्यं आवाहितगोसावित्रीदेवताभ्यो नमः ।
छत्रचामरादिपुनः पूजा । यस्य स्मृत्येति ॥

Colophon ;

इति पूजाविधानं सम्पूर्णम ॥

219

Sl. No : 14544 चन्द्रकर्पूरव्रतम् **Ms No P: 2370/2**

Beginning:

ब्रह्मकैवर्ते सूतः—
प्रसुप्ते तु हृषीकेशे पौर्णमास्यामतन्द्रितः ।
ब्राह्मणो क्षत्रियो वैश्यो नारी चाथ सुवासिनी ॥
आषढशुक्लपौर्णम्यां मध्याह्ने तु तिलैः ॥ (१)

End :

क्षीरोदार्णवसंभूत ह्यत्रिनेत्रसमुद्भव ।
गृहाणार्घ्यं मया दत्तं रोहिण्या सहितस्सदा ।
चन्द्रमसे इदमर्घ्यं रोहिणीसहिताय च ॥

Colophon :

— — —

220

Sl. No: 14545 चन्द्रगौरीव्रतम् **Ms. No: P. 2268/26**

Beginning:

सूत सूत महाप्राज्ञ सर्वशास्त्रविशारद ।
चन्द्रगौरीव्रतं पुण्यं ब्रूहि सर्वार्थसिद्धिदम् ॥

सूतः —

कैलासशिखरे रम्ये सुखासीनं जगद्गुरुम् ।
पप्रच्छगिरिजाकान्तं लोकानुग्रहकाम्यया ॥

End:

किमत्र बहुनोक्तेन व्रतेनानेन भामिनि ।
नानवाप्यं भवेत्पुंसां इह लोके परत्र च ॥

(वाम । ज्येष्ठ । रुद्र । काल । कलविकरण । बलविकरण । बलप्रमथन । मनोन्मनी । इति नवशक्तयः ॥)

Colophon:

इति भविष्योत्तरपुराणे चन्द्रगौरीव्रतं नाम अष्टाशीतितमोऽध्यायः ॥

221

Sl. No: 14546 चन्द्रसूर्यव्रतम् **Ms. No: P. 4179/7**

Beginning:

चन्द्रसूर्यव्रतं वक्ष्ये सद्यः सन्तानकारणम् ।
सर्वकामप्रदं नृणां स्त्रीणां चैव महामुने ॥

वसिष्ठः —

पुत्रकामप्रदं नृणां आदावश्वत्थसेवनम् ।
द्वादशार्कव्रती यं वा ततो दानफलव्रतम् ॥

End

एतदुद्दिश्य कुरुते तत्तत्प्राप्नोति मानवः ।
तस्मात् सर्वप्रयत्नेन व्रतमेतत् समाचरेत् ॥
यः पठन्तीदमाख्यानं शृण्वन्ति श्रद्धयान्वितः ।
सर्वसंपत्समृद्धिः स्यात् ते यान्ति परमां गतिम् ॥

Colophon :

इति श्री स्कन्दपुराणे उमामहेश्वरसंवादे चन्द्रसूर्यव्रतं संपूर्णम् ॥

222

Sl. No : 14548 चातुर्मास्यव्रतम् **Ms. No : P. 4218/21**

Beginning :

श्रीकृष्ण उवाच ॥

चातुर्मास्यव्रतेनैव सर्वशाकं विवर्जयेत् ।
एवं वर्जं च वर्जं च चतुर्थं मासवर्जितम् ॥
प्रथमं शाकवर्जं च द्वितीयं दधिवर्जितम् ।
तृतीयं क्षीरवर्जं च चतुर्थं सूपवर्जितम् ॥

End :

त्वं काकमृतजन्माऽसि वन्दितादिसुरासुरैः ।
पुण्यलोकमवाप्नोति अतः शान्तिं प्रयच्छ मे ॥
आचार्याय कर्णाभरणाङ्गुलीयकादीनि दद्यात् ।
दश दानानि कुर्यात् ब्राह्मणांश्चैव भोजयेत् ।
आशीर्वचनं गृह्णीयात् ॥

Colophon :

इति शाकवर्जव्रतं समाप्तम् ॥

223

Sl. No : 14550 चातुर्मास्यव्रतम् **Ms. No : C. 9946/28**

Beginning :

प्रणम्य गौरीतनयं चातुर्मास्यां हरेर्दिने ।
उपवासविधिं वक्ष्ये नृणां मोक्षैकसाधनम् ॥
चातुर्मास्येति विज्ञेयं शयना × × × ।
दत्तं तत्र हुतं तस्य तदक्षय्यमिहोच्यते ॥

End :

शुद्धमव्रणकुम्भस्थं जलं संशोध्य मन्त्रतः ।
पुष्पोदकरणादीनि निक्षिप्योदकचिह्नोद्धृती ॥

पद्मपीठे समासीनः प्राणानायम्य वाग्यतः ।
सङ्कीर्त्य तिथिवारादीन् सहाचार्यो जपेद्धरिम् ।

Colophon :

इति उपासनविधिः ॥

224

Sl. No : 14553 चान्द्रायणव्रतम् **Ms. No : P. 3121/14**

Beginning :

चान्द्रायणमाह—
तिथिविध्याचरेत पिण्डान् शुक्के शिखिण्डसंमितान् ।(?)
एकैकं ह्रासयेत् कृष्णे पिण्डं चान्द्रायणं चरेत् ॥

चान्द्रायणाख्यं कर्म कुर्वन् मयूराण्डपरिमितान् पिण्डान् शुक्ले आपूर्यमाणपक्षे तिथिवृद्ध्या चरेत् ॥

End :

शब्दवाच्यं रुद्रमाज्यद्रव्येण वायुमन्त्रेण ब्रह्माणमाज्यद्रव्येण दोषमन्त्रंण शेषमाज्येन वरुणमन्त्रेण ..... साङ्गेन कर्मणा संसोमस्ते तत्कर्म स्तूयते। आदौ विष्णुगायत्र्या होमं कुर्यात् ।

Colophon :

— — —

225

Sl. No : 14554 चान्द्रायणव्रतम् **Ms. No : C. 3032/5**

Beginning :

नारद उवाच—
व्रतानामिह सर्वेषां उत्तमं पुण्यवर्धनम् ।
चान्द्रायणव्रतं नाम तत्समासेन मे वद ॥
कस्मिन मासे प्रकर्तव्यं को विधिः कस्य पूजनम् ।
कथं नु नियमः कार्यो तद्वदस्व महाप्रभो ॥

End :

देवकृतस्यैनसोवयचनमसि स्वाहा ।
मनुष्यकृतस्यैनसोवयजनमसि स्वाहा ।
पितृकृतस्यैनसोवयजनमसि स्वाहा ।
अन्यकृतस्यैनसोवयजनमसि स्वाहा ॥
अस्मत्कृतस्यैनसोवयजनमसि स्वाहा ।
तेन चत्याम: स्विष्टकृद्धोम: ब्राह्मणभोजनं च कारयेत् ॥

Colophon :

इति चान्द्रायणव्रतं समाप्तम् ॥

226

Sl No : 14555 चित्रगुप्तव्रतम् **Ms. No: P. 2268/21**

Beginning :

सर्वप्राणिषु मध्यस्थं सर्वदेवनिधामकम् ।
सर्वेषां परिलिख्यन्तं चित्रगुप्तं नमाम्यहम् ॥
ध्यानं – बालादित्यसमं तेज: सुधाकरनिभाननम् ।
गृहाणावाहनं देव भुक्तिमुक्तिप्रदायक ॥

End :

तत्सर्वं लभते मर्त्य: चित्रगुप्तस्तोत्तमात् ।
सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ॥
तत्फलं समवाप्नोति चित्रगुप्तव्रतोत्तमात् ॥

Colophon :

इति भविष्योत्तरपुराणे चित्रगुप्तव्रतमाहात्म्यकथा समाप्ता ॥

227

Sl. No : 14556 चित्रगुप्तव्रतोद्यापनम् **Ms. No : P. 9993/7**

Beginning :

कैलासशिखरे रम्ये नानागणनिषेविते ।
रत्नपीठे सुखासीनं पार्वत्या परमेश्वरम् ॥

ब्रह्मविष्णुसुरेन्द्राद्यैः सिद्धैश्च मुनिपुङ्गवैः ।
गाणापत्यादिभिः पुत्रैः सप्ततिमुनिपुङ्गवैः ॥

End :

ब्राह्मणान्तर्पयित्वाऽथ क्षम्यतामित्यनुव्रजेत् ।
एवंकुर्याद्व्रतमिदं नरकादुद्धयुरेत्सदा ॥
ऋणत्रयाद्विमुच्येत सर्वस्वास्थितथाभवेत ।
ये पठन्तीदमाख्यानं शृण्वन्ति श्रद्धयान्विताः ।
तेषां पापानि नश्यन्ति तेषां स्वर्गं भविष्यति ॥

Colophon :

इति स्कन्दपुराणे चित्रगुप्तउद्यापनप्रकरणम् ॥

228

Sl. No : 14558 चिलुकुद्वादशीव्रतम् Ms. No. P. 8180/5

Beginning :

कुन्त्युवाच—
भगवन् सर्वधर्मज्ञ सर्वलोकहित प्रिय ॥
वेदशास्त्रार्थतत्त्वज्ञ वेदव्यास महामुने ।
व्यासः—
शृणु चाथ फलं चैव चिलुकुद्वादशीव्रतम ।

End :

पार्वती रुक्मिणी सत्यभामा कात्यायनी तथा ।
अप्सरादिः स्त्रियस्सर्वा व्रतं चरति वैभवात् ।
विष्णुसायुज्यमाप्नोति लोकान् कीर्ति प्रदापयेत् ॥

Colophon :

इति स्कन्दपुराणे चिलुकुद्वादशीव्रतम् ॥

229

Sl. No: 14561 जयलक्ष्मीव्रतम् **Ms. No: P. 2551/3**

Beginning:

ओं आचम्य प्राणानायम्य देशकालौ स्तुत्वा अस्माकं सकुटुम्बानां अभिवृद्ध्यर्थं × × × प्रसादसिद्ध्यर्थं श्री महालक्ष्मीप्रसादसिद्ध्यर्थं मया संपादितैः द्रव्यैः ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ।

End:

तस्मात्सर्वप्रयत्नेन व्रतमेतत्समाचरेत् ।
दश × र्षाणि व्रतं सोप्ययाय न परम् ॥
कृत्वा तु विपुलान्कामानवाप्नोति न संशयः ।
ये च शृण्वन्ति सततं ये पठन्ति च मानवाः ॥
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ।

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे सार्वभौमव्रतमाहात्म्ये जयलक्ष्मीव्रतं सम्पूर्णम् ॥

230

Sl. No: 14563 जयलक्ष्मीव्रतोद्यापनम् **Ms. No. P. 2551/5**

Beginning

शौनकः—

सूत सूत महाभाग सर्वतत्त्वार्थकोविद ।
उद्यापनविधिं ब्रूहि जयलक्ष्म्या व्रतः शुभोम । (?)

सूतः—

पुरा स भगवान्ब्रह्मा नारदाय यदुक्तवान् ।
ततेऽहं संप्रवक्ष्यामि जयलक्ष्म्या व्रतस्य हि ॥

End:

एवमेव पुरा प्रोक्तं नारदाय महर्षये ।
उद्यापनविधानन्तु कथितं हि द्विजोत्तमाः ॥

ये शृण्वन्ति च सततं ये पठन्ति च मानवाः ।
ते सर्वे पापानिर्मुक्ता यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे जयलक्ष्मीव्रतोद्यापनं सम्पूर्णम् ॥

231

Sl. No : 14564 ज्येष्ठालक्ष्मीव्रतम् **Ms. No : P. 2209/16**

Beginning:

एवंगुण + + + तिथौ ज्येष्ठलक्ष्मीपूजां करिष्ये ।
पद्मासने पद्मकरे सर्वलोकैकपूजिते ।
नारायणप्रिये देवि सुप्रीता भव सर्वदा ॥
ध्यानम्—
यत्त्वेहित्वं महाभागे सुरासुरनमस्कृता ।
ज्येष्ठत्वं सर्वदेवानां नत्सा उपागता भव ॥ (?)

End:

पुत्रपौत्रधनं प्राप्य महालक्ष्मीप्रसादतः ।
प्रतिवर्षं ति वै कुर्मा व्रतं वित्ताणि नारद । (?)
प्राप्नुवन्ति मेह तुभ्यो यथाभीष्टमनोरथान् ।
पतिपुत्रसमायुक्ता यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे उमामहेश्वरसंवादे ज्येष्ठलक्ष्मीव्रतकल्पः सम्पूर्णः ॥

232

Sl. No : 14565 ज्येष्ठालक्ष्मीव्रतम् **Ms. No : C. 3032/28**

Beginning :

ज्येष्ठालक्ष्मीपूजाविधानप्रारम्भः । एवंगुणेत्यादिशुभतिथौ श्रीज्येष्ठालक्ष्मी-प्रेरणया ज्येष्ठालक्ष्मीप्रीत्यर्थं श्रीमहालक्ष्मीपूजां करिष्ये —
ओं पुष्पाक्षतान् गृहीत्वा -
इन्द्रनीलनिभां देवीं ज्येष्ठालक्ष्मीं चतुर्भुजाम् ।

End:

प्रार्थनम् —

यज्ञेन यज्ञमिति मन्त्रपुष्पम् । यानि कानिचेति प्रदक्षिणम् , पापोहमिति नमस्कारम् ,
यस्य स्मृत्येत्यादि पुजां समाप्य अनन्तरं कथां श्रुत्वा वयुनदानं दातव्यम् ।

ज्येष्ठा लक्ष्मीःप्रगृह्णातु ज्येष्ठलक्ष्मी ददाति च ।
लक्ष्मी तु तारकोभाभ्यां ज्येष्ठादेव्यै नमो नमः ॥

Colophon:

— — —

233

Sl. No: 14566 ज्योतिस्स्तम्भव्रतम् **Ms. No: P 1720/4**

Beginning:

एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ मम दीर्घसौमङ्गल्याभिवृद्ध्यर्थं
सर्वाभीष्टसिद्ध्यर्थं भीमावादशी(?)व्रतं करिष्यमाणः आदौ कलशार्चनं करिष्ये—

End:

स्वर्णं हि शंकरो यस्मात् अतश्शन्तिं प्रयच्छ मे ॥

प्रतिग्रहणमन्त्रः ।

प्रतिगृह्णात्विदं भीमः भीमो वै प्रददाति च ॥
भीमस्तु तारकोभाभ्यां भीमेशाय नमो नमः ॥

Colophon

इति भीमेशार्चनाविधिः समाप्तः ॥

234

Sl. No: 14568 ज्योतिस्स्तम्भव्रतम् **Ms. No: P. 4719,6**

Beginning:

ध्याये त्रिलोचनं देवं व्रतं ब्रूही महेश्वर ।
ज्योतिःस्तम्भव्रतं कार्थं व्रतमेतत्सुखं भवेत् ॥

ध्यानम् ।

आवाहयेन्महादेवं वामदेवाय ते नमः ।
तत्पुरुषायेति मन्त्रेण आवाह्य ज्योतिर्दर्पणे ॥

End :

स्नुपया श्रुतवृत्तान्तः प्रहर्षमतुलं ययौ ।
इतीदं कथितं पुण्यं व्रतानामुत्तमं व्रतम् ॥
एतच्छृण्वन्ति सततं श्रावयिष्यन्ति मानवाः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

Colophon :

इति स्कान्दे भीमेशव्रतं सम्पूर्णम् ॥

235

Sl. No : 14570 ज्योतिस्तम्भव्रतम् Ms. No : P. 5865/7

Beginning :

सूत उवाच—

अथातः सम्प्रवक्ष्यामि ज्योतिस्तम्भव्रतोत्तमम् ।
पुराणैर्द्वापरस्यान्ते × × देवेन भापितम् ।

युधिष्ठिर उवाच—

देवदेव जगन्नाथ पतिसञ्जीवनं वरम् ।
व्रतं ब्रूहि सुवासिन्यां पुत्रपौत्रप्रवर्धनम् ॥

End :

नवविप्रमलङ्कृत्य × × पायन दापयेत् ।
स्वशक्त्या दक्षिणां दद्याद्गोविप्राय पयस्विनीम् ॥
वित्तशाठ्यं न कुर्वीत नवविप्रान्सभोजयेत् ।
एवं कुर्याद्व्रतं सम्यक् सर्वसम्प × × × ति ॥

Colophon :

इति श्री भविष्योत्तरपुराणे ज्योतिस्तम्भव्रतं सम्पूर्णम् ॥

236

Sl. No ; 14576 ज्योतिस्तम्भव्रतम् Ms. No : P. 9722/6

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ आयुरारोग्यैश्वर्याभिवृध्यर्थं पतिप्राण-

धारणसिद्ध्यर्थं पतेरायुरारोग्यैश्वर्याभिवृद्ध्यर्थं भीमामावास्याव्रताङ्गं उमामहेश्वर देवतामुद्दिश्य उमामहेश्वरदेवताप्रीत्यर्थं स्कान्दपुराणोक्तप्रकारेण यावच्छक्ति ध्यानावाहनादि षोडशोपचारपूजां करिष्ये—

End :

स्वर्णं हि शङ्करो यस्य अतः शान्ति प्रयच्छ मे ।

प्रतिग्रहणमन्त्रः—

प्रतिगृह्णात्विदं भीमः भीमो वै प्रददाति च ।
भीमस्तु तारकोभाभ्यां भिमेशाय नमो नमः ॥

Colophon :

इति पूजाविधानम् ॥

237

Sl. No; 14581 ज्योतिस्तम्भव्रतम् **Ms. No : P. 8410/4**

Beginning :

एवंगुणेत्यादी सङ्कल्प्य, मम सर्वाभीष्टसिद्ध्यर्थं भीमाभावास्याव्रताङ्गत्वेन उमा महेश्वरपूजां करीष्ये इति सङ्कल्प्य, सर्वालङ्कारसंयुक्ते सूपलिप्ते पञ्चवर्णसमेत रङ्गवल्लीविशोभिते–

End :

स्वर्णं पवित्रमतुलं स्वर्णं पापप्रणाशनम् ।
स्वर्णं हि शङ्करं यस्याददश्शान्ति प्रयच्छ मे ॥

प्रतिग्रहणमन्त्रः–

प्रतिगृह्णात्विदं भीमः भीमो वै प्रददाति च ।
भीमस्तु तारको भावः भीमेशाय नमो नमः ॥

Colo phon :

इति पूजाविधानं सम्पूर्णम ॥

238

Sl. No: 14589 भीमामावास्याव्रतम् Ms: No . P. 9916/12

Beginning :

उपविश्य शुचौ देशे पद्मवर्णैरलंकृते ।
तण्डुलोपरि संस्थाप्य दीपस्तम्भं सदीपकम् ।।
अस्मिन्नावाहयेद्देवं भीमेशं सर्वदायकम् ।।

End

प्रतिगृह्णात्विदं भीमः भीमो वै प्रददाति च ।
भीमस्तु तारकोभाभ्यां भीमाय च नमो नमः ।।
प्रतिग्रहमन्त्रः ।

Colophon :

इति भीमव्रतपूजाविधानं संपूर्णम् ।।

239

Sl No : 14597 अनन्तचतुर्दशीव्रतम् Ms. No P. 7958/8

Beginnin g

ऋषय ऊचुः—

अहो सूत महाबाहो त्वत्प्रसादेन मागतः ।
सूनो वै निखिलान् धर्मान यत्किञ्चिद्वद मे स्वतः ।।
येन दानेन वै कीर्तिः लक्ष्मीः कामं प्रजायते ।
तद्व्रतं नस्समाचक्ष्व नृणां च हितकाम्यया ।।

End :

इत्येतन्निगदितमस्ति भोरीशाः
ताम्बूलव्रतमनघं नृणां हिताय ।
दुष्टेषु क्षपणमुखेषु नैव योज्या
श्चेन्नृणां सुविमलचेतसा हितयोज्यम् ।। (?)

Colophon :

इति श्री ब्रह्माण्डपुराणे ताम्बूलव्रतमहिमानुवर्णनं नाम एकोनत्रिंशोऽध्यायः ।।

240

Sl. No : 14598 तुलसीरङ्गवल्लीव्रतम् Ms. No : P. 8180/6

Beginning

ऋषय ऊचु: —

सूतं दृष्ट्वा महात्मानं मुनय: पुण्यदर्शना: ।
प्रस्तुत्य पटुभिर्वाग्भि: कथावक्तारमब्रुवन् ॥

\+ + + + + +

शृण्वन्तु मुनयस्सर्वे व्रतानामुत्तमं व्रतम् ।
भविष्यन्ति सुवासिन्य: नार्यो येन ब्रवीमि तत् ॥
तुलसीरङ्गवल्ल्याख्यं सर्वसंपत्प्रदायकम्

End :

एवं व्रतं या: कुर्वन्ति धनधान्यसमन्विता: ।
पुत्रपौत्रान्विता नित्यं सर्वान्कामानवाप्नुयु: ॥

Colophon :

ब्रह्माण्डपुराणे तुलसीरङ्गवल्लीव्रतकल्पं संपूर्णम् ॥

241

Sl. No : 14599 तुलसीव्रतम् Ms. No . P 2370/53

Beginning :

श्री वेदव्यास उवाच —

भविष्यत्पुराणोक्त श्री तुलसीव्रतं साङ्गं यथा भवति तथा ध्याना-
वाहनादिषोडशोपचारपूजां करिष्ये ।

तुलसी श्री सखि शुभे पापहारिणि पुण्यदे ।

End :

य: श्रावयति वक्ता वा तस्य पापं प्रणश्यति ।

आयुर्विद्या धनं तेजः पुत्रास्सुबहवस्तथा ।
यः कुर्यात्तुलसीपूजां संभवन्त्यपि हि ध्रुवम् ॥

Colophon:

इति श्री भविष्योत्तरपुराणे तुलसीव्रतं समाप्तम् ॥

242

Sl. No. 14601 — तुलसीव्रतम् — Ms. No. P. 6866/21

Beginning:

युधिष्ठिरः—
देवदेवारविन्दाक्ष पुराणपुरुषोत्तम ।
तुलस्या लक्षसंख्याकव्रतं ब्रूहि कृपानिधे ॥
श्री कृष्णः —
शृणु राजन् प्रवक्ष्यामि व्रतं सर्वोत्तमोत्तमम् ।
लक्षतुलसीति विख्यातं सर्वपापप्रणाशनम् ॥

End

युधिष्ठिरस्तु धर्मात्मा सानुजः कृतवानिदम् ।
शत्रुसङ्घं निहत्याजौ स्वराज्य प्राप्तवान सुखी ॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
तस्य पापानि नश्यन्ति ततो याति परां गतिम् ॥

Colophon:

इति श्री भविष्योत्तरपुराणे लक्षतुलसीव्रतकल्पं संपूर्णम् ॥

243

Sl. No: 14620 — तुलसीव्रतोद्यापनम् — Ms No: P. 2370/70

Beginning:

श्री व्यासः—
त्वत्प्रसादान्मम ब्रह्मन् श्रुतं हि तुलसीव्रतम् ।
अधुना कृपया ब्रूहि व्रतोद्यापनमुत्तमम् ॥

श्री ब्रह्मा—

श्रृणु व्यास प्रवक्ष्यामि व्रतस्योद्यापनक्रमम ।
कृते उद्यापने यत्र कृतं हि विपुलं भवेत् । (?)

End :

ततश्च स्वजनैस्सार्धं भोक्तव्यं हृष्टमानसैः ।
ततस्तु कामं सलभ्य परां सिद्धिमवाप्स्यसि ॥
पूरिदां सफलैर्युक्तां सगुडाभ्यां सदक्षिणाम् ।
उपायनं गृहाणाद्य विप्र वेदविदां वर ॥
इदानीं तुलसीदेवीं गृहीत्वा साधिदेवताम्
ददातु ते फलं तस्य व्रतस्यास्य यथेप्सितम् ॥

इति प्रतिग्रहमन्त्रः ॥

Colophon :

इति श्री विष्णुधर्मोत्तरे श्री तुलसीमाहात्म्ये श्री तुलसीव्रतोद्यापनं नाम सप्तदशोऽध्यायः ॥

244

Sl; No : 14607 तुलसीविवाहव्रतम् **Ms. No : C. 4291/1**

Beginning

पूर्वोच्चरित .... मैम सर्वाभीष्टसिद्ध्यर्थं × × × तुलसी विवाहविधिं एकतन्त्रेण करिष्ये । तदङ्गतया पुरुषसूक्तेन विधिना × × × श्री महाविष्णुपूजां करिष्ये । + + + + अक्षताप्रक्षेपं कृत्वा, दामोदरहस्ते तुलसीदानं कुर्यात् ॥

End :

तुलसीप्रार्थना —

तुलसीदेवि नमस्तुभ्यं सर्वपापक्षयं कुरु ।
वर्चस्वं कुरु मां देवि धनवन्तं तथा कुरु ॥
+ + + + + +

ब्राह्मणाय दक्षिणां दत्वा आशीर्मन्त्रान्पठेयुः । कर्मेश्वरार्पणमस्तु । एवं देवं प्रबोध्य

इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ।
न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन ॥
यस्य स्मृत्येति ॥

Colophon :

— — —

245

Sl. No : 14609 तुलास्नानव्रतम् Ms No : P. 10083/12

Beginning :

नरो नागभयं तस्य नापमृत्युर्न चापदः ।
सर्वान् कामानवाप्नोति सूर्यलोकञ्च गच्छति ॥
गव्येन पयसाऽन्नेन ग्रहाणां सम्यगर्चयेत् ।
अ + + + + त्प्रमुच्यते ॥

End :

माघमासस्य सप्तम्यां उदयत्येव भास्करः ।
विधिवच्च तुलास्नानं महापातकनाशनम् ॥

Colophon.

— — —

246

Sl. No : 14610 तुलाकावेर्युद्यापनम् Ms. No : P. 1672/2

Beginning :

उद्यापनमथो वक्ष्ये तुलामासस्य सत्तम ।
यत् श्रुत्वा सर्वपापेभ्यः मुच्यते नात्र संशयः ॥
तुलाकावेरिमाहात्म्यं इत्थं श्रुत्वा द्विजोत्तमाः ।
दिनेदिने हरिं शान्तं स्नानपूर्वं समर्चयेत् ॥

End

श्रीकरं पुष्टिदं शुद्धं सर्वमङ्गलदायकम् ।
तुलाकावेरिमाहात्म्यं उक्तं पुण्यकमेव हि ॥

अतिरहस्यतमं × × ×
× × × पावनमान्तरशुद्धिदम् ।
हरिमहेन्द्रजनार्दनमञ्जसा
सुलभमेव हि सद्यपुतामृतम् ।।

Colophon.

इति स्कन्दपुराणे उत्तरखण्डे स्कन्दमहेश्वरसंवादे तुलाकावेरीमहात्म्योद्यापनं नाम एकत्रिंशोऽध्याय: ॥

247

Sl. No. 14612 त्रिचकल्प: **Ms No: P. 10237/3**

Beginning:

सुमुखश्चैकदन्तश्च कपिलो गजकर्णक: ।
लम्बोदरश्च विकटो विघ्नराजो गणाधिप: ।।
शुभतिथौ अस्माकं सकुटुम्बानां क्षेमस्थैर्यविजयायुरारोग्य ऐश्वर्याभिवृध्यर्थं × × × श्री सूर्यनारायणदेवताप्रीत्यर्थं त्रिचकल्पोक्तप्रकारेण × पूजां करिष्ये ।

End.

अपस्मारक्षयं कुष्ठं हृद्रोगं सर्वनाशनम् ।
सर्वज्वरेषु शमनं सर्वरोगपराय च ॥
एतत्स्तुत्यमिदं पुण्यं सर्वरक्षाकरं परम ।
षण्मासं सर्वकार्येषु सूर्यलोके महीयते ॥

Colophon:

— — —

248

Sl. No: 14616 दशरथगौरीव्रतम् **Ms No: P 2370/71**

Beginning:

सूत उवाच —
सुभगा दुर्भगा वाऽपि स्त्रियो न विधवा गृहा । (?)
अस्ति गौरीव्रतं पुण्यं व्रतं सौभाग्यवर्धनम् ॥

श्री शङ्कर उवाच—

विधानं कीदृशं तत्र किं दानं कस्य पूजनम् ।

End :

श्री शङ्कर उवाच—

दिगन्ता दशरथाव्रतं कृत्वा प्रकाशयेत् । (?)

तस्मै तथैव विख्यातं व्रतं तन्महते मते ॥

Colophon :

इति श्री स्कन्दपुराणे गौरीकाण्डे दशरथगौरीव्रतं समाप्तम् ॥

249

Sl. No. 14619 **तुलसीविवाहव्रतम्** **Ms No. P. 8165/47**

Beginning :

नीलोत्पलदलश्यामां पूर्णचन्द्रनिभाननाम् ।

अभयं दक्षिणे हस्ते वामे वै बीजपूरकम् ॥

दधानां ललितां देवीं सर्वकार्यार्थसिद्धये ।

दशरथगौर्यै नमः ।

ध्यानम् — सर्वमङ्गलदायिने नमः आवाहनम् — सिंहवाहनायै नमः आसनम् ।

End :

कुलनीलाचलश्यामे पुण्डरीकशुभानने ।

पुष्पं गन्धं फलं तोयं गृहाणार्घ्यं नमोऽस्तु ते ॥

अर्घ्यम् ।

केशवप्रीतिदातव्या शम्भुब्रह्मार्क तुष्टिदाः ।

तान् गृहीत्वा महादेवि ममाभीष्टप्रदान् शुभान् ॥

इत्यपूपदानमन्त्रः ।

Colophon :

इति दशरथगौरीव्रतं संपूर्णम् ।

250

Sl. No. 14620 **दशाफलगौरीव्रतम्** **Ms. No : P. 2370 70**

Beginning :

अत्रिरुवाच—
पूजयत्यखिलललिता सर्वसौख्यप्रदायिनी (?)
स्त्रियो व्रतपरायाश्च न वैधव्यं भवेत्क्वचित् ॥
याःकाश्चिद्देवतास्सर्वाः मनुजोरगराक्षसाः ॥

End :

धनं धान्यं च सौभाग्यं पुत्रदाराभिवर्धनम् ।
यः पठेत्प्रातरुत्थाय श्रृणोति च तथापरः ॥
सर्वपापविनिर्मुक्तः पुत्रसिद्धिमवाप्नुयात् ॥

Colophon :

इति श्री स्कन्दपुराणे दशाफलगौरीव्रतं संपूर्णम् ॥

251

Sl No : 14621 **दशाफलव्रतम्** **Ms. No: P. 277/8**

Beginning :

कृष्णं विष्णु तथऽनन्तं गोविन्दं गरुडध्वजम् ।
दामोदरं हृषीकेशं पद्मनाभं हरिं प्रभुम् ॥
बालकृष्णमुदाराङ्गं देवकीगर्भसंम्भवम् ।
ध्यायेदभीष्टसिध्यर्थं लोकानुग्रहविग्रहम् ॥

End:

द्रौपदी चै व कुन्ती च चक्रे दशफलव्रतम् ।
तद्व्रतस्य प्रभावेण कृष्णोक्तेन शुभेन च ॥
युद्धे तथारीन्निर्जित्य पाण्डवाः स्वपुरं ययुः ।
व्रतस्यास्य प्रभावेण कृष्णस्यास्य प्रसादतः ॥
ये कुर्वन्ति नरा भक्त्या सर्वैश्वर्यसमन्विताः ।

पुत्रपौत्रैः परिवृता इह लोके क्रियान्विताः ॥
भुक्त्वा तु विपुलान् भोगान् मोक्षं यान्ति न संशयः ॥

Colophon :

इति पद्मपुराणे दशाफलव्रतकल्पः संपूर्णः ॥

252

Sl. No : 14629 दशाफलव्रतम् Ms. No. P. 6000/33

Beginning :

सूत उवाच—
कृत्वा सा × तविहिते सानुजे धर्मनन्दने ।
वनं प्रयाते दु× यं कुन्तीं प्राह हरिस्तदा ॥
नमस्कृत्य समासाद्य प्रोवाच मधुरं वचः ।
कृतं कुन्ति विषादेन व्रतं वक्ष्यामि ते शुभम् ॥
नाम्ना दशाफलं दद्यात् सर्वदुःखनिवारणम् ।
साम्राज्यं ते सुखं प्राप्य हत्वा शत्रुमकण्टकम् ॥

End :

फल × मासुखनीं व्रतस्यास्य प्रभावतः । (?)
अतश्चेद्व्रतं विप्रा ये चरन्ति समाहिताः ।
विमुक्ताः सर्वदुःखेभ्यः प्राप्नुयुस्सिद्धिमीप्सिताम् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे दशाफलव्रतं सम्पूर्णम् ॥

253

Sl. No : 14634 दशाफलव्रतम् Ms. No : P. 8165/37

Beginning :

ध्यायेत्कृष्णं शङ्खचक्रगदाभयकराम्बुजम् ।
किरीटकुण्डललसत्कटकाद्यैरलङ्कृतम् ॥

ध्यानम् वासुदेवाय नमः। आवाहनम् देवकीनन्दनाय नमः। आसनम् तीर्थपादाय नमः। पाद्यम् पारिजातापहाराय नमः। अर्घ्यं—नवनीतप्रियाय नमः। आचमनम्—

End :

नमस्तुभ्यं महाविष्णो गोविन्द गरुडध्वज।
गृहाणार्घ्यं मया दत्तं श्रीकृष्णाय नमो नमः॥
अर्घ्यं, उपायनम्।
देवदेव जगन्नाथ सर्वदेवनमस्कृत।
सुव्रतं कुरु मे विष्णो दानेनानेन सर्वदा॥
प्रतिग्रहमन्त्रः।
श्रीकृष्णः प्रतिगृह्णातु श्रीकृष्णो वै ददाति च।
श्रीकृष्णस्तारकोभाभ्यां श्रीकृष्णाय नमो नमः॥

Colophon :

इति दशाफलव्रतविधिः सम्पूर्णः॥

254

Sl. No : 14653 दशाफलव्रतम् Ms. No. P. 8181·11

Beginning .

मूले कल्पतरोः सरोवरगतं गोगोपगोपीवृतं
नीलाम्भोदनिभं त्रिभङ्गिललितं संवीतपीनाम्बरम्।
श्रीमत्कौस्तुभपारिजातकुसुमस्रग्भाषितोरस्थितिं (?)
वन्दे नन्दसुतं सुवेणुनिनदं पिञ्छावतंसं हरिम्॥

End :

तस्मात्सर्वप्रयत्नेन कुरुध्वं सुसमाहिताः।
सद्भ × × प्रभाव × × व्रतं कुर्यादतन्द्रितः॥
सर्वान् कामानवाप्नोति विष्णुलोके महीयते॥

Colophon :

इती श्रीपद्मपुराणे दशाफलव्रतकथं संपूर्णम्॥ (?)

255

Sl No : 14636 दशाफलव्रतम् **Ms No : P. 8410/22**

Beginning :

कृतकद्यूतविजिते सानुजे पाण्डुनन्दने ।
व्रतं पप्रच्छ दुःखार्ता कुन्ती प्राह हरिं तदा ॥
नमस्कृत्वा विधानेन हरिभक्तिसमान्विता ।
व्रतं ब्रूहि जगन्नाथ प्राप्तदुःखापनुत्तये ॥

End :

सङ्ग्रामान् तेतु सम्प्राप्य विजित्वा शत्रुकण्टकम् ।
पालयामासुरुर्वीं व्रतस्यास्यप्रभावतः ॥
अतश्चैतद्व्रतंविप्राये चरन्ति सयाहिताः ॥
विमुक्ताः सर्वपापेभ्यः प्राप्नुयुः सिद्धिमीप्सिताम् ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे दशाफलव्रतं समाप्तम ॥

256

Sl. No. 14643 दशाफलव्रतम् **Ms. No C . 3032/15**

Beginning :

शृणुध्वं ऋषयस्सर्वे नैमिषारण्यवासिनः ।
पुरा कृतयुगस्यादौ कृष्णदेवेन भाषितम् ॥
तद्व्रतं वः प्रवक्ष्यामि साङ्गोपाङ्गं मुनीश्वराः ।
पुरा वै द्वापरस्यान्ते पाण्डवाः कौरवास्तथा ॥

End :

तस्मात् सर्वप्रयत्नन विष्णुलोके महीयते ।
श्रुत्वा चापि कथां दिव्यां फलं च प्राप्यते नरः ॥
ये कुर्वन्ति व्रतं दिव्यं व्रतानामुत्तमं शुभम् ।
पुत्रपौत्रैः परिवृताः यान्ति विष्णोः परं पदम् ॥

Colophon:

इति श्रीपद्मपुराणे दशाफलव्रतं संपूर्णम् ॥

257

Sl. No : 14644 दशाफलव्रतोद्यापनम् Ms. No. P. 4184/84

Beginning:

नारदः—

जयन्ती जन्मसमये कृष्णस्य जगदुत्सवे ।
सूत्रं दशगुणं कृत्वा तत्पुरः परिपूजयेत् ॥
प्रातर्बाहौ निबध्नीयात् बालकृष्णं स्मरेद्धृदि ।
प्रत्यहं दशपूजादि नमस्कारं प्रदक्षिणम् ।

End:

संसारार्णवनग्नानां पाहि देवकिनन्दन ।
दशदानानि दातव्याः विष्णुप्रियकरं शुभम् ॥
आचार्यं पूजयेत्पश्चात्सवस्त्रं गां प्रदापयेत् ।
ब्राह्मणान् भोजयेत्तत्र सर्वसम्पत्करं शुभम् ॥

Colophon:

इति भविष्योत्तरपुराणे दशाफलोद्यापनं संपूर्णम् ॥

258

Sl. No : 14645 दशाफलव्रतोद्यापनम् Ms No P 5865/51

Beginning:

शृणुध्वमृषयः सर्वे नैमिषारण्यवासिनः ।
पुरा वै द्वापरस्यान्ते कृष्णदेवेन भाषितम् ॥
तद्व्रतं वः प्रवक्ष्यामि साङ्गोपाङ्गं मुनीश्वराः ।
पुरा वै द्वापरस्यान्ते पाण्डवाः कौरवास्तथा ॥

End :

स्वश × दक्षिणां ताश्च स्वालङ्काराणि सुव्रते ।
व्रती तत्र कथां श्रुत्वा ब्राह्मणान् भोजयेत्ततः ॥
पुत्रपौत्रैः परिवृतान्सर्वान् कामानवाप्स्यसि ।
एवं कृत्वा तु सा कुन्ती साम्राज्यं श्रियमाप्नुयात् ॥

Colophon :

इति श्री भवि योत्तराणे दशाफलतोद्यापनं समाप्तम् ॥

259

Sl. No. 14649 दानफलव्रतम् Ms No P. 4335/42

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ पद्मपुराणोक्तदानफलनिमित्तं आश्वीजमासे सम्प्राप्ते शुक्लान्ते भानुवासरादारभ्य माघशुद्धसप्तमीपर्यन्तं प्रत्येकं भानुवासरं भुक्ति-मुक्तिप्रदायकं श्री सूर्यनारायणप्रीत्यर्थं यावच्छक्ति ध्यनावाहनादि षोडशोपचारपूजां करिष्ये इति सङ्कल्प्य ।

End :

पतिव्रताश्च राज च कुन्ति कृत्वा तु लक्ष्यते ।
यः कृत्वा तु व्रतमिदं सर्वान्कामानवाप्नुयात् ॥
ये पठन्तीदमाख्यानं श्रृण्वन्ति श्रद्धयाऽन्विताः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥
गोधूमो न च पक्वान्नं सफलाज्यं सशर्कराम् ।
तस्मादस्य प्रदानेन प्रीतो भव दिवाकर ॥

Colophon :

इति पद्मपुराणे दानफलव्रतं सम्पूर्णम् ॥

260

Sl. No : 14650 दनफलव्रतम् Ms. No : P. 5293/22

Beginning :

पितृगृहे वर्तमाना कुन्ती व्यासं ददर्श ह ।
नमस्कृत्वा तु सद्भक्त्या पाद्यार्घ्याचमनीयकम् ॥

दत्त्वा संप्रार्थितं व्यासं कुन्ती मुकुलिताञ्जलिः ।
पति × × मोक्षार्थं व्रतं ब्रूहि महामुने ॥
शृणु दानाफलं नाम वक्ष्ये सर्वव्रतोत्तमम् ॥

End:

तदारभ्य कृते भूमौ दानाफलव्रतं महत् ।
सपुत्रा लभते कुन्ती त्वं कुरु व्रतमुत्तमम् ॥
ये पठन्तीदमाख्यानं शृणुयात् श्रद्धयान्वितः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon:

इति श्रीपद्मपुराणे उमामहेश्वरसंवादे दानाफलव्रतं समाप्तम् ॥

261

Sl No. 14636 दशाफलव्रतम् Ms No: P 8410/22

Beginning:

धर्मार्थकाममोक्षाणां फलदं यद्व्रतं महत् ।
सर्वशास्त्रार्थतत्त्वज्ञ पाराशर्य वदस्व तत् ॥
सौमङ्गल्यप्रदं स्त्रीणां पुत्रपौत्रप्रवर्धनम् ॥
भर्तुरायुःप्रदं दिव्यं देवतानां तथा मतम् ।
× × × × × × × × ×

End:

ततः सहिष्णुर्विप्रस्य गृहं गत्वा तु विस्मितम् ।
धनधान्यसमृद्धिं च गृहगोधनसङ्कुलम् ॥
सर्वालङ्कारसंयुक्तां दृष्ट्वा भार्यां ननन्द ह ।
सहिष्णुर्विस्मितो भार्यां अनुवाणो ह विस्मितः ॥

Colophon:

— — —

262

Sl. No : 14659 दानफलव्रतम् **Ms No : P. 8165/42**

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ मम आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं यावज्जीव-सौमङ्गल्याभिवृध्यर्थं धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्ध्यर्थं त्रयीमयत्रिमूर्त्यात्मक-परब्रह्मस्वरूपि श्री सूर्यनारायणप्रीत्यर्थं स्कन्दपुराणोक्तदानफलव्रतं करिष्ये ।

End :

विनतात्मकदेवेश कर्मसाक्षिपुरेश्वर ।
गृहाणार्घ्यं मया दत्तं अरुणो मे प्रसीदतु ।।

अर्घ्यं, वैनतेयाय नमः। अनूरवे नमः। गरुडाग्रजाय नमः। विनता नन्दनाय नमः इदमर्घ्यं । यस्य स्मृत्येति समर्पणम् ॥

Colophon :

इति दानफलव्रतं सपूर्णम् ।।

263

Sl. No : 14661 दानफलव्रतम् **Ms. No : P. 8410/21**

Beginning :

संलिप्य गोमये भूमिं चतुरश्रकमात्रकम् ।
तन्मध्येऽष्टदलं पद्मं शोभनं कर्णिकान्वितम् ।।
तद्दक्षिणे त्रिकोणे वै तन्मध्ये गणपतिं यजेत् ।
ततस्तु द्वारपालानां पूजां कुर्याद्यथाक्रमम् ।।

End

त्वदग्रे च चतुर्वेदाः तुलसि त्वं नमोऽस्तु ते ।

तुलसीनमस्कारः, परमान्नदानम् ।

पायसं परमं यस्मात् देवानामुत्तमोत्तमम् ।
सर्वदेवतयोग्यं च देहि पुष्टिं श्रियं सदा ॥

फलदानम् ।

Colophon

इति दानफलव्रतपूजाविधिः ।।

264

Sl. No; 14668 दानफलव्रतोद्यापनम् Ms. No: P. 2370/56

Beginning:

एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ अस्माकमित्यादि चतुर्विध पुरुषार्थसिद्ध्यर्थं पद्मपुराणोक्तप्रकारेण श्रीसूर्यनारायणमुद्दिश्य श्रीसूर्यनारायण प्रीत्यर्थं दानाफलव्रतोद्यापनार्थं द्वादशादित्य—

End:

इन्द्राय स्वाह। अग्नये स्वाहा। यमाय स्वाहा निर्ऋतये स्वाहा। वरुणाय स्वाहा। वायवे स्वाहा। ईशानाय स्वाहा। सर्वेश्वराय स्वाहा इति होमशेषं समापयेत् ॥

Colophon:

इति भविष्योत्तरपुराणे कृष्णार्जुनसंवादे रथसप्तमीव्रतं समाप्तम् ॥

265

Sl No: 14669 दीपव्रतम् Ms. No P 5657/20

Beginning:

नारद उवाच —

मया श्रुतानि सर्वाणि व्रतानि विविधानि च ।
इदानीं श्रोतुमिच्छामि व्रतं पापप्रणाशनम् ॥
अनृनानि च पापानि स्त्रीणां चैव पितामह ।
केनोपायेन नश्यन्ति तद्व्रतं विस्तराद्वद ॥

End:

इदं व्रतं तु यः कुर्यान्नारी वा पुरुषोऽपि वा ।
विष्णोर्लोकमनुप्राप्य ततो मोक्षमवाप्नुयात् ॥
एतत्ते कथितं विप्र सरस्वत्या कृतं तथा ।
अरुन्धत्या कृतं पूर्वं वसिष्ठेनैव चोदितम् ॥

Colophon

इति दीपव्रतं संपूर्णम् ॥

266

Sl. No : 14675 तुलसीव्रतम् Ms No : C. 3032/49

Beginning:

सूत उवाच—

श्रृणुध्वं मुनयः सर्वे शौनकाद्या महर्षयः ।
दुर्दशाहरणं नाम व्रतं वक्ष्ये विशेषतः ॥
कृताञ्जलिपुटो भूत्वा नारदः शरणं गतः ।
मेरुपार्श्वादूर्ध्वपृष्ठे सुखासीनं जगद्गुरुम् ॥

End :

धन्या हि पाण्डवास्सर्वे व्रताचरणकारणात् ।
इदं व्रतं तु शुभदं सर्वकामफलप्रदम् ।
पठेत् श्रृणोति यो भक्त्या द्वादशार्कैकभक्तितः ।
दुर्दशां विनिवृत्यैव सुदशां प्राप्नुयाद्ध्रुवम् ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे काश्यपनारदसंवादे दुर्दशानिवारणाव्रतं सम्पूर्णम् ॥

267

Sl. No : 14677 जयलक्ष्मीव्रतोद्यापनम् Ms. No. P. 8165/32

Beginning :

सूत सर्वार्थतत्त्वज्ञ सर्वप्राणिहितेरत ।
त्वत्तो वयं हि पुष्पाणि समर्पण फलोदयः ॥
अर्कपुष्प हेमपुष्पं करवीरं च मल्लिकाम् ।
चम्पका बृहती पुष्पं पङ्कजं नीलमेव च ॥
पत्रपुष्पाणि लर्याणि श्रुनामित्त्वत्प्रसादतः ॥

End :

होमान्ते ब्राह्मणान् पूज्य आचार्यं वस्त्रकुण्डलैः ।
गां दद्याद्द्विजवर्याय व्रतस्य परिपूर्तये ॥
एवं यः कुरुते विप्राः लक्षपुष्पैः प्रपूजयेत् ।
उद्यापनं द्विजश्रेष्ठाः कुरुध्वं शिवतुष्टये ॥

Colophon :

इति श्रीभविष्योत्तराणे द्रोणपुष्पव्रतं सम्पूर्णम् ।।

268

Sl. No : 14678 द्वादशीव्रतम् Ms. No : P. 4281/22

Beginning :

व्रतानि संप्रवक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ।
प्रसीदति हरिर्यत्र पशुपाशविमोक्षणः ।।
अनायासेन सर्वेषां प्रसीदति जनार्दनः ।
इ × × सुखं वाऽपि श्रेयोवृद्धिश्च जायते ।।

End :

नमो गोविन्द सर्वेश गोपिकाजनवल्लभ ।
अनेन धान्यदानेन प्रीतो भव जगद्गुरो ।।
एवं कृत्वा व्रतं सम्यक्सर्वपापविवर्जितः ।
गोमेधमरजं पुण्यं सम्पूर्णं प्राप्नुयान्नरः ।।

Colophon

इति द्वादशीव्रतं सम्पूर्णम् ।।

269

Sl. No : 14679 चतुर्मासव्रतम् Ms. No : P. 9945/13

Beginning :

अतःपरं प्रवक्ष्यामी कोदण्डस्थे दिवाकरे ।
हरेः पूजाविधी राजन् सर्वपापप्रणाशनम् ।।
प्रवृत्ते भारते युद्धे पौषे विष्णुःसनातनः ।
युधिष्ठिरः स्वयं प्रीत्या निजगाद गदाग्रजम् ।।

End :

तेन पुण्यप्रभावेन केशवा........सरोरुहम ।
भक्तिं सर्वार्थदां प्राप्य विष्णुसायुज्यमाप्नुहि ।।

ये पठन्तीदमध्यायं भक्त्या श्रृण्वन्ति ये नराः ।
धनुर्मासार्चनोत्थांते प्राप्नुवन्ति हरेः पदम् ॥

Colophon :

इति श्री विष्णुरहस्ये धनुर्मासपूजाविधिः ।

270

Sl. No. 14683 धर्मराजव्रतम् Ms. No. P. 6820/1

Beginning :

× × महिषो सर्ग उच्यते । यमे प्रीतिकरं धर्मं व्रतानां उत्तमं व्रतम् ।
पितृणां च × × तयमकिङ्करैः ।
कृष्णपक्षे चतुर्दश्यां भौमवारेण संयुते ।
आवाहयेद्धर्मराज्यं × × × ताय च ॥

End :

तत्रोपस्थाय सूक्तेन महिषा × × षं समापयेत् । × × यथाक्रमम् ।
ततो दानानि कुर्वीत आचार्याय सवत्सगाम् ।
पञ्चद्रोणसि × विप्रेभ्योऽशनमुत्तमम् ॥
चित्रान्नभक्ष्य भोज्यैश्च आशिषो वाचनं ततः ॥

Colophon :

इति धर्मराजव्रतम् समाप्तम् ॥

271

Sl. No : 14684 धात्रीकल्पः Ms. No : P.2268/22

Beginning :

नारदः—
भगवन् सर्वलोकेश लोकानुग्रहतत्पर ॥
विप्रभुक्तेर्वनभुवि विधिं ब्रूहि जनार्दन ॥
श्रीभगवानुवाच—
श्रृणु वक्ष्येवनभुवि द्विजसन्तर्पणे विधिम् ॥

End :

तथा धात्र्यां हरिश्चैव सदा तिष्ठति कार्तिके ।
धात्रीवनं समाश्रित्य यो नरः पुरुषोत्तमम् ।।
पूजयेत्स पुमान्नूनं मम + + + + ।।

Colophon :

वनभोजनविधिः समाप्तः ।।

272

Sl. No : 14685 धात्रीकल्पः Ms. No : P. 2579/5

Beginning :

श्री हंसः —

द्वादश्यां वा चतुर्दश्यां पौर्णमास्यामथापि वा ।
पञ्चम्यां वा महाप्रज्ञ वनभोजनमाचरेत् ।।
सर्वोपस्कारसंयुक्तं वृद्धैर्बालैश्च संयुतः ।।

End :

कृत्वैवं सकलं कर्म विष्णवे च समर्पयेत् ।
अश्वमेधसहस्रेषु वाजपेयशतेषु च ।।
यत्फलं समवाप्नोति तत्फलं वनभोजने ।।

Colophon :

इति श्री पाञ्चरात्रे ब्रह्महंससंवादे उत्सवकाण्डे वनभोजनविधिः सम्पूर्णः ।।

273

Sl. No : 14689 धात्रीकल्पः Ms No P 5572/15

Beginning :

आदौ पुण्याहं कृत्वा सङ्कल्पः । एवंगुणविशेषणविशिष्टायां शुभतिथौ मम + + + वनभोजनपूर्वकरक्षाहोमपुरस्सरधात्रीहोमाख्यं कर्म करिष्यमाणः तदङ्गं लक्ष्मीनारायणवास्तुकलशाराधनाख्यं कर्म करिष्यमाणः तदादौ स्वस्तिपुण्याह वाचनं करिष्ये ।

End :

कलशवस्त्रप्रतिमादानं गोदानं दीपदानं पायसदनं सालग्रामदानं वस्त्रदानं ताम्बूलदानं फलदानं दशदानं ब्राह्मणभोजनं यथाशक्ति भूहिरण्यं दद्यात् ॥

Colophon :

इति धात्रीहोमविधिः ॥

274

Sl. No : 14698 धात्रीकल्पः Ms. No : P. 8000/8

Beginning :

पितामह महाप्रज्ञ सर्वविद्याविशारद ।
कार्तिके वनसंप्राप्य तत्कथं तद्वदस्व मे ।

भीष्मः —

शृणु राजन् प्रवक्ष्यामि कार्तिके वनभोजने ।
पूजायां चैव यत्पुण्यं तत्सर्वंनव भारत ॥

End :

तस्मात् सर्वप्रयत्नेन कार्तिके विष्णुतत्परः ।
पूजयेद्देवदेवेशं भोजयेद्ब्राह्मणानपि ।।
तस्मात्पार्थ महाबाहो पूजयस्व सनातनम ।
एवं कृते महाराज सर्वसिद्धिर्भविष्यति ॥

Colophon

इति वनभोजनविधिः ॥

275

Sl. No : 14703 धारणपारणाव्रतम् Ms No : P. 920/4

Beginning :

गजोऽश्वमहिषच्छागगर्भिण्यः शकटस्तथा ।
दासीकुटुम्बवोढायाः प्रतिशुक्रो विनश्यति ।।

युधिष्ठिरः —

कृष्ण कृष्ण महाराज × × × ।
येन व्रतेन सर्वेश सर्वपापक्षयो भवेत् ।।
तद्व्रतं ब्रूहि सर्वेश × × × ।।

End :

तत्फलं लभते पुण्यं कृत्वा धारणपारणाम ।
यदिच्छसि महाराजन् शाश्वतीं गतिमात्मनः ।।
धन्यं यशस्यमायुष्यं पुण्यं पापप्रणाशनम् ।।

Colophon :

इति श्री विष्णुधर्मोत्तरपुराणे धारणपारणाव्रतकल्पं सम्पूर्णम् ।

276

Sl. No ; 14707 धारणपारणाव्रतम् **Ms. No : P. 6496/50**

Beginning :

युधिष्ठिर उवाच—

कृष्ण कृष्ण महाबाहो वासुदेव जनार्दन ।
नमस्ते पुण्डरीकाक्ष प्रसीद पुरुषोत्तम ।।
भीष्माभिवन्धबन्धज्ञ × × × ।

End :

युधिष्ठिरोऽपि राजर्षिः चक्रे एतन्महाव्रतम ।
विमुक्तः सर्वपापेभ्यः विष्णुलोकं स गच्छति ।।

Colophon :

इति विष्णुरहस्ये धारणपारणव्रतोद्यापनं समाप्तम् ।। (?)

277

Sl. No : 14714 धारणपारणाव्रतम् **Ms. No : P. 9946/6**

Beginning :

शुभतिथौ मम इह जन्मनि जन्मान्तरितदोषप्रायश्चित्तार्थं समग्रपापक्षयार्थं
मनोवाञ्छाफलसिध्यर्थं + + + + + + +

पारणव्रतकल्पोक्तप्रकारेण यावच्छक्ति ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ॥

End :

नमस्ते देवदेवेश नमस्ते लोकनायक ।
नमस्तेऽस्तु हृषीकेश लक्ष्मीनारायण प्रभो ।
पापोऽहं पापकर्माऽहं पापात्मा पापसम्भवः ॥
पाहि मां कृपया देव शरणागतवत्सल ॥

Colophon :

— — —

278

Sl. No : 14724 नरकचतुर्दशीव्रतम् Ms No : P. 2370/12

Beginning :

स्कन्दपुराणोक्तम् आश्वयुजकृष्णचतुर्दश्यामरुणोदये कर्तव्यम् । इष्टदेवता ब्राह्मणपूर्वकं पुत्रपौत्रकलत्रसहिततैलाभ्यङ्गव्रतं कर्तव्यं कल्पोक्तसर्वमङ्गला-वाप्तिद्वारा सल्लक्ष्मी.........

End :

एवं हरिर्वरं भौमः देवदेवं जगद्गुरुम् । (?)
भवत्विति वरं प्रादात् नरकायारिसूदनः ॥
तदा प्रभृत्याश्वयुजि चतुर्दश्यां प्रशस्यते ।
अभ्यङ्गमसिते पक्षे नरैः सर्वैः श्रिया युतैः ॥
(तैले लक्ष्मीर्जले गंगा पुष्पे विष्णुस्सनातनः ।
अनुलेपश्शिवः साक्षात् तस्मात्सर्वाणि कारयेत् ॥)

Colophon :

इति श्री स्कान्दपुराणे नरकचतुर्दशीकल्पः समाप्तः ॥

279

Sl. No. 14720 नवचिरञ्जीविव्रतम् Ms. No : P. 9951/02

Beginning :

अथातः सम्प्रवक्ष्यामि अब्दपूर्तिविधिक्रमम् ।
नृपाणामभिषिक्तानां बालानां तु विशेषतः ।

आयुष्कामेती मन्येषां (?) मङ्गलाचरणाय च ।
वर्षान्ते जन्मदिवसे मलमासे द्वितीयके ॥
जन्मर्क्षे वा जन्मतिथौ महोत्सवमथाचरेत् ॥

End :

द्विजेन्द्र भरताचार्य सर्वशास्त्रविशारद ।
शरणं त्वां प्रपन्नोऽस्मि कृपया कृप रक्ष माम् ॥
रेणुकेय महावीर्य कार्तवीर्यकुलान्तक ।
आयुः प्रयच्छ मे राम जामदग्न्य नमोऽस्तु ते ॥

Colophon :

इति चिरञ्जीविपूजा ॥

280

Sl. No : 14732 नवरात्रिकल्पः Ms. No. P. 13/1

Beginning :

नवरात्रिकलशस्थापनयन्त्रप्रकारः । प्रथमं त्रिकोणम् , तद्बहिः षट्कोणम् । तदुपरि वृत्तं तस्योपरि अष्टदळं । तद्बहिश्चतुष्कोणं, तत्र ग्रंथियुक्तत्रिशूलाङ्कितयन्त्रं लिखित्वा,

End :

न्यूनं वाऽप्यधिकं वाऽपि यन्मया पूजनं कृतम् ।
सर्वं तदस्तु संपूर्णं त्वत्प्रसादान्महेश्वरि ॥
इति प्रार्थ्यम् ।

Colophon

इति महानवमीपूजा ॥

281

Sl. No : 14737 ज्येष्ठालक्ष्मीव्रतम् Ms. No. P. 5849/3

Beginning :

श्री चण्डिकायै नमः । नवरात्रिपूजाविधानम् । ततो यागमण्टपं प्रविश्य अतितीक्ष्णमहाकायेति क्षेत्रपालं प्रार्थ्य स्योनापृथिवीति भूप्रार्थनम् । विष्णुशक्तिसमुत्पन्नेति भूमिं नमस्कृत्य, अपक्रामन्त्विति आसनं प्रोक्ष्य ॥

End :

पूजाजपाग्निकामाद्यैः सुकृतं यन्मयाऽर्चितम् ।
तत्फलं सत्फलंमेऽस्तु भुक्तिमुक्त्यर्थ साधनम ।।
× नूनं मय्य × कं वापि यन्मया मोक्षसाधनम् ।
सर्वं तदस्तु संपूर्णं त्वत्प्रसादात् प्रभो मम ॥
प्रार्थनम् ।।

Colophon :

इति महानवमीपूजाविधानं संपूर्णम ।।

282

Sl. No : 14743 नवरात्रकल्पः Ms. No : C. 3424/24

Beginning:

मेषारूढां रक्तवर्णां रक्तमाल्याद्यलङ्कृताम ।
चतुर्भुजां शक्तिशूलां गदावरदधारिणीम ॥
देवीं समर्चयेद्धीमान् प्रथमायां विशेषतः ।।

End :

सम्पत्सिद्धिकरीं देवीं सुभद्रां पूजयाम्यहम् ।।

सुवासिनीपूजा ।

मायामयीमनाद्यन्तां मातृकावर्णरूपिणीम ।
मनोज्ञां मञ्जुलाकारां महिषीं पूजयाम्यहम् ।।

Colophon :

— — —

283

Sl. No : 14744 नवरात्रकल्पः Ms. No : C. 3492/2

Beginning :

नवरात्रिकल्पोक्तरीत्या प्रतिपदमारभ्य महानवमीपर्यन्तं ध्यानश्लोकाः ।।

मेषारूढां रक्तवर्णां रक्तमाल्याद्यलङ्कृताम् ।
चतुर्भुजां शक्तिशूलगदावरदधारिणाम् ।।

End :

मायामयीमनाद्यन्तां मातृकावर्णरूपिणीम् ।
मनोज्ञां मञ्जुलाधारां महेशीं पूजयाम्यहम् ।
अस्यां सुवासिन्यां महेश्याख्यां दुर्गामावाहयामि ॥

Colophon :

— — —

284

Sl. No : 14746 नष्टदोरप्रायश्चित्तम् Ms. No : P. 2370/10

Beginning :

युधिष्ठिर उवाच—
अनन्तव्रतमाहात्म्यं कृत्स्नं कृष्ण मया श्रुतम् ।
भगवन् दोररूपेण विस्तृतीतिव मानवान् । (?)
दोरं प्रमादतो नष्टं यदि स्याद्भुतिभिर्नरैः ॥

End :

कल्पोक्तेन विधानेन पूर्ववद्व्रतमाचरेत् ।
ब्राह्मणान् भोजयेत्पश्चात् यथाशक्त्या × × × ।
× × स्यात् सर्वप्रयत्नेन प्रायश्चित्तमिदं बुधः ॥

Colophon :

इति दोरनष्टप्रायश्चित्तं समाप्तम् ॥

285

Sl. No. 14748 नष्टदोरप्रायश्चित्तम् Ms. No : P 4218/56

Beginning :

युधिष्ठिरः ॥
अनन्तव्रतमाहत्म्यं सर्वदेवमयं विभुम ।
दोररूपेण चानन्तो रक्ष्यन्तां त्रिजगद्गुरुः ॥
प्रमादाद्यदि नष्टं ते दोरकं ग्रन्थिसंयुतम् ।
तदा किं करणीयं स्यात् व्रतं त्रैलोक्यनामकम् ॥

End :

तद्दोषपरिहारार्थं गां दद्यात ब्राह्मणाय च।
वित्तशाठ्यं न कुर्वीत तस्माद्दोषापानुत्तये ॥
एवं शान्ति प्रकुर्वीत पूर्ववद्व्रतमाचरेत्।
प्रायश्चित्तमिदं कुर्यात् व्रतं सफलमश्नुते ॥

Colophon :

इति नष्टदोरप्रायश्चित्तविधि: समाप्त: ॥

286

Sl. No: 14749 नष्टदोरप्रायश्चित्तम् Ms. No: P. 5573/6

Beginning :

ऋषय ऊचु: —
उमामहेश्वरं नाम व्रतं सर्वप्रदं श्रुतम्।
वयं तत: कृतार्थश्च जग्मुराजन्मशुद्धय: ॥
भगवान दोररूपेण व्रतरूपेण शङ्कर:।
अनुगृह्य जगत्सर्वं अत्यन्तकरुणानिधि: ॥

End :

आयु: संक्षीयते तेजो बलपुष्टिविनाशकृत्।
तस्मात्सर्वप्रयत्नेन दोरे नष्टे विधिं चरेत् ॥
आयुष्यमतिसौभाग्यं आरोग्यमतिभूतिदम्।
व्रतस्य निष्कृति: प्रायश्चित्तमेवं समाचरेत् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे उमामहेश्वरनष्टदोरप्रायश्चित्तविधि: समाप्त: ॥

287

Sl. No : 14759 धारणपारणाव्रतम् Ms No : P 8165/41

Beginning :

पार्थस्युवाच —
देवदेव जगन्नाथ सर्वदेवनमस्कृत।

प्रोक्तं व्रतविधानं मे त्वया लोकहितैषिणा ।।
दोरे प्रनष्टे किं कार्यं व्रतिभिस्तद्वद प्रभो ।

End :

महेश्वर उवाच—

शृणु देवि परं गुह्यं यद्व्रतं तद्ब्रवीमि ते ।।
एवं कृते महादेवि व्रतपूर्तिः भवेद्ध्रुवम ।
पुत्रपौत्रैः परिव्रतः धनधान्यसमृद्धिमान् ।।
इह भुक्त्वा तु विपुलान् भोगान् सर्वसुखप्रदान् ।
अन्ते मम पदं याति पुरनावृत्तिवर्जितम् ।।

Colophon :

इति श्री स्कान्दपुराणे नष्टदोरप्रयश्चित्तविधिः सम्पूर्णः ।।

288

Sl. No : 14761 नष्टदोप्राहश्चित्तम् **Ms. No. P 8410/49**

Beginning :

श्री कृष्णः—

साधु पृष्टं त्वया राजन् वक्ष्यामि व्रतनिष्कृतिम् ।
इह लोके तु सर्वस्य रक्षार्थं श्रृणु तद्व्रयम ।
दोरे नष्टे महान् दोषः संभवेद्व्रतिनामिह ।
तस्मात् त्रिदोषशान्त्यर्थं प्रायश्चिंच विधीयते ।।

End :

कल्पोक्तेन विधानेन पूर्ववद्व्रतमाचरेत् ।
ब्राह्मगान् भोजयेत्पश्चात् यथाशक्ति च दक्षिणाः ।।
प्रायश्चिंत त कुर्याचेत् पीडा स्यात्तत्र भूयसी ।।
तस्मात्सर्वप्रयत्नेन प्रायश्चित्तमिदं चरेत ।।

Colophon :

इति नष्टदोरप्रायश्चित्तविधिः ।।

289

Sl. No: 14771　　**नष्टदोरप्रायश्चित्तम्**　　Ms. No: C. 3032/38

Beginning :

प्रमादाद्यदि देवेश नष्टे चानन्तदोरके ।
कथं कुर्यान्नरस्तस्य रक्षार्थं किमभीप्सितम् ॥
दोरे नष्टे महान् दोषः सम्भवेदुपपादकम् ।
तस्मात्तद्दोषशान्त्यर्थं प्रायश्चित्तं विधीयते ।

End :

न पूजयन्ति ये मूर्खाः एते नष्टे हि दोरके ।
दरिद्रव्याधिदुःखादिभोगिनो न विचारणा ॥
एवं यः कुरुते मर्त्यः पूजनं तस्य चादरात् ।
न भवेन् पापभागीच न दुःखं न भयानि च ॥

Colophon :

इति श्री भविष्योत्तरपुराणे नष्टदोरप्रायश्चित्तम्

290

Sl. No : 14774　　**नित्यगौरीव्रतम्**　　Ms. No : P. 8043

Beginning :

गौरीपजा । श्रीगौर्यै नमः । एवंगुणविशेषणविशिष्टायां शुभतिथौ मम उपात्त दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं गौरीपूजां करिष्ये ।

महापद्मवनान्तस्थे परमानन्दविग्रहे ।
सर्वभूतहिते मातः देहि मे परमेश्वरि ॥

End :

मेनकात्मजायै नमः ओं दोलारोहणम् । श्रीभवानीशङ्कराभ्यां नमः । समस्तराजोपचार देवोचार पूजाः समर्पयामि ॥

प्रार्थना—

पुत्रान् देहि श्रियं देहि सर्वमाङ्गल्यतां मम ।
देहि मे पतिभक्तिं च पार्वत्यै नमोऽस्तु ते ॥

Colophon

इति श्री स्कन्दपुराणे नित्यगौरीव्रतकल्पं सपूर्णम् ॥

291

Sl. No. 14776 नित्यसोमवारव्रतम् Ms. No. P. 8317/3

Beginning :

सोमवारव्रतं शम्भो करिष्ये तव सन्निधौ ।
निर्विघ्नं कुरु देवेश सर्वकामफलप्रद ।।

शिवाय नमः, रुद्राय, पशुपतये, नीलग्रीवाय, शर्वाय, शशिमौलये, कामारये नमः। × × × × × × ×
इति पुष्पाञ्जलिं दद्यात्। + + + ×

End :

तदङ्गं त्वत्प्रसादेन मामेवाप्नोत्यसंशयः।
यः श्रवयेत्पुण्यतमं पवित्रं
शृण्वन्ति प्राप्नोति फलं मनुष्याः ।
ये सोमसोमेति सदा शृण्वति
सोमेश्वरं ये सततं भजन्ते ॥
ये सोमवारव्रतमाचरन्ति
तेषां न जाने किमिदं फलं स्यात् ॥

Colophon

इति पूजाविधानम् ।।

292

Sl No. 14777 निमिषाम्बाव्रतम् Ms. No: P 4681

आसनप्रणायामादि सङ्कल्प्य एवंगुणेत्यादि शुभतिथौ अस्माकमित्यादि निमिषाम्बादेवतामुद्दिश्य निमिषाम्बाप्रीत्यर्थं सम्भावितनियमेन संभवद्भिः पदार्थैः संभवद्भिरुपचारैः यावच्छक्ति ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ॥

End :

बन्धुभिः स्वजनैर्युक्तः आनन्दाश्रुविलोचनः।
स्ववंशस्येष्टदां देवीं निमिषाम्बां सदा यजेत् ।।

इति विमलचरित्रो विश्ववन्द्यो विरञ्चिः
हिमगिरिसुतायाः शम्भुरङ्कस्थितायाः ।
अवददमरमौलिं नारदं संविदित्वा
अपचितमहिमानं ह्यरूनिकायाश्च गौर्याः ॥ (?)

Colophon:

इति श्री ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे मौक्तिकोपाख्याने निमिषादेवीपूजाविधानं नाम पञ्चविंशोऽध्यायः ॥

293

Sl. No. 14782 निरशनभानुवारव्रतम् Ms. No: P. 6807/2

Beginning:

अथ निरशनार्कवारव्रतविधिरुच्यते ।
पूर्वेद्युरेकभुक्तं स्यादुपवासो रवेर्दिने ।
पारणं सोमवारे स्याद्दिनत्रययुतं व्रतम् ॥

तत्रादौ माघभानुवाराद्यनुकूलशुभदिने स्नानादिशुद्धिसम्पाद्य पुण्याहं वाचयित्वा + + + + व्रतमिदं कुर्यादुद्यापनञ्च ।

End:

कलौ युगे तु मर्त्यानां नारीणां च विशेषतः ।
रजोदोषहरं पुण्यं भुक्तिमुक्तिप्रदायकम् ॥
बहुनात्र किमुक्तेन भानुचण्डीगणेश्वराः ।
विशिष्यन्ते कलौ गौरि क्षिप्रसिद्धिप्रदो रविः ॥

Colophon:

इति श्री स्कन्दपुराणे कलिधर्मोत्तरे सौरधर्मे निरशनार्कवारव्रतकथाश्रवणं समाप्तम् ॥

294

Sl. No: 14785 निरशनभानुवारव्रतम् Ms. No: P. 8165/36

Beginning:

एवंगुणविशेषणविशिष्टायां शुभतिथौ मम इह जन्मनि जन्मान्तरसहस्रेषु

बाल्ययौवनकौमारवार्धकेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनोवाक्कायकर्मसु सम्भावित-
महापातकादिसमस्तपापक्षयद्वारा इष्टकामार्थसिद्ध्यर्थं श्रीसूर्यनारायणप्रीत्यर्थं
सम्भवितनियमेन सम्भवद्द्रव्यैः अपक्वभानुवासरव्रताङ्गं करिष्ये ॥

End :

विनतात्मज देवेश कर्मसाक्षिन सुरेश्वर ।
गृहाणार्घ्यं मया दत्तं अरुणा × × ।
सहस्ररश्मिपाणये नमः । विनतात्राताय नमः । अर्घ्यम् ।
विनायक नमस्तुभ्यं भक्ताभीष्टप्रदायक ।
गृहाणार्घ्यं मया दत्तं संसारभयनाशन ॥

Colophon :

इति अपक्वभानुवासरव्रतं संपूर्णम् ॥

295

Sl. No. 14792 निरशनभानुवारव्रतोद्यापनम् Ms. No : P. 2681/13

Beginning :

निरशनभानुवारोद्यापनविधिः । लैङ्गपुराणे सूतः—
उद्यापनं च लोकेश केन रूपेण कारयेत् ।
कस्मिन्नासीत् तदा कन्या का पूजा वद शङ्कर ।
किं दानं किं फलं द्रव्यं कस्मै देयं प्रियं वद ॥
ईश्वर उवाच—
अन्नवर्जार्कवारस्य उद्यापनविधिं शृणु ॥

End :

सर्वपापविनिर्मुक्तः भविष्यति न संशयः ।
ज्ञानाज्ञानकृतं पापं स्पृष्टास्पृष्टसमुद्भवम् ।
तत्सर्वं नाशमायाति सूर्यलोके महीयते ॥

Colophon :

इति श्री भविष्योत्तरपुराणे उमामहेश्वरसंवादे अन्नवर्जार्कवारोद्यापनविधिः ॥

296

Sl. No · 14796 नृसिंहचतुर्दशीव्रतम् Ms. No : P. 4179/1

Beginning :

द्वौ विदारणकर्माढ्यौ द्वौ चन्द्रधरणोद्यतौ ।
शंखचक्रधरौ द्वौ च द्वौ च बाणधनुर्धरौ ॥
खड्गखेटधरौ द्वौ च द्वौ गदापद्मधारिणौ ।
पाशाङ्कुशधरौ द्वौ च द्वौ रिपोर्जानुमस्तके ॥

End :

वैशाखे च चतुर्दश्यां निराहारो महेश्वर ।
भोक्ष्यामि पुण्डरीकाक्ष अर्पयामि जगत्पते ॥
इत्युपवाससमर्पणम् ।
उपोष्य जागरं कृत्वा नारसिंहं महाव्रते ।
कुर्वन्ति ये नरास्तेषां सम्पदं पुत्रपौत्रकम् ॥
इत्यर्चनविधिः ।

Colophon ·

इति नृसिंहकल्पः ॥

297

Sl. No : 14801 नृसिंहचतुर्दशीव्रतम् Ms. No P 5920/20

Beginning :

चिन्तयेऽहं जगन्नाथं सर्वलोकैकपूजितम् ।
करालवदनं वज्रदंष्ट्रं बद्धनखायुधम् ॥
नृसिंहाय नमः ॥ ध्यानम् —
लक्ष्मीमालिङ्ग्य वामाङ्गे विभूतिभिरुपासितम् ।
आगच्छ देवदेवेश भक्तानां वरदो भव ॥
आवाहनम् ॥

End :

वैशाखे तु चतुर्दश्यां निराहारोऽस्मि केशव ।
परेऽह्नि तु भोक्ष्यामि व्रतं मे सफलं कुरु ॥
व्रतसमर्पणम् । + + +
हिरण्यं धान्यदानं च अन्नदानादि कारयेत् ॥

Colophon :

इति श्री स्कान्दपुराणे नृसिंहजयन्तीव्रतकल्पः समाप्तः ॥

298

Sl. No ; 14813 नृसिंहचतुर्दशीव्रतम् **Ms. No : P. 8410/2**

Beginning :

द्वौ विदारणकामाख्यौ द्वौ चन्द्रोद्धरणामृतौ ।
शङ्खचक्रधरौ द्वौ च द्वौ च बाणधनुर्धरौ ॥
खड्गखट्वधरौ द्वौ च द्वौ गदापद्मधरिणौ ।
पशांकुशधरौ द्वौ च द्वौ रिपोर्जानुमस्तके ॥

End :

तस्मात्सर्वप्रयत्नेन मानवो बुद्धिमान् यदि ।
नारसिंहजयन्त्याख्यव्रतं सम्यक्समाचरेत् ॥
इतीदं कथितं पुण्यं आयुरारोग्यवर्धनम् ।
शृणुयात् श्रावयेद्वापि सपुमानघकारकः ॥ (?)

Colophon :

इति श्री नारदीयपुराणे नृसिंहजयन्तीव्रतकल्पः समाप्तः ॥

299

Sl. No : 14822 नृसिंहचतुर्दशीव्रतम् **Ms. No : P. 9993/15**

Beginning :

देवदेवं जगन्नाथं सर्वलोकैकपूजितम् ।
करालवदनं वज्रदंष्ट्रं × द्र नखायुतम् ॥

ध्यानम् —

लक्ष्म्यालिङ्गितवामाङ्गं विभूतित्रिरुपासितम् ।

आगच्छ सर्वलोकेश भक्तानां वरदो भव ॥

आवाहनम् ।

End :

राधे शुक्लचतुर्दश्यां सायङ्काल उदाहृते ।

स्वातियुक्ते मदन्वारे प्रादुरासीन्नृकेसरी ॥

वज्रनखायविद्महे तीक्ष्णदंष्ट्राय धीमहि ।

तन्नो नारसिंहः प्रचोदयात् ।

Colophon :

इत्यर्चनविधिः ॥

300

Sl. No : 14829 पक्षप्रदोषव्रतम् Ms. No : P. 9333/3

Beginning :

सनत्कुमार उवाच ।

त्रयोदश्यां प्रदोषे तु सोपहारं महेश्वरम् ।

दृष्ट्वा तु मुच्यते पापैः ब्रह्महत्यादिभिर्नरः ॥

यस्मिन् प्रदोषे देवेशं विधिनाभ्यर्च्य शङ्करम् ।

वाजपेयस्य यज्ञस्य फलं प्राप्नोति पुष्कलम् ॥

End :

बहुनात्र किमुक्तेन श्लोकार्धेन ब्रवीम्यहम् ।

ब्रह्महत्याशतं वाऽपि शिवपूजा विनाशयेत् ।

मया कथितमेतत्ते प्रदोषे शिवपूजनम् ।

रहस्यं सर्वजन्तूनां अत्र नास्त्येव संशयः ॥

Colophon :

इति श्री सनत्कुमारागस्त्यसंवादे पक्षत्रयोदशीकल्पः समाप्तः ॥

301

Sl. No. 14837 **प्रदोषव्रतोद्यापनम्** **Ms. No : P. 2268/16**

Beginning :

अनुज्ञा ॥ मया आचरिष्यमाणस्य प्रदोषव्रतस्य साङ्गफल + + अनुगृहाण ॥ विघ्नेश्वरपूजा । संकल्पः । पुण्याहनान्दी । पञ्चगव्येन प्रतिमाशुद्धिः । आचार्यवरणं ऋत्विग्वरणम् । पीठपूजा—

प्रवाळमौक्तिकशिवलिङ्गदानानि पञ्च कृत्वा—

उद्वासने कृतेऽप्येतत् कृतकृत्यो भवेन्नरः ।
इह लोके सुखीभूत्वा अन्ते सायुज्यमाप्नुयात् ॥

Colophon :

इति प्रदोषव्रतोद्यापनविधिः समाप्तः ॥

302

Sl. No : 14838 **प्रदोषव्रतोद्यापनम्** **Ms No : P. 2268/29**

Beginning :

वैद्यारण्ये महाक्षेत्रे सनको मुनिभिर्वृतः ।
पृच्छतां तु मुनीन्द्राणां प्रदोषोद्यापनं जगौ ॥
प्रदोषस्य व्रतस्यास्य महाभाग्यव्रतस्य च ।
उपक्रमे दिने चैवोत्सर्जनदिने पुनः ॥

End

तस्माद्व्रतं तु कर्तव्यं पुरुषार्थैच्छहेतवे ।
श्रुत्वा महादेवसंघात् सनकः शङ्करालये ॥
शिष्याणां तु हितार्थाय प्रोक्तवान् दयया स्वयम् ॥

(शिवलिङ्गदानं—

शंभो प्रसीद देवेश सर्वलोकेश्वर प्रभो ।
तव मूर्तिप्रदानेन मम सन्तु मनोरथाः ॥)

Colophon

इति भविष्योत्तरपुराणे द्वाविंशोऽध्यायः ॥

303

Sl. No · 14839 **प्रदोषव्रतोद्यापनम्** Ms. No : P. 4149/63

Beginning :

भगवन् देवदेवेश मम प्राणादिनायक ।
त्रयोदशीव्रतस्यास्य उद्यापनविधिः कथम् ॥
ईश्वरः—
साधु पृष्टं महादेवि सर्वलोकोपकारकम ॥
त्रयोदशीव्रतस्यास्य वक्ष्याम्युद्यापनं शृणु ॥

End :

एवं हि कथितं विप्र नन्दिकेशेन भाषितम् ।
सनत्कुमारमुनये विस्तरात्प्रोच्यते मया ॥
यः शृणोति सदा लोके शिवलोकमवाप्नुयात् ॥

Colophon :

इति स्कान्दे पुराणे सनत्कुमारसंहीतायां प्रदोषव्रतोद्यापनं नाम षोडशोऽध्यायः ॥

304

Sl. No : 14843 **पर्युषितभानुवारव्रतम्** Ms. No : P, 7958/21

Beginning :

मकरे समनुप्राप्ते रवौ मङ्गलवासरे
सुवासिनीकृतस्नानः धृतधौताम्बरः शुचिः ॥
सर्वं पर्युषितं चैव भुञ्जीयान्यत सुवती ।
व्रतभोमे दिनं चैव यावद्वर्षं च तद्व्रतम ॥

End

एतत्पर्युषितं स्याद्भौमवारव्रतं महत् ।
पुत्रपौत्रास्तथाऽऽरोग्यं महालक्ष्मीप्रसादनः ॥

Colophon

इति भविष्योत्तरपुराणे पर्युषितभौमवारव्रतं संपूर्णम् ॥

305

Sl. No : 44844 पिठोरव्रतम् **Ms No C 429/7A**

Beginning :

देशकालौ स्मृत्वा, मम इह जन्मनि जन्मान्तरे च पुत्रपौत्राभिवृद्ध्यर्थं पिठोरव्रताङ्गभूतं सप्तमातृकासहितचतुष्षष्टियोगिनीमव्देवीपूजनमहं करिष्ये। + + कलशपूजनम्। शङ्खघटादि पूजयेत्। अथ ध्यानम्।

सप्तमातृकासहितचतुष्षष्टियोगिनीनामान्यरूपयेत्। (?)

अथ चतुष्षष्टिनाम –

दिव्ययोगी महायोगी सिद्धयोगी गणेश्वरी।
प्रेताक्षी शङ्करी रौद्रवेताली भूतभाण्डरी॥

End :

एवमिन्द्राणि कथितं पिठोराख्यं महाव्रतम्।
भक्त्या कुर्वन्ति या नार्यः कृतकृत्या भवन्ति ताः॥
सुखसौभाग्संयुक्ताः चतुष्षष्ट्या प्रसादतः।

Colophon :

— — —

306

Sl. No : 14845 पीठनारीव्रतम् **Ms. No C 4291/12**

Beginning

सुसुखश्रेत्यादि पूर्वोक्त एवंगुणविशेषणविशिष्टायां .... मम+ + + सुखसौभाग्यादि प्राप्त्यर्थं पीठनारीपूजनमहं करिष्ये।

अथ ध्यानम्।

आगच्छतु भराढ्योऽत्र स्थाने तिष्ठति सादरम्।
यावद्व्रतं समासाद्य तामुत्त्वं सन्निधो भव॥ (?)

End :

गच्छ राथ भराढ्यो वै स्वस्थानं जगदाम्बिके। (?)
महादेव्या सुरश्रेष्ठ कुरुध्वं नु क्षमा मम॥

विसर्जनम्। यस्य स्मृत्या ...... अनेन पिठोरपूजा .... पीठनारीः प्रीयन्ताम्। + + + + + + +

रूं देही जयं देहि यशो देहि द्विषो जहि ।
पुत्रान् देहि धनं देहि सर्वकामामांश्च देहि मे ।।

Colophon :

— — —

307

Sl. No : 14846 	**पूर्णिमाचन्द्रव्रतम्** 	**Ms. No : P. 2268/27**

Beginning :

अनुज्ञा । विघ्नेश्वरपूजा । सङ्कल्पः । शुभतिथौ रोहिणीसमेतचन्द्रमसमुद्दिश्य चन्द्रमाःप्रीत्यर्थं वन्ध्यादोषनिवृत्तिद्वारा अचिरादेव जिवत्सुपुत्रावाप्त्यर्थं राकाचन्द्रोदयसमये रोहिणीसहितचन्द्रमसमुद्दिश्य ......

End :

प्रया तु भगवान् चन्द्र :सुरासरसुपूजितः ।
जीवत्सन्तानदानाय पुनरागमनाय च ॥
अस्मात्कूर्चात् रोहिणीसहितं चन्द्रं यथास्थानं प्रतिष्ठापयामि ।

Colophon :

— — —

3

Sl. No : 14849 	**फाल्गुणगौरीव्रतम्** 	**Ms. No : P. 1617/4**

Beginning :

दिनान्ते वा निशान्ते वा प्रातर्वाऽथ निशामुखे ।
कुम्भात्पूषा यदा मीने प्रवेशं कुरुते तदा ।।
अनुष्ठितं मुनिश्रेष्ठा· पुण्यमाहुर्व्रतोत्तमम ।।

End :

तस्मिन् गृहे यदा राज्यं कुबेरेण प्रचोदिताः ।
ववर्षुरुद्धना मेघाः कुण्डले कटकानि च ।।

मुक्ताप्रवालवैदूर्य रत्नानी विविधानि च ।
तानि दृष्ट्वा सुशीलाथ मुमुदे सह बन्धुभिः ।।

Colophon :

इति स्कान्दे व्रतरत्नाकरप्रकरणे गौरीन्द्राणीसंवादे फाल्गुनगौरीव्रतप्रशंसा नाम शतद्वयाधिक × × × दशोऽध्यायः ।।

309

Sl. No : 14850 बनशङ्करीव्रतम् **Ms. No : P. 9946/2**

Beginning :

एवंगुणेत्यादितिथौ मैम सकलइष्टकाम्यार्थसिध्यर्थं समस्तऐश्वर्याभिवृध्यर्थं पुत्रपौत्रादिवृध्यर्थं बनशंकरीदेवतामुद्दिश्य बनशंकरीदेवताप्रीत्यर्थं कल्पोक्तप्रकारेण यावच्छक्त्या ध्यानावाहनषोडशोपचारपूजां करिष्ये ।

End :

सर्वमातंगजमनास्सर्वसौभाग्यदायिनी ।
गृहाणार्घ्यं मया दत्तं सुप्रीता भव मेऽनघे ।
क्षीरार्णवसुते देवि क्षीरवर्णे सुवासिनि ।
गृहाणार्घ्यं मया दत्तं सर्वमंगलकारिणि ।
अर्घ्यम् । यस्य स्मृत्येति समर्पणम् ।

Colophon :

पूजाबिधानं संपूर्णम् ।

310

Sl. No : 14852 बलीन्द्रव्रतम् **Ms. No : P. 2370/13**

Beginning :

पुरा हिरण्यकशिपोः वंशे दानवसत्तमः ।
विदोर्वचन इत्याख्यः सर्वलोकेषु विश्रुतः ।।
भूलोकं स्ववशं कृत्वा स्वर्गलोकमवाप सः ।।

End:

भविष्येन्द्र सुराराते पूजेयं परिगृह्यताम् ।
दीनान्धकृपणेभ्यश्च दक्षिणां च × × × ।
तुलापुरुषदानाद्यैः यत्फलं लभते नरः ॥

Colophon:

इति श्री स्कन्दपुराणे नागरखण्डे बलीन्द्रपूजा समाप्ता ॥

311

Sl. No: 14856 **पीठनारीव्रतम्** **Ms. No. P. 8758/30**

Beginning:

युधिष्ठिरः—

देव देव जगन्नाथ पुराण पुरुषोत्तम ।
ऐश्वर्यं सन्ततिं पुत्रान् पशुधान्यधवानि च ।
केन वा लभेत मर्त्यो तद्ब्रूहि कृपया मम ॥

श्री कृष्ण उवाच—

शृणु देवि प्रवक्ष्यामि सर्वसम्पत्करं परम् ।
मम प्रीतिकरं पुण्यं इहामुत्र सुखप्रदम् ॥
कार्तिके शुक्लपक्षे प्रथमेऽह्नि सुखादितः ।
रात्रौ रुग्पूजयेद्भक्त्या बलिं भागवतोत्तमम् ॥

End:

तस्मात्सर्वप्रयत्नेन दिने तस्मिन् सुखादिभिः ।
गृहद्वारेथाङ्कः दि देहलीषु समाहितः ॥ (?)
पुष्पैः फलैश्चावकीर्य दीपावलिभिरर्चयेत् ।
तथैव प्रत्यहं वर्षं रमते तत्प्रमादतः ॥

Colophon:

इति श्री कृष्णप्रोक्तवरयुत्सवपूजाविधिः समाप्तः ॥

312

Sl. No; 14859 **बालादित्यव्रतम्** **Ms. No: P. 6000/47**

Beginning:

सत्राजित उवाच —

बालादित्यव्रतं ब्रूहि सर्वकामफलप्रदम् ।
सर्वपापहरं पुण्यं सर्वदानफलप्रदम् ॥
पुत्रपौत्रप्रदं नृणां स्त्रीणां चैव दिवाकर ।

श्री सूत उवाच —

End:

एवं कुर्याद्व्रतं विप्राः नारी वा सुसाहिता ।
सर्वकामानिह प्राप्य सूर्यलोकञ्च गच्छति ॥
एतत् शृणुध्वं सततं वाच्यमानं नरोत्तमैः ।
ते सर्वपापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

Colophon:

इति श्री पद्मपुराणे सत्राजितसंवादे बालादित्यव्रतं संपूर्णम् ॥

313

Sl. No: 14866 **बिन्दुद्वादशीव्रतम्** Ms No P 2868/15

Beginning:

स्कान्दे सूतः —

व्रतमन्यत्प्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः ।
सर्वपापहरं पुण्यं विष्णुप्रियकरं शुभम् ॥
सर्वसंपत्करं स्त्रीणां सर्वशत्रुविनाशनम् ।
पुत्रदं धनदं सर्वसिद्धिदं मोक्षदायकम् ॥
बिन्दुद्वादशिकं नाम द्वादशीव्रतमुत्तमम् ॥

End:

तेन पुण्यप्रभावेन सा नारी मोक्षगामिनी ।
एवं प्रभावं द्वादश्यां व्रतं पापप्रणाशनम् ॥

ये कुर्वन्ति भुवो लोके वा — धवां गताः ॥
तेषामियं गतिः साक्षात् विष्णुसायुज्यमाप्नुयात् ॥

Colophon :

इति स्कान्दपुराणे बिन्दुद्वादशीव्रतकल्पं सम्पूर्णम् ॥

314

Sl. No : 14866 पक्षप्रदोषव्रतम् Ms. No : P. 8410/25

Beginning :

ऋषयः—

वद सूत महाभाग सर्वशास्त्रार्थपारग ।
येन व्रतेन नारीणां सर्वपापक्षयो भवेत् ॥

सूतः—

शृणुध्वमृषयस्सर्वे व्रतानामुत्तमं व्रतम ।
बिन्दुद्वादशिकं नाम सर्वपापप्रणाशनम् ॥

End :

रूपलावण्यसम्पन्ना सर्वाभरणभूषिता ।
दिव्यं विमानमारुह्य वैकुण्ठमगमत्क्षणात् ॥
य इदं कीर्तयेन्नित्यं श्रावयेद्वा समाहितः ।
मुच्यते सर्वपापेभ्यः विष्णुलोकं स गच्छति ॥

Colophon :

इति बिन्दुद्वादशीव्रतं समाप्तम् ॥

315

Sl. No. 14869 बिन्दुद्वादशीव्रतम् Ms. No : P. 9760/23

Beginning :

श्रुतानि देवदेवेश व्रतानि विविधानि च ।
स्त्रीणा पातकनाशाय द्वादशीव्रतमाचरेत् ॥
सर्वपापविशुध्यर्थं उपवासमनुत्तमम ।
कार्तिक्यां शुक्लपक्षे तु द्वादश्यामुपवासयेत ॥

End :

ये कुर्वन्ति बुधा लोके नरो वाऽप्यथवाङ्गना: ।
तेषामियं गतिस्साक्षात् विष्णुसायुज्यमाप्नुयात् ॥

Colophon

इति श्रीस्कन्दपुराणे बिन्दुद्वादशीव्रतकल्प: सपूर्ण: ॥

316

Sl. No. 14879 — बिल्वव्रतोद्यापनम् — Ms. No. B. 1211/3

Beginning :

कैलासशिखरे रम्ये मुनिसिद्धनिषेविते ।
रत्नसिंहासने रम्ये सुखासीनं सहोमया ॥

पार्वत्युवाच—

देवेश सर्वलोकेश लोकानां हितकारक ।
संशयं परिपृच्छयामि बिल्वपत्रफलं वद ॥

End :

एवं कुर्याद्विधानेन शिवस्यातिप्रियं महत् ।
पुत्रपौत्रधनं धान्यं अन्ते कैवल्यमाप्नुयात् ॥
यद्व्रतं कारयेद्धीमान् पावयन्त्यवलोकितान् ।
ते सर्वे पापनिर्मुक्ता: यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्रीलिङ्गपुराणे उमामहेश्वरसंवादे बिल्पत्रव्रतोद्यापनं संपूर्णम् ॥

317

Sl. No : 14880 — बिल्वाष्टकतव्रतम् — Ms. No : P. 8410/48

Beginning :

अखण्डबिल्वपत्रैश्च पूजयेन्नन्दिशङ्करम् ।
तव पूजां करीष्यामि एकबिल्वंशिवार्पितम् ॥
त्रिदलं त्रिगुणाकारं त्रिणेत्रं च त्रियायुधम् ।
त्रिजन्मपापसंहारं एकबिल्वं शिवार्पितम् ॥

End :

मौक्तिककोटिसहस्रस्य वाजपेयशतैस्तथा ।
कोटिकन्याप्रदानेन एकबिल्वं शिवार्पितम् ॥
त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम् ।
त्रिजन्मपापसंहारं एकबिल्वं शिवार्पितम् ॥

Colophon :

— — —

318

Sl. No : 14881 फाल्गुणगौरीव्रतम् Ms. No : P. 2370/14

Beginning :

वरदाभयहस्तं च शङ्खचक्रगदाधरम् ।
विष्णुमूर्तिम् गृहाधीशं ध्यायेत् सिंहोपरिस्थितम् ॥
बुधाय नमः । ध्यानम् —
रौहिणेयं महाशान्तं भुक्तिमुक्तिप्रदायकम् ॥

End :

प्रीयतां बुधराजाय तुभ्यं मे बुधकेशव ।
प्रतिग्रहणमन्त्रः —
दुर्बुद्धिबोधजनितं नाशयिष्यत्यसौ बुधः ।
सौम्यस्त्वं सौम्यरूपस्त्वं करोतु शशिनन्दन ॥

Colophon :

इति बुधपूजाविधानं समाप्तम् ॥

319

Sl No 14884 निमिपाम्बाव्रतम् Ms. No : P 5984/18

Beginning :

बुधाष्टमीव्रतस्यास्य विधानं कथितं मया ।
उद्यापनव्रतं ब्रूहि व्रतसंपूर्तिकारकम् ॥

श्री कृष्ण उवाच —

उद्यापनविधिं वक्ष्ये व्रतस्यास्य विधानतः ॥

End :

एवं यः कुरुते मर्त्यः व्रतमुद्यापनान्वितम् ।
त्रिविष्टकुलसंमुक्तः विष्णुलोके महीयते ।।

Colophon :

इति श्री भविष्योत्तरपुराणे बुधाष्टमीव्रतं समाप्तम् ।।

320

Sl. No : 14886 बुधाष्टमीव्रतम् **Ms No : P. 6298/19**

Beginning :

श्रीकृष्ण उवाच —
बुधाष्टमीव्रतं भूयो ब्रवीमि श्रृणु पाण्डव ।
येन चीर्णेन नरकं न पश्येन्मानवो क्वचित् ।।
पुरा कृतयुगस्यादौ वीलिराजा बभूव ह ।
बन्धुभृत्यसुहृन्मित्रमन्त्रिभिः परिवारितः ।।

End

तत् श्रुत्वा चिन्तयाऽऽविष्टः चिरं स्थित्वा जगाद ताम् ।
धर्मराजा समासीनां प्रियां प्राणधनेश्वरीम् ।।
इतस्त्वं सप्तमेऽतीते जन्मनि ब्राह्मणी शुभा ।
आसीदस्मिंस्तया सम्यक् अष्टमी पर्युपासिता ।।
बुधाष्ट × × × × × × × ।।

Colophon :

— — —

321

Sl. No. 14890 बुधाष्टमीव्रतम् **Ms. No : P. 8165/7**

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ मम इह जन्मनि जन्मान्तरेषु चौर्यादि-
जनितपपमस्तपापक्षयद्वारा धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्ध्यर्थं बुधग्रहमुद्दिश्य
बुधप्रीत्यर्थं बुधाष्टमीव्रतप्रयुक्तबुधपूजां करिष्ये ।

End :

दानमन्त्रः—अथ प्रतिग्रहमन्त्रः—

बुधोऽसौ प्रतिगृह्णातु बुधोऽसौ प्रददाति च ।

बुधस्तु तारकोभाभ्यां बुधाय च नमोनमः ।

पीतवस्त्रद्वययेक्तां सहिरण्य मनोरमाम् ।

प्रतिमन्ते प्रदास्यामि मामुद्धरबुधग्रह ॥

प्रतिमादानम् ॥

Colophon :

इति बुधाष्टमीव्रतविधिः ॥

322

Sl. No : 14897 बुधाष्टमीव्रतोद्यापनम् Ms. No. P. 2370/28

Beginning

युधिष्ठिरः—

बुधाष्टमीव्रतस्यास्य विधानं कथितं त्वया ।

उद्यापनविधिं ब्रूहि व्रतसंपूर्णकारणम् ॥

श्रीकृष्ण उवाच—

उद्यापनविधिं वक्ष्ये व्रतस्यास्य समासतः ।

End :

कर्णिकाकेसरोपेतं कुर्याच्चैतेसतण्डुलैः ।

तन्मध्ये लक्षणोपेतं जलयुक्तं कुशान्वितम् ॥

कुम्भं तस्योपरि स्थाप्य कांस्यभाजनमुत्तमम् ॥

Colophon :

— — —

323

Sl. No. 14906 बृन्दावनतुलसीपूजाव्रतम् Ms. No : P. 8410/39

Beginning :

सङ्कल्प्य चातुर्मास्यस्य संपूर्णसमग्रफलावाप्त्यर्थं क्षीराब्धिशयश्रीमहाविष्णु

बोधनार्थं समस्तपापक्षयद्वारा श्रीमहाविष्णुप्रीत्यर्थं बृन्दावनपूजां करिष्ये ।

दिव्यरूपधरां देवीं दिव्याभरणभूषीताम ।

या दृष्टा निखिलाघसङ्घशमनी दत्वा वपु:पावनी

रोमाण्यामनिन्तिताति रशनी संत्रातकर्त्रांशिनि ।

सत्यासत्याविधायिनी भगवत: कृष्णस्य सन्तर्पिनी

न्यस्ता यश्चरणे विमुक्तिफलदा तस्यै तुलस्यै नम: ।।

Colophon :

इति श्री पद्मपुराणे बृन्दावनतुलसीपूजाविधिः ।

324

Sl. No. 14907 बृहद्गौरीव्रतम् Ms. No : P. 2209/5

Beginning :

सूत उवाच—

पुरा कृतयुगे राजन् सुमित्रो ब्रह्मसत्तम: ।

बृहद्गौरीव्रतमिदं कृत्वा तु श्रियमाप्नुयात् ।।

राजा उवाच—

विधानं कीदृशं तस्य किं दानं का च पुजना ।

का तिथि: केन चाराध्या तद्यन्मे ब्रूहि ब्रह्मज ।।

End :

शत्रुसन्धं निहन्त्याशु प्राप्तवान् राज्यमोचना (?)

पुत्रपोत्रै: परिव्रितो धनधान्यादिसम्पदा ।

अन्ते शिवपुरं प्राप्य शिवसायुज्यमाप्नुयात् ।

य: शोभनं व्रतं दृष्ट्वा ऐश्वर्यं प्राप्तवान् सदा ।।

Colophon :

इति श्री भविष्योत्तरपुराणे गौरीकाण्डे बृहद्गौरीव्रतकल्पं सम्पूर्णम ।।

325

Sl. No; 14908 बृहद्गौरीव्रतम् Ms. No: P. 5293/9

Beginning :

ऋषिकन्यां प्रति विजय उवाच —

अथान्यत् बृहतीगौरीव्रतं वक्ष्यामि कन्यके ।
मासि भाद्रपदे कृष्णतृतीयायां च तद्व्रतम् ॥
आनयेत् बृहतीं गौरीं शाखिमूलसमन्विताम् ॥
निक्षिप्य देवनां वेद्याः तस्याधस्ताद्ध्वजस्तथा ॥
आनीय सहितानाद्यं गौरीं तां प्रविसर्जयेत् ।

End :

आहूता हि मया देवि पूजताऽसि मया शुभे ।
× × × × × ब्राह्मणकन्यका ।
पतिमाजीवयामास निर्भर्त्स्य यमकिङ्करान् ॥
× × × × यास्यन्ति परमां गतिम् ।

Colophon

इति श्री स्कान्दपुराणे बृहतीगौरीव्रतं समाप्तम् ॥

326

Sl. No · 14913 बृहद्गौरीव्रतम् Ms. No : C. 3032/18

Beginning :

श्री कृष्ण उवाच —

चैत्रे भाद्रपदे मासे रूपसौभाग्यसम्पदा ।
तृतीयात्रयमेतन्मे कृष्णसौभाग्यमेव च ॥
गौरी मिमाय सलिलानि —आवाहनम् ।
कीमर्थं भक्तिरूपेण आसयित्वा उमाहितः ।
मम भक्ति सवस्त्रं च आसनं प्रतिगृह्यताम् ॥

End :

अवैधव्यं भवेत् स्त्रीणां पुत्रसौभाग्यसम्पदाम् ।
विजयं पुष्टिकामायुःप्राप्नुयादन्यवांछितम् ॥
इत्येतद्व्रतमाख्यातं पापेभ्यो मुच्यते नरः ।
तत श्रुत्वा पाण्डवाश्चैव व्रतं कुरु महीपते ॥

इति स्कान्दपुराणे वृहद्गौरीव्रतं सम्पूर्णम् ॥

Colophon

327

Sl. No : 14914 भक्तीश्वरव्रतम् Ms. No P 3896

Beginning :

एवंगुणविशेषणविशिष्टायां × × × भक्तीश्वरव्रतं करिष्ये । संकल्प्य, कलशपूजां करिष्ये । गणपतिपूजां करिष्ये ।

सद्योजातं त्रिणेत्रं सकलसुरततुं कोटिसूर्यप्रकाशं
+ + + + चिन्तयेत् पञ्चवक्त्रम् ॥

End :

इति सूतवचश्श्रुत्वा ऋषयस्तुष्टमानसाः ।
सर्वेभ्यो ऋषिपत्नीभ्यः कारयामासुरीश्वरम ।
तदाप्रभृति लोकेऽस्मिन् प्रसिद्धमभवत् क्षितौ ॥

Colophon :

इति श्री भविष्योत्तरपुराणे उमामहेश्वरसंवादे भक्तीश्वरव्रतकल्पं संपूर्णम् ॥

328

Sl. No ; 14917 भीष्मपञ्चकव्रतम् Ms. No : P. 5293/25

Beginning :

नारद उवाच—

देव देवाखिलं प्रोक्तं व्रतानामुत्तमं व्रतम् ।
कार्तिके कार्तिके मासि प्रयत्नाद्भीष्मपञ्चकम् ॥

विधानं तस्य च स्पष्टं फलं च सुरसत्तम ।
कथयस्व प्रसादेन मुनीनां हितकाम्यया ॥

End :

मुच्यते पातकैः सर्वैः श्रुत्वैतद्भीष्मपञ्चकम ।
सा सती पत्यनुज्ञाता विधवा च ततः पुग ॥
मुच्यते पातकैः सद्यः विष्णुलोकं स गच्छति ।
कुर्वन्ति भीष्मपञ्चाख्यं ते यांति परमां गतिम् ॥

Colophon ;

इति श्री विष्णुरहस्ये ब्रह्मनारदसंवादे भीष्मपञ्चकव्रतं समाप्तम् ॥

329

Sl. No · 14918 भीष्मपञ्चकव्रतम् Ms No : P. 6496/17

Beginning :

नारद उवाच —
यदेतदखिलानां च व्रतानामुत्तमव्रतम् ।
विधानं तस्य विख्यातं फलं च सुरसत्तम ॥
कथयस्व प्रसादेन मुनीनां हितकाम्यया ।

End :

इति व्रतं नरैः सर्वैः कुर्वन्तु सततंत्विति ।
सकृदाचरणादेव कांक्षितं तु फलं भवेत् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे ब्रह्मनारदसंवादे भीष्मपञ्चकव्रतं समाप्तम् ॥

330

Sl. No : 14919 भीष्मपञ्चकव्रतम् Ms No : P. 9760/30

Beginning :

नारद उवाच –
यदेतदखिलानां च व्रतानामुत्तमं व्रतम् ।
सर्वपापप्रशमने विख्यातं सुरसत्तम ॥
कथयस्व + + + + + + ॥

ब्रह्मोवाच —

वक्ष्यामि परमं पुण्यं व्रतं व्रतवतां वर ।

\+ + + + +

तथा सर्वव्रतनां च वरं वै भीष्मपञ्चकम् ।

\+ + + + +

कार्तिकस्य महापुण्ये स्नात्वाऽऽचम्य यथाव्रतम् ॥

End :

इदं व्रतं नरैस्सर्वैः कारयत्वेति चोदितः ।
तथैव कारयामास स्वयं चैवाकरोत्तथा ॥
ब्रह्महत्याविनिर्मुक्तः अन्ते विष्णुपदं ययौ ।
सकृदाचरणादेव काशीयात्राफलं भवेत् ॥

Colophon .

इति भविष्योत्तरपुराणे ब्रह्मनारदसंवादे भीष्मपञ्चकव्रतोद्यापनविधिः समाप्तः ॥

331

Sl. No : 14921 मङ्गलगौरीव्रतम् Ms No : P. 1720/8

Beginning:

एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ मम दीर्घसौमङ्गल्याभिवृद्ध्यर्थं भविष्योत्तरपुराणोक्तप्रकारेण .... मङ्गलगौरीपूजां करिष्ये ॥

End :

सर्वसंपत्प्रदे देवि सर्वसौभाग्यदायिनि ।
सर्वकामप्रदे देवि मम कामप्रदा भव ॥
इति प्रार्थनम् ॥

Colophon :

इति मङ्गलगौर्यर्चनाविधिः ॥

332

Sl. No: 14926 मङ्गलगौरीव्रतम् Ms. No: P. 7143/4

Beginning:

आगमार्थन्तु देवानां इति घण्टानादं कृत्वा पूर्वोक्तएवंगुणविशेषणविशिष्टायां शुभतिथौ विशेषेण मम ....मङ्गलगौरीप्रसादसिध्यर्थं............. षोडशोपचारपूजां करिष्ये ।।

End:

दारिद्र्यं परिहृत्याशु सौमङ्गल्यं प्रयच्छ मे ।

उपायनम् ।।

गिरिजा प्रतिगृह्णाति गिरिजा वै ददाति च ।

गिरिजा तारकोभाभ्यां गिरिजायै नमो नमः ।।

Colophon:

इति पूजाविधिः ।।

333

Sl. No. 14932 म लगौरीव्रतम् Ms. No: P. 8410/53

Beginning:

विवाहप्रथमे वर्षे पालाशपीठोपरि गौरीं निधाय पूजामारभेत ।

कैलासशिखरावासे शिववामाङ्कवासिनि ।

कामिताशेषकल्याणदायिनीं गिरिजां भजे ।।

End:

महादेवि गृहीत्वा तु मयाऽर्पितमिदं शुभम् ।

दारिद्र्यं परिहृत्याऽऽशु सौमङ्गल्यं प्रयच्छ मे ।।

दानम्—

गौरिजः प्रतिगृह्णातु गौरिजो वै ददाति च ।

गौरिजस्तारकोभाभ्यां गौर्यै ते च नमो नमः ।।

Colophon:

इति पूजाविधिः ।।

334

Sl. No : 14951 मङ्गलगौरीव्रतम् Ms No C 4291/4A

Beginning :

श्रावणमासि शुक्लपक्षे भौमवासरे शुभदिने, विवाहोत्तरं सौभाग्यवती नारी स्नात्वा + + उपविश्य + + अद्येत्यादि मम इह जन्मनि जन्मान्तरे वा सौभाग्यफलप्राप्त्यर्थं + + मङ्गलगौरीव्रताङ्गगौरीपूजनमहं करिष्ये। + + प्रतिमां स्थापयित्वा पूजयेत्। कलशस्य मुखे विष्णुरित्यादि।

जयन्ती मङ्गला काली – – कपालिनी।

दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥ इत्यनेन षडङ्गन्यासः।

End :

नमोऽस्तु मङ्गलागौर्यै देहि मे सुखसंपदम्।

अवियोगश्च भर्तुश्च देहि मे जन्मजन्मानि।

इति प्रार्थना। + + + + + + +

फलैष्षोडशभिर्युक्तं वायनं हि द्विजातयः।

सदक्षिणं सताम्बूलं व्रतसम्पूर्णहेतवे।

वायनमन्त्रः।

Colophon :

— — —

335

Sl. No : 14952 मज्जनशनिवारव्रतम् Ms. No. P. 7958/14

Beginning :

आदित्ये मकरे प्राप्ते शनेर्वारो यदा भवेत्।

तदारभ्य प्रकुर्वीत प्रतिवारं तु मज्जनम् ॥

भोजयेच्चापि मृष्टान्नैः लेह्यचोष्यसमन्वितैः।

आयुरारोग्यमैश्वर्यं श्रियं पुत्रश्च विन्दति ॥

Colophon :

इति श्री भविष्योत्तरपुराणे मज्जनशनिवारव्रतं संपूर्णम् ॥

336

Sl. No 14953 **मत्स्यजयन्तीव्रतम्** Ms. No: P. 277/1

Beginning:

पार्वत्युवाच —

प्राणेश्वर नमामि त्वां लोकोद्धारणकारण ।
पापं जन्मान्तरे वाऽपि अस्मिन् जन्मनि वा तथा ॥
येन चीर्णेन नरकं न पश्यन्तीति तद्वद ।

ईश्वर उवाच —

वक्ष्यामि परमं गुह्यं सर्वपुण्यप्रदं शुभम् ।
एकान्तभवने देवि पृच्छन्त्यास्तत् शृणु ।। (?)
विष्णोर्मत्स्यावतारस्य तिथौ यज्ञफलप्रदे ।
चैत्रे तु कृष्णपञ्चम्यामुपोष्य हरिमर्चयेत् ॥

End:

इति देववचः श्रुत्वा पार्वती करुणान्विता ।
लोके प्रख्यापयामास व्रतं पापप्रणाशनम् ॥

Colophon:

इति श्री भविष्योत्तरपुराणे मत्स्यजयन्तीव्रतकल्पः समाप्तः ॥

337

Sl. No: 14960 **मथनद्वादशीव्रतम्** Ms. No: P. 5574/15

Beginning:

तुलस्यमृतजन्मा श्रीस्सदा त्वं केशवप्रिये ।
केशवार्चनयोग्ये मे वरदा भव सर्वदा ॥

ध्यायामि ।

कृष्णानन्दाश्रुसंभूते वरदे तुलसि स्वयम् ।
त्वामद्यावाहयाम्यत्र कमलापतिवल्लभे ॥

End :

एवं क्रमेण सा कन्या कृत्वा व्रतमनुत्तमम् ।
इह भुक्त्वाऽधिकसुखं अन्ते स्वर्गं जगाम सः ॥
ये पठन्तीदमाख्यानं शृण्वन्ति श्रद्धयान्विताः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ।

Colophon

इति श्री भविष्योत्तरपुराणे मथनद्वादशीव्रतकल्पः समाप्तः ॥

338

Sl. No. 14962 नित्यसोमवारव्रतम् **Ms. No. P. 10041/89**

Beginning :

ब्रह्माण्डपुराणे ब्रह्मकैवर्ते पुराणोक्ताधिकमासकर्तव्यजनार्दनप्रतिमादाने त्रयस्त्रिंशदपू × × त्वपूरित कांस्यपात्रदानकल्पोक्त रूरुपापपरिहारार्थं + + + कांस्यपात्रपूरितत्रयस्त्रिंशदपूपदादानं करिष्ये ।

End :

आज्यं च गुडसंयुक्तं त्रयस्त्रिंशदपूपकान् ।
प्राणिनां प्राणनाथाय तस्मै कालात्मने नमः ॥
कुरुक्षेत्रमिदं क्षेत्रं साक्षाद्विष्णुरयं द्विजः ।
मया दत्तमिदं सर्वं गृहाण पुरुषोत्तम ॥

Colophon :

इत्यधिमसव्रतं स्कन्दपुराणोक्तमलमासव्रतं समाप्तम् ॥

339

Sl. No : 14964 पूर्णिमाचन्द्रव्रतम् **Ms. No : P. 6866/25**

Beginning :

श्री कृष्ण उवाच—

शृणु देवि प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
महादीपव्रतं नाम स्त्रीणां सौभाग्यसम्पदम् ॥

End :

तस्मात्सर्वप्रयत्नेन पुत्रसौभाग्यसम्पदाम ।
कर्तव्यं धर्मसिध्यर्थं इदं वै पाण्डुनन्दन ॥
तस्मिन्प्रीते समावृत्ते भवन्ति चिरजीविनः ।
हत्वा शत्रून् रणे जित्वा पालयन्त्यखिलां महीम् ॥

Colophon :

इति श्रीमत्स्यपुराणे कृष्णयुधिष्ठिरसंवादे मकरङ्क्रान्तिदीपव्रतकल्पं संपूर्णम् ।

340

Sl. No : 14967 महादीपव्रतम् Ms. No : P. 10058/43

Beginning :

संक्रान्तिदीपविधिः —

कैलासशिखरारूढं देवदेवमुपस्थितम ।
सर्वज्ञं सगुणं गौरी सखीजनसमन्विता ॥
नमस्त काग्रका सम्यरीव भक्तिरता सती (?)
अद्यस्थिते नये प्रीति अपूर्वं सर्वकामदम् । (?)
व्रतनामुत्तमं पुण्यं त्रिषुलोकेषु विश्रुतम्
+ + + + +

End ;

एकं वाऽप्यधिकं वाऽपि दीपपूजादि कारयेत् ।
अहोरात्रं तु सन्दीप्य दीपिका स्वस्वरूपतः ॥
अजस्रं दीपमीशानं अज्ञानं शिवनामयम् ।
इति दीपप्रमाणं संपूर्णम ।
सर्वकामप्रदं दीपं सर्वैश्वर्यप्रवर्धनम् ।
दीपं दास्यामि देवेश सुप्रीतो भव मे सदा ॥

Colophon :

इति मकरसङ्क्रान्तिदीपव्रतं संपूर्णम् ॥

341

Sl. No: 14968 महादीपव्रतोद्यापनविधिः **Ms. No: P 909/1**

Beginning:

कैलासशिखरे रम्ये देवदेवं त्रिलोचनम ।
सेव्यमानं मुनिगणैः किन्नरैरष्टभैरवैः ॥
प्रगम्य विधिवद्भक्त्या इदं वचनमब्रवीत् ।

देव्युवाच —

देवदेवेश सर्वज्ञ पृच्छामि त्वां महायशाः ॥
किं व्रतं परमं गुह्य × सत्वं सुमहत्फलम् ।

End:

अस्मिन् व्रते समावृत्ते भवन्ति चिरजीविनः ।
जातशत्रून् रणे जित्वा पालयन्त्यखिलां महीम् ॥
ये च शृण्वन्ति गायन्ति पठ्यमानं नरोत्तमाः ।
ते सर्वे पापनिर्मुक्ताः शिवसायुज्यमाप्नुयुः ॥

Colophon:

इति श्री मत्स्यपुराणे महादीपव्रतोद्यापनविधिः समाप्तः ॥

342

Sl. No: 14971 महालक्ष्मीव्रतम् **Ms. No. C 222/6**

Beginning:

भाद्रशुक्लाष्टमीमारभ्य षोडशदिनपर्यन्तं महालक्ष्मीव्रतम् । तच्चार्धराति क्रमवर्तिन्यामष्टम्यां कार्यम् ।

तदुक्तं चन्द्रप्रकाशो स्मृत्यन्तरे ॥
अर्धरात्रमतिक्रम्य वर्तते योत्तरा तिथिः ।
तदा तस्यां नरैः कार्यं महालक्ष्मीव्रतं सदा ॥ इति ॥

End:

श्री कृष्ण उवाच ॥

व्रतमिदमथ चक्रे नारदेनोपदिष्टं
सुरपतिरपि यस्मात् वाञ्छितार्थं स लेभे ।

त्वमपि कुरु तथैतद्धर्मसूनो यथास्यात्
अमितफलसिद्धिः पुत्रपौत्रादिसिद्धिः ॥
धनधान्यं धरा धर्मं कीर्तिमायुः यशः श्रियम् ।
तुरङ्गान् दन्तिनः पुत्रान् महालक्ष्मि प्रयच्छ मे ॥

Colophon :

इति भविष्योत्तरे महालक्ष्मीव्रतं सम्पूर्णम् ॥

343

Sl. No : 14973 महासौरव्रतम् Ms. No : P. 5293/44

Beginning :

महासौरम ।
उदुत्यमोदलु १९ ऋक् ॥
इन्द्रं मित्रं वरुणमग्निमाहुः
अथो दिव्यः ससुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्ति
अग्निं यमं मातरिश्वानमाहुः ॥
कृष्णं नियानं हरयः सुपर्णाः—

End :

एवं भास्करस्याराधनं कुर्यात् सदा गृही पापक्षयार्थी व्याधिनाशनार्थी शत्रु विनाशनार्थी च कुर्वीत श्री सूर्यस्येष्टसायुज्यं सारूप्यं सलोकतामश्नुते नमः शौनकाय नमः परमऋषिभ्यः ॥

Colophon :

— — —

344

Sl. No : 14974 माघकृष्णचतुर्दशीव्रतम् Ms. No : C 3525

Beginning :

माघकृष्णचतुर्दश्यां निराहारो महेश्वर ।
अपरेऽहनि भोक्ष्यामि प्रसादं कुरु मे शिव ॥

यावदावर्तते शम्भो माघकृष्णचतुर्दशी ।
तावत्तस्यां न भोक्ष्यामि न स्वपामि सदाशिव ।।
शिवरात्रिव्रतं देव करिष्ये तव सन्निधौ ॥

End :

जटाधराय जगदंबिकायै जपापुष्पम् ।
गिरिधन्वने गिरिसुतायै गिरीकर्णिकापुष्पम् ।।
नागभूषणाय नित्यायै नन्द्यावर्तपुष्पम ।
सर्वलोकैकपूजिताय सर्वमङ्गलशक्त्यै सौगन्धिकापुष्पम् ।।
श्री सांबसदाशिवाय नमः । नानाविधपुष्पाणि समर्पयामि ।

Colophon :

— — —

345

Sl. No. 14976 मातृषोडशीव्रतम् Ms. No. P. 9916/53

Beginning :

मातृभ्यो नमः ।
गर्भस्थे गमने दुःखं विषमे भूमिवर्त्मनि ।
तस्य निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम् ।।
यावत्पुत्रो न भवति तावन्मा × × × × सेचनम् ।।

End ;

वेद × × व्रतेषु च ।
तस्य × × × × × ।।
× मतिः यमन्वा × रेव × ×सगते कङ्कम् × × मासिम ।।

Colophon :

— — —

346

Sl. No. 14977 मार्गशिरलक्ष्मीव्रतम् Ms. No : P. 7451/11

Beginning :

एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ मम दीर्घसौमङ्गल्याभिवृद्ध्यर्थं श्रीमार्गशिरलक्ष्मीदेवतामुद्दिश्य मार्गशिरलक्ष्मीदेवताप्रीत्यर्थं कल्पोक्तप्रकारेण यावच्छक्ति ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ।

End :

दोरबन्धनम् ।

कमले लोकमाता त्वं दास्यामि च × प्रिये ।
गृहीत्वा तं विरूपेण यथोक्तं फलदा भव ॥

उपायनदानम् ।

Colophon :

इति वुधपूजाविधानं समाप्तम् ॥

347

Sl. No : 14980 मासनक्तव्रतम् Ms. No. P. 5648/11

Beginning :

यानि पापानि घोराणि जन्मान्तरशतेषु मे ।
तेषां सर्वविनाशाय शिवपूजां समाचरेत् ॥
सौभाग्यविजयारोग्यं धर्मैश्वर्यप्रवर्धनम् ।
स्वर्गापवर्गसिद्ध्यर्थं करिष्ये शिवपूजनम् ॥

\+ \+ \+ \+ \+

End :

क्षम्यतामपराधोऽयं मनोवाक्कायसंभवः ।
मम शङ्कर सर्वात्मन नीलकण्ठ नमोऽस्तु ते ॥
कार्तिक्यां मासनक्तेन प्रसीद परमेश्वर ।
जन्मान्तरार्जितं पापं क्षन्तुमर्हसि मे सदा ॥

इति समर्पणम् ।

Colophon :

इति पूजाविधानं समाप्तम् ॥

348

Sl. No : 14981 मासनक्तव्रतम् Ms. No P 8410/40

Beginniug :

हंस उवाच —

कार्तिकस्य विधिं वक्ष्ये शृणुष्व कमलोद्भव ।

यत्कृत्वा मुच्यते जन्तुः महापापैस्तथाऽपरैः ॥
कार्तिके मासि संप्राप्रे मासनक्तं निरन्तम् ।
नक्तं कार्यं मम प्रीत्यै मध्याह्ने पूजयेत् क्रमात् ॥

End :

आपोशनं ततो दद्यात् तीर्थतोयेन पङ्कज ।
स्वयं रात्रौ तु भुञ्जीत नक्तं तस्मात्प्रकीर्तितम् ।
एवं कृत्वा समाकेक्कं ब्रह्मचारी भवेत्तथा ।
समाप्ते तु महाप्राज्ञ वनभोजनमाचरेत् ॥

Colophon :

इति श्री विष्णुधर्मे तत्वादिमासनक्तं समाप्तम् ॥

349

Sl. No. 14986 मासनक्तव्रतोद्यापनम् Ms. No : P. 4180/93

Beginning :

श्रीदेव्युवाच —

उद्यापनविधिं ब्रूहि देव देव जगत्पते ।
नक्तव्रतस्य कार्तिक्यां प्रीत्यर्थं कृपया वद ॥

ईश्वरः —

साधु पृष्टं त्वया देवि उद्यापनविधिं त्वहम् ।
वक्ष्ये यथा विस्तरतः शृणु सर्वार्थसाधनम् ॥

End :

यत्कृतं विष्णुना देव ब्रह्मेन्द्रादिभिरेव च ।
मूढोऽयं यः करोतीदं मोदन्तीह कलौ युगे ॥
आवश्यमेतं नियमं संश्रयेदिष्टकाममिः ।
किं बहूक्तेन हे देवि सर्वव्रतफलं भवेत् ॥

Colophon :

इतिश्रीस्कान्दे उमामहेश्वरसंवादे मासनक्तव्रतोद्यापनविधिः समाप्तः ॥

350

Sl. No 14987 मासविघ्नेश्वरव्रतम् **Ms. No : P 5648/38**

Beginning :

पाशांकुशधरं देवं वरदाभयपाणिनम् ।
ध्यायेत् तु विघ्नराजेन्द्रं पूर्णकामार्थसिद्धये ।।

ध्यानम् —

गणाधिप नमस्तेऽस्तु सर्वकामफलप्रद ।
आगच्छ गिरिजापुत्र सर्वविघ्नहरो भव ।।

\+ \+ \+ \+ \+

End :

गणेशः प्रतिगृह्णातु गणेशाय नमो नमः ।

प्रतिग्रहणमन्त्रः—

विनायकस्य प्रतिमां वस्त्रयुग्मसमन्विता ।
तुभ्यं सम्प्रददे विप्र प्रीयतां मे गजाननः ।।

प्रतिमादानमन्त्रः—

Colophon :

पूजाविधानं सम्पूर्णम् ।।

351

Sl. No : 14988 मासशिवरात्रिव्रतम् **Ms. No : P. 2370/61**

Beginning :

एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ मम जन्मान्तरे अवस्थात्रयेषु जाग्रत्स्वप्नसुषुप्तावस्थासु च रहसि प्रकाशं च ज्ञानतोऽज्ञानतश्च ज्ञानान्तरकृतानां अज्ञातकृतासां...........मासशिवरात्रिव्रतं ।

End ;

शिवरात्रौ शिवपूजाकाले पूजयित्वा प्रातःकाले पूजयित्वा पारण-भोजनसमयात्पूर्वमेव सोपस्करेण शिवलिङ्गं स्वशक्त्याऽर्चयित्वा ब्राह्मणाय दद्यात् । यथाशक्ति दक्षिणां च दत्त्वा भोजयेत् आकाशदिक्शरीराय............... पूजितास्सर्वदेवताः ।।

Colophon :

इति मासशिवरात्रिव्रतं समाप्तम् ॥

352

Sl. No : 14995 मासशिवरात्रिव्रतोद्यापनम् **Ms. No P. 4218/87**

Beginning :

अस्यां शिवरात्र्यामेव मासशिवरात्रिव्रतं कुर्यात् । तदुक्तं पाद्मे ।
शृणु पार्वति वक्ष्यामि शिवरात्रिविधिं शुभम् ।
माघे वा फाल्गुने वापि मार्गशीर्षेऽपि वा पुनः ॥
उपक्रम्य चतुर्दश्यां कृष्णायां निश्चितो व्रती ।
शिवरात्रीति विधिना तन्नरः प्रपूजयेत् ॥

End :

एवं शास्त्राणि दूषी च किं पुनः सर्वशास्त्रकृत् ।
सद्य एव प्रमुच्येत पापेभ्यः पापपूरुषः ॥
इह भोगान् सुसकलान् भुक्त्वा भोगान् यथेप्सितान् ।
सदाशिवप्रसादेन शिवसायुज्यमाप्नुयात् ॥

Colophon :

इति श्री पद्मपुराणे उमामहेश्वरसंवादे मासशिवरात्रिव्रतोद्यापनं समाप्तम् ॥

353

Sl No 14997 मासोपवासव्रतम् **Ms. No : P 6000/63**

Beginning :

व्रतानामुत्तमं दिव्यं मासेनैव महाव्रतम् ।
शृणु पाण्डव यत्नेन ममानुग्रहकाम्यया ॥
प्रतिपत्सर्वसंक्रान्तौ एकादश्यां विशेषतः ।
यस्यामुपक्रमे राजन् तदन्ते पारणं भवेत् ॥

End :

गन्धद्वारेतिमन्त्रेण मृदा चाङ्गानि लेपयेत् ।
जपेच्च पौरुषं सूक्तं आपोहिष्ठमथापरम् ॥

त्र्यम्बकेति मन्त्रेण स्नानं कुर्याद्विधानतः ।
गृहं गत्वा ततः पश्चात् ब्राह्मणान्भोजयेत्ततः ।
मासोपवासव्रतमेव चीर्णमुक्तं च दुग्धं यमसूनवे ॥

Colophon :

इति श्री भविष्योत्तरपुराणे मासोपवाव्रतं संपूर्णम् ॥

354

Sl. No : 15001 मासोपवासव्रतम् Ms. No P 9946/41

Beginning :

श्रीआंगीरसः—
पुनर्वक्ष्याम्यहं पुण्यं शृणु भक्त्या महामते ।
प्राप्ते चतुष्टये मासि मासोपोष्यनुत्तमम् ।
यस्तस्माच्छक्तिहीनस्य देहपानभिया यदा ।
दिनैकस्मिंश्चोपवासं पारणं तु परे ऽहनि ॥

End :

क्षीरं दशपलं ग्राह्यं दधि चाष्टपलं स्मृतम् ।
स × × पलं ग्राह्यं व्रतेऽस्मिंश्च दिनेदिने ।
शक्तिहीनो यदि भवेत् व्रते मासि चतुष्टये ।
आचरेदेकभुक्तं वा सोऽपि पापैर्न लिप्यते ॥

Colophon :

इति श्री कार्तिकमाहात्म्ये आंगीरसोद्भवपुरुषसंवादे मासोपवासव्रतफलं संपूर्णम् ॥

355

Sl. No : 15002 मुक्ताभरणव्रतम् Ms. No. C 4292/9

Beginning

अथ भाद्रपदशुक्लसप्तम्यां मुक्ताभरणव्रतम् ।
हेमाद्रौ भविष्ये—
सा मध्याह्नव्यापिनी ग्राह्या तस्यामावाह्यापौ परा । (?)

पूर्वोच्चरित..........मैम इह जन्मनि अखण्डितसन्ततिपुत्रपौत्रवृद्धये
मुक्ताभरणव्रते उमामहेश्वरपूजनमहं करिष्ये। + + + + +
एवं या पूजनं कुर्यात् सोमस्य सुखदस्य च।
सर्वान् कामानवाप्नोति पुत्रपौत्रैश्च मोदते॥

End :

यस्य स्मृत्येत्युक्त्वा, कर्मेश्वरार्पणमस्तु। श्री साम्बसदाशिवार्पणमस्तु।
गतं पापं गतं दु:ख गतं दारिद्र्यमेव च।
आगता सुखसम्पत्तिः तस्माच्च भवदर्शनात्॥

Colophon :

इति मुक्ताभरणपूजा समाप्ता॥

356

Sl. No : 15006 मृतानन्तोद्यापनम् Ms. No. P. 6866/28

Beginning :

ब्रह्मकैवर्ते युधिष्ठिरः—

व्रतमादावुपक्रम्य युवा कश्चिद्भुवस्थले।
पूर्वमुद्यापनात्सोऽपि मृतश्चेत्तस्य तत्कथम्॥

श्री कृष्णः—

आसीत्पुरा कृतयोगे सुमतिर्नाम भूपतिः।
सर्वशास्त्रार्थतत्त्वज्ञो गुणज्ञो नीतिकोविदः॥

End :

व्रतस्योद्यापने काले कथाश्रवणमाचरेत्।
सर्वपापविनिर्मुक्तः व्रतचारी स पुण्यभक्॥
य इदं श्रावयेन्नित्यं शृणुयाद्वा समाहितः।
सर्वपापविनिर्मुक्तः प्राप्नुयाद्वैष्णवं पदम्॥

Colophon :

इति श्रीब्रह्मवैवर्ते मृतानन्तोद्यापनविधिः समाप्ता॥

357

Sl. No : 15007 मौनगौरीव्रतम् Ms. No : P. 2370/48

Beginning :

शुक उवाच—

हेमन्ते प्रथमे मासि नन्दगोपकुमारिकाः ।
चतुर्हविष्यं भुञ्जानाः कात्यायन्यर्चनाव्रतम् ॥
मायुष्युत्पाभसिक्येन याजयन्तो यदि तोरणे ॥ (?)

End :

यदुस्त्रियो व्रतमिदं वचमाचार्यनं सती । (?)
इत्यादिशब्दवार्ताभिः लब्धकामा कुमारिका ।
ध्यायन्तस्तत्पदाम्भोजं कृत्स्नान्निर्विविशुर्व्रजम् ॥

Colophon :

इति श्री भागवते महापुराणे दशमस्कन्धे वृन्दावनक्रीडायां यमुनागमन प्रसङ्गे द्वात्रिंशाध्याये मौनगौरीव्रतं समाप्तम् ॥

358

Sl. No : 15009 मौनगौरीव्रतम् Ms No P 5984/25

Beginning :

शंकर उवाच —

कैलासशिखरे रम्ये सिद्धगन्धर्वसेविते ।
देवदेव जगन्नाथ पार्वतीपरमेश्वरी ॥

पार्वत्युवाच —

नारीणां सर्वलोकेषु व्रतानामुत्तमं व्रतम् ॥

End :

षोडशे दीवसे प्राप्ते सुवासिन्यै ग्रहेत्ततः । (?)
भोजये × × × कन्याः कथ्यतां व्रतमर्पयेत् ॥

Colophon .

इति श्री स्कन्दपुराणे गौरीकाण्डे मौनगौरीव्रतं समाप्तम् ॥

359

Sl. No: 15014 मौनगौरीव्रतोद्यापनम् Ms. No: P. 5865/52

Beginning:

पुरा कैलासशिखरे सिद्धगन्धर्वपूजते ।
उमया सहितं स्कन्दः पप्रच्छ शिवमव्ययम् ॥

स्कन्दः उवाच—

व्रतं कथय देवेश पुत्रपौत्रप्रवर्धनम् ।
सर्वसौभाग्यसुखदं सर्वसिद्धिप्रदं नृणाम् ॥

End:

ऋषिपुत्र्यः पितुर्गेहे गौरीमभ्यर्च्य × × ।
कृष्णसाम्यं पतिं प्राप्य पातिव्रत्यं च शाश्वतम् ।
इह लोके सुखीभूत्वा गौरीसायुज्यमाप्नुयात् ॥

Colophon:

इति स्कान्दपुराणे गौरीखण्डे मौनगौरीव्रतोद्यापनं सम्पूर्णम् ।

360

Sl. No. 15015 मौनभानुवारव्रतम् Ms. No: P. 7772/5

Beginning:

अम्बायै नमः ॥ गणपतिपूजां कुर्यात् ॥ प्रार्थनां समर्पयामि । एवं गुणेत्यादि । शुभतिथौ सन्तानसौभाग्यसिध्यर्थं पुत्रपौत्राभिवृध्यर्थं .... मौनभानुवारव्रताङ्ग .... षोडशोपचारपूजां करिष्ये ॥

End

शीघ्रं मम ददायुषः । प्रार्थनम् । दोरग्रहणम् ।
पुत्रं देहि धनं देहि सर्वकामार्थसिद्धये ॥
सौभाग्यं देहि मे नित्यं रक्ष रक्ष गृहाधिप ॥
दोरबन्धनम् । यस्य स्मृत्या च × × । उपायनदानम् ।

Colophon:

पूजाविधानं सम्पूर्णम् ॥

361

Sl. No; 15016 यमुनापूजा Ms. No: P. 8165/9

Beginning:

क्षीरगर्भसमुद्भूतां इन्द्रनीलसमप्रभाम् ।
वरदाभययुतां सूर्यसुतां ध्यायेत् सुमध्यमाम् ॥

यमुनां ध्यायामि ।

यमुने ते नमस्तुभ्यं सर्वकामफलप्रदे ।
र्वससौभाग्यदे देवि जलेऽस्मिन् सुस्थिरा भव ॥

End:

माणिक्यवज्रवैडूर्यैः नीलमुक्ताफलैर्युतम् ।
सिंहासनमिदं देवि प्रीत्यर्थं प्रतिगृह्यताम् ॥

आसनम् —

सुवर्णकलशानीतं पुष्पधान्यफलैर्युतम् ।
पाद्यं गृहाण वरदे यमुने ते नमोनमः ॥

पाद्यम् , एलालवङ्गयुक्त × × × ×

Colophon:

— — —

362

Sl. No: 15028 यमुनापूजा Ms. No: C, 4313/3

Beginning:

पूर्वोक्त एवंगुणविशेषणविशिष्टायां शुभतिथौ + + + ऋषिपञ्चमीव्रतस्य व्रताङ्गत्वेन आदौ यमुनापूजां करिष्ये ।

क्षीरोदार्णवसंभूते इन्द्रनीलसमप्रभे ।
त्वत्प्रसादान्महादेवि विष्णुरूपी नमोऽस्तु ते ॥

End:

सुरासुरेन्द्रादिकिरीटरञ्जितं
नमामि दिव्यं तव पादपङ्कजम् ।

परात्परं सिद्धिकरं सुमङ्गलं
प्रयच्छ भक्तिं मम कार्यसिद्ध्यै ॥

क्षमार्पणम् —
भवानि त्वं महालक्ष्मि सर्वकामप्रदायिनि ।
क्षम त्वं मेऽपराधांस्तु यमुनायै नमो नमः ॥

प्रार्थनम् । यस्य स्मृत्या च ॥

Colophon:

यमुनापूजाविधिः समाप्तः ॥

363

Sl. No: 15031 रथसप्तमीव्रतम् **Ms. No: P 7696/10**

Beginning:

वैयाघ्रपादगोत्राय सांकृतिप्रवराय च ।
अपुत्राय ददाम्येकं सलीलं भीष्मपर्वणि ॥

End

अष्टम्यां च चतुर्दश्यां निराहारो महेश्वरः ।
नक्तं भोक्ष्यामि देवेश अर्पयामि सदाशिव ॥

एकादशे अर्घ्यं —
सुधाब्धिभोगशयन सुधाकरनिभानन ।
अर्घ्यं गृहाण दैत्यारे वनमालाविभूषित ॥

Colophon:

— — —

364

Sl No. 15034 रविवारव्रतम् **Ms. No P. 7958/9**

Beginning:

रविवारव्रतानि । तत्र रविवारव्रतं मदनरत्ने, सौरधर्मे ।
यस्योदये स्याज्जगतः प्रबोधो
यः कर्मसाक्षी भुवनस्य गोप्ता ।
कुष्ठादिगव्याधिविनाशनो यः
स भास्करो यो दुरितं निहितात् ॥ (?)

End :

य इदं शृणुयाद्भक्त्या ह्येकचित्तो भवेन्नृप: ।
सर्वान्कामानवाप्नोति प्रसादाद्भास्वतो नृप: ॥

Colophon :

इति श्री सौरधर्मोक्तसूर्यव्रतं पूर्णम् ॥

365

Sl. No : 15037 **रामनवमीव्रतम्** **Ms. No : P. 1893/1**

Beginning :

शान्ताकारं भुजगशयनं .....सर्वलोकैकनाथम् ॥
........भगवद्रामपार्श्वे उदकुंभं निधाय कलशार्चनम् ।
कलशस्य मुखे विष्णु: कण्ठे रुद्र: तथा स्थित: ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणा: स्मृता: ॥

End :

संपूज्य विधिवद्रामं भक्त्या वित्तानुसारत: ।
ब्राह्मणान् भोजयेत् पश्चात् दक्षिणाभिश्च तोषयेत् ॥
गोभूतिलहिरण्यैश्च वस्त्रालङ्करणैस्तथा ।
रामभद्रं प्रयत्नेन प्रीणयेत् परया मुदा ॥

Colophon :

इति श्रीहिरण्यगर्भसंहितायां श्रीरामजयन्तीव्रतकल्प: संपूर्ण: ॥

366

Sl. No : 15043 **रामनवमीव्रतम्** **Ms. No : P. 4218/17**

Beginning :

पूर्वोक्त एवंगुणविशेषणविशिष्टायां शुभतिथौ मम इष्टकाम्यार्थसिध्यर्थं श्री रामनवमीव्रतं करिष्ये ॥

कुसुमाक्षतान् गृहीत्वा ।
रामं पद्मविशालाक्षं कालाम्बुदसमप्रभम् ।
स्मितवक्त्रं सुखासीनं चिन्तयेत् चिन्तितार्थदम् ॥

End:

कौसल्यागर्भसंभूत रावणासुरमर्दन ।
गृहाणार्घ्यं मया दत्तं सीतया सह माधव ॥
चैत्रमासे सिते पक्षे नवम्यां च पुनर्वसु । (?)
मध्याह्ने कर्कटे लग्ने जातो रामः स्वयं हरिः ॥

Colophon:

इति पूजाविधानं समाप्तम् ॥

367

Sl. No: 15053 रामनवमीव्रतम् **Ms. No: P. 6298/38**

Beginning:

सर्वानुष्ठानसारं ते सर्वदानोत्तमोत्तमम् ।
रहस्यं कथयिष्यामि सुतीक्ष्ण शृणु सत्तम ॥
चैत्रमासनवम्यां तु शुक्लपक्षे रघूत्तमः ।
प्रादुरासीत् पुरा ब्रह्मन् × × फलम् ॥

End:

यत्किञ्चिद्राममुद्दिश्य नो ददाति स्वशक्तितः ।
रौरवेषु स मूढात्मा पच्यते नात्रसंशयः ॥
सुतीक्ष्ण उवाच—
यामाष्टकेषु पूजा वै त्वया प्रोक्ता कृपाकर ।
मूलमन्त्रेण चेन्मुक्त तत् कथं मम सुव्रत ॥
+ + + मेव च + + ॥
+ + + + + + + + +

Colophon:

— — —

368

Sl. No: 15060 रामनवमीव्रतम् **Ms. No. P. 8410/1**

Beginning:

नत्वा महागणपतिं गुरुं वागधिदेवताम् ।
क्षेत्रपालं तथा दुर्गां शम्भुमीश सदाशिवम् ॥

हिरण्यगर्भसिद्धान्तं रहस्यं मुनिसत्तम ।
पूजाविधिं प्रवक्ष्यामि रामचन्द्रस्य नारद ॥

End :

रहस्यकृतपापानि प्रख्यातानि बहून्यपि ।
महान्ति च प्रणश्यन्ति श्रीरामनवमीव्रतात् ॥
एकामपि नरो भक्त्या श्रीरामनवमीं मुने ।
उपोष्य कृतकृत्यः स्यात् सर्वपापैः प्रमुच्यते ॥

Colophon :

इति हिरण्यगर्भसिद्धान्ते अगस्त्यनारदसंवादे श्रीरामनवमीव्रतकल्पः समाप्तः ॥

369

Sl. No. 15097 रामनवमीव्रतम् Ms. No: P. 9963/22

Beginning :

एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ चैत्रशुद्धनवम्यां समस्तपपाक्षयार्थं सर्वाभीष्टफलावाप्त्यर्थं अनन्तजन्मगतपापक्षयार्थं श्रीरामप्रीत्यर्थं यथासंभवद्रव्येण यथासंभवनियमैः कल्पोक्तविधानेन श्री रामपूजां करिष्ये ।

End :

यस्तु रामनवम्यां तु प्रातःस्नात्वा सदा शुचिः ।
नित्यकर्माणि कुरुते तदनन्तफलं स्मृतम् ॥
रहस्यकृतपापनि प्रख्यातानि बहून्यपि ।
महान्ति च प्रणश्यन्ति श्री रामनवमीव्रतात् ॥
नारी वाऽपि नरो वाऽपि यो भुंक्ते रामजन्मनि ।
नवम्यां तेऽपि घोराणि नरकाणि भजंति हि ॥
यस्मात सुखमन्विच्छन् विष्णुभक्तिसमन्वितः ।
चैत्रशुद्धनवम्यां तु × × पोष्यं समाचरेत् ॥

Colophon :

इति अगस्त्यसंहितायां परमरहस्ये एकोनत्रिंशोऽध्यायः ॥

370

Sl. No. 15075 रामनममीव्रतम् Ms. No. P. 10367/17

Beginning :

उद्यापनविधिः । श्री अगस्त्यः—

ज्ञानदीपप्रदानेन प्रसन्नो भव राघव ।
ततो होमं प्रकुर्वीत मूलमन्त्रेण मन्त्रवित् ॥
पूर्वोक्तपद्मकुण्डे वा स्थण्डिले वा समाहितः ।
लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः ॥

End :

सर्वेषामपि वर्णानां भुक्तिमुक्त्यैकसाधनम् ।
यस्तु रामनवम्यान्तु भुञ्जेन्मोहान्नराधमः ॥
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः ।
अकृत्वा रामनवमीव्रतं सर्वोत्तमोत्तमम् ॥
+ + + + सर्वपापैः प्रमुच्यते ॥

Colophon :

इति अगस्त्यसंहितायां श्रीरामनवमी उद्यापनं संपूर्णम् ॥

371

Sl. No. 15076 रामनामव्रतम् Ms. No : C. 4291/9

Beginning :

श्रृणु देवि प्रवक्ष्यामि विस्तरेण यथाविधि ।
नाम्ना उद्यापनं चात्र भक्त्याभवदनुग्रहात् ॥
+ + + + +

आचम्य प्राणानायम्य + + श्रीरामनामव्रतमहं करिष्ये । मूलमन्त्रं + +
राम रामाय देवत्वं संख्याय स्वाहेति मन्त्रं पठन् प्राणप्रतिष्ठां कुर्यात् ॥

End :

अतस्त्वत्पादभक्तोऽस्मि त्वद्भक्तिस्तु श्रियोधि यत् ।

भक्तिमेव हि वाञ्छन्ति त्वद्भक्ताः सारवेदिनः ॥

श्रीरामाय इदं वायनम् ।

अतस्त्वत्पादकमले भक्तिरेव सदाऽस्तु मे ।

संसारमय × × × नां भैषज्यं भक्ति × × ॥

Colophon :

— — —

372

Sl. No : 15077 रामपूजाव्रतम् Ms. No. C 4284

Beginning :

अथ श्री रामपूजाप्रारंभः । सुमुखश्चेत्यादिश्लोकान् पठित्वा, पूर्वोच्चरित एवंगुणेत्यादि मम सकल पापक्षयकामो वा मनसेष्टि (?) कामो वा श्रीरामप्रीतये आचरित श्रीरामनवमीव्रतपूजनमहं करिष्ये ।

End :

प्रतिमादानम् । ब्राह्मणपूजनम् ।

दानेनानेन मे राम भक्तिमुक्तिप्रदो भव ।

प्रतिमादानसिद्ध्यर्थं शक्त्या स्वर्णं तु दापयेत् ॥

यस्यस्मृत्येति उक्त्वा कर्मेश्वरार्पणं कुर्यात् ।

Colophon

इति श्री रामपूजा समाप्ता ॥

373

Sl. No : 15078 राममासनक्तव्रतम् Ms. No P 10297/

Beginning :

पूर्वोक्त एवंगुणविशेषणविशिष्टायां शुभतिथौ मम समस्तपापक्षयार्थं + + + + + श्रीरामचन्द्रमुद्दिश्य + + + + यावच्छक्ति ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ॥

+ + + + + + +

अगस्त्य उवाच —

रामं पद्मविशालाक्षं कालाम्बुदसमप्रभम् ।
स्मितवक्त्रं सुखासीनं चिन्तयेच्चिन्तितातप्तये ।।

End :

सकृत्पूजनमात्रेण रामे एव भवेन्नरः ।
किं पुनस्सततं कुर्यात् ब्रह्मण्येव स्थितो हि सः ।।
सर्वान् कामानवाप्नोति इह लोके परत्र च ।

Colophon :

इत्यगस्त्यसंहितायां परमरहस्ये श्रीराममासनक्तपूजाविधिर्नाम पञ्चत्रिंशोऽध्यायः ।।

374

Sl No. 10579 रामलक्ष्मणव्रतम् **Ms. No : P. 6298/10**

Beginning :

अथ रामलक्ष्मणव्रतम् । ब्राह्मेपुराणे —
वैधृतावैधृतौ वाऽपि पातेऽपातेऽपि वा पुनः ।
स्नात्वा सम्यक् प्रभाते तु शुचि × मृतद्वये ।
तण्डुलैः पूरितं चैव गोधूमैर्मुद्गैररपि ।।

End :

एवं दत्त्वामहाभाग भोजयेदन्नसम्पदा ।
व्रतमेवं तु यः कुर्यात् रामलक्ष्मण संज्ञकम् ।।
सुपुत्रान् लभते साधून् रामलक्ष्मणविक्रमान् ।
भुक्त्वा च सकलान् भोगान् अन्ते वैकुण्ठमाप्नुयात् ।।

Colophon :

इति रामलक्ष्मण व्रतम् ।।

375

Sl. No ; 15080 रुद्रवर्तिव्रतम् **Ms. No : P. 7958/20**

Beginning :

देव देव जगन्नाथ प्रार्थयेऽहं जगत्पते ।
तवाहं प्रीतिभावेन × × स्मिन् सन्निधे भव । आवाहनम् ।।

End :

कथां श्रुत्वा विधानेन स्थाप्यं सर्वं निवेदयेत् ।
अश्वमेध सहस्रस्य वाजपेय शतानि च ।
कथाश्रवणमात्रेण तत्फलं लभते नरः ॥

Colophon :

इति श्री भविष्योत्तरपुराणे ईश्वरसंवादे रुद्रवर्त्यांख्यव्रतं संपूर्णम् ।

376

Sl. No : 15081 लक्षगन्धव्रतोद्यापनम् Ms. No : C. 3032/60

Beginning :

शौनकोऽहं प्रवक्ष्यामि गन्धस्योद्यापनं परम् ।
मधुमासे तु सम्प्राप्ते प्रारब्धव्यमिदं व्रतम् ॥
अथवा कार्तिके मासि माघमासे विशेषतः ।
चातुर्मासेऽथवा कुर्यान्न मार्गशीर्षे तथा व्रतम् ॥

End :

ऐश्वर्यमतुलं प्राप्य भुक्त्वा भोगान् यथेष्टतः ।
हस्तपादकृतान् पापान् पापं यद्यत्समुद्भवम् ॥
मुच्यते मानवश्रेष्ठ· कृतादस्मान्न संशयः ।
अन्ते च विष्णुसायुज्यं प्राप्नोति × किं नराः ॥

Colophon :

इति श्रीमत्सारोद्धारे सूतशौनकसंवादे लक्षगन्धव्रतोद्यापनं समाप्तम् ।

377

Sl. No. 15082 लक्षताम्बूलव्रतम् Ms. No : C 3032/62

Beginning :

स्कन्द उवाच—
श्रुतानि सुबहून्यद्य व्रतानि वृषभध्वज ।
कृपया परया देव श्रावितानि त्वया प्रभो ॥
साम्प्रतं मे समाचक्ष्व तद्व्रतं त्वीप्सितार्थदम् ।
येन चीर्णेन देवेश भवेयुः पुत्रसंपदः ॥

End :

× सनं वस्त्रदानं ब्रह्मस्थापनमेव च ।
यथाशक्ति प्रकर्तव्यं ब्राह्मणान् भोजयेद्व्रती ॥
एवं यः कुरुते पूजां आयुरारोग्यसंपदः ।
इष्टार्थसिद्धिं देवेशः तस्य दत्त्वा प्रसीदति ॥

Colophon :

इति श्री स्कान्दपुराणे स्कन्दशङ्करसंवादे ताम्बूलादिलक्षपूजाविधिः समाप्तः ॥

378

Sl. No : 15084 लक्षतुलसीव्रतम् Ms. No. P. 5293/72

Beginning :

लक्षतुलसी —
देवदेव नमस्तुभ्यं सर्वशास्त्रविशारद ।
अनन्तगुणसंपूर्ण सर्वदेवनमस्कृत ॥
तुलस्या लक्षसंख्यायाः व्रतं ब्रूहि दयानिधे ।
श्री भगवान् —
चातुर्मास्यं समारभ्य यावत्प्रबोधनं हरेः ॥

End :

एवं कृत्वा महाभाग मुच्यते सर्वपातकैः ।
पुरा पुरूरवो नाम राजा माहिष्मतीपतिः ॥
तुलस्याः लक्षसंख्यायाः व्रतं कृत्वा यथाविधि ।
एवं कृत्वा महाभाग सर्वान् कामानवाप्स्यसि ॥

Colophon .

इति श्री विष्णुधर्मोत्तरे लक्षतुलसीव्रतकल्पः समाप्तः ॥

379

Sl. No : 15088 लक्षतुलसीव्रतम् Ms. No. P. 8165/33

Beginning :

तत्र श्रुतानि सर्वाणि व्रतानि सुबहूनि च ।
इदानीं श्रोतुमिच्छामि तुलस्या अर्पणं फलम् ॥

श्रीसूतः—

शृणुध्वमृषयः सर्वे नारदेन प्रभाषितम् ।
तदहं सम्प्रवक्ष्यामि तुलसीलक्षपूजनम् ।।

श्रीनारदः—

देवदेव महाबाहो सर्वशास्त्रविशारद ।।

End :

श्रीसूतः—

एवं पितृमुखाच्छ्रुत्वा सन्तुष्टो नारदो मुनिः ।
तत्सर्वमुक्तवान्मह्यं × × कीर्तनम् ।।
तस्मात् सर्वप्रयत्नेन सर्वं सर्वैरिदं व्रतम् ।
एवं कृते महाभाग सर्वान् कामानवाप्नुयुः ।।

Colophon :

इति श्री गरुडपुराणे ब्रह्मनारदसंवादे लक्षतुलसीव्रतकल्पः सम्पूर्णः ।।

380

Sl. No : 15096 लक्षतुलसीव्रतोद्यापनम् Ms. No : P, 43354/6

Beginning :

लक्षतुलसीव्रतोद्यापनविधिरुच्यते ।

ब्रह्मोवाच ।

देवदेवं नमस्कृत्य सर्वशास्त्रविशारदम् ।
सर्वावयवसम्पूर्णं देवदेवं नमस्कृतम् ।।
तुलस्या लक्षसंख्याक व्रतं ब्रूहि महामुने ।

श्री भगवानुवाच ।

End :

पापेभ्ये विविधेभ्यश्च मुक्तवान् स नृपात्मजः ।
अन्यैरपि महीपालैः मान्धातृनहुषादिभिः ।।
कृतं यथाविधि सर्वैरवश्यं च व्रतं कुरु ।
एवं कृते महाभाग सर्वान्कामानवाप्स्यसि ।।

381

Sl. No : 15099 **लक्षतुलसीव्रतम्** **Ms. No. P. 8758/35**

Beginning :

विष्णुसंहितायाम् —

देवदेवं नमस्कृत्य सर्वशास्त्रविशारद ।
सर्वावयवसंपूर्ण सर्वदेवनमस्कृत ॥
तुलसीलक्षसंख्याकं व्रतं ब्रूहि महामते ।
इति पुत्रेण संपृष्टो ब्रह्मा प्रोवाच नारदम् ॥

\+ + + + + + + + + +

End ;

अन्यैरपि महीपालैः मान्धातृनहुषादिभिः ।
कृतमन्यैर्महीपालैस्तत्कुरुष्व यथाविधि ॥
अश्वमेधसहस्रं च वाजपेयशतानि च ।
व्रतस्यास्य महाभाग कलां नार्हन्ति षोडशीम् ॥

Colophon :

इति विष्णुसंहितायां ब्रह्मनारदसंवादे लक्षतुलसीव्रतोद्यापनकल्पः समाप्तः ॥ (?)

382

Sl. No 5100 **लक्षतुलसीव्रतोद्यापनम्** **Ms. No : C. 3032/57**

Beginning :

ऋषय ऊचुः —

सूत सूत महाभाग जीव जीव शतं समाः ।
लक्षतुलसीपुण्यं श्रोतुमिच्छामहे वयम् ॥
इमामथ पुरा राजा कुन्तीपुत्रो युधिष्ठिरः ।
पप्रच्छ देवकीपुत्रं तद्वदस्व च भो द्विजाः ॥

End:

एवमाकर्ण्य राजेन्द्रो वाक्यं भगवतोदितम् ।
कृत्वा व्रतफलं चापि हरितोषणपूर्वकम् ॥

ये शृण्वन्ति कथामेतां श्रावयन्ति पठन्ति च ।
ते सर्वेपापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्रीवायुपुराणे कृष्णयुधिष्ठिरसंवादे लक्षतुलसीव्रतं संपूर्णम् ॥

383

Sl. No : 15107 लक्षदीपदानव्रतोद्यापनम् Ms. No : P. 4218/72

Beginning :

इक्ष्वाकूणां कुलगुरो ब्रह्मन् सर्वज्ञ सुव्रत ।
ब्रूहि पापक्षयकरं व्रतं सर्वोत्तमं परम् ॥
ब्रह्मघ्नांश्च सुरापांश्च गुरुदाराभिमर्शनः ।
सुवर्णस्तेयिनश्चैव तेषां संयोगिनश्च ये ॥

End :

अथवा तु यथाशक्ति ब्राह्मणान् भोजयेद्व्रती ।
एवं कृते तु भूपाल सर्वपापक्षयो भवेत् ॥
दीपदानज्ञानमाप्य प्रसादान्मधुघातिनः ।
ततो मोक्षमवाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति श्री पद्मयपुराणे लक्षदीपदानव्रतोद्यापनं संपूर्णम् ॥

384

Sl. No : 15108 लक्षदीपव्रतम् Ms. No : P. 904/6

Beginning :

अथाथः सम्प्रवक्ष्यामि लक्षदीपव्रतक्रमम् ।
भुक्ति मुक्तिप्रदं नृणां सर्वाभीष्टफलप्रदम् ॥
कार्तिके मासि कर्तव्यं शिवप्रीतिकराय च ।
प्रातः स्नात्वा शुचिर्भूत्वा नित्यकर्म समाप्य च ॥

End ;

व्रतान्ते चोत्सवं कुर्यान्नृत्यगीतप्रवाद्यकैः ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥

पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ।
कामी कामानवाप्नोति मोक्षार्थी मोक्षमाप्नुयात् ॥

Colophon :

— — —

385

Sl. No: 15109 लक्षदीपव्रतम् **Ms No P 3121/7**

Beginning :

ब्रह्मोवाच—
देवदेवारविन्दाक्ष मायातीत महामते ।
त्वमेव वेत्सि तत्सर्वं भूयोभूयो नमाम्यहम् ॥
दीपानां लक्षसंख्याकं व्रतं ब्रूहि सुपावनम् ।
भगवानुवाच—
शृणु ब्रह्मन् प्रवक्ष्यामि लक्षदीपं हरिप्रियम् ॥

End :

नारीभिर्वा नरैर्वाऽपि कर्तव्यं व्रतमुत्तमम् ।
पतिभि· कुरुते नारी सर्वसौख्यं च विन्दति ॥
पुरुषः कुरुते नित्यं ज्ञानं मोक्षं च विन्दति ।
कथां श्रुत्वा फलं याति विष्णोस्सायुज्यमाप्नुयात् ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे लक्षदीपं संपूर्णम् ॥

386

Sl. No 15110 लक्षदीपव्रतम् **Ms. No ; P 5293/26**

Beginning :

सिते वा बहुले वापि विदध्यात्लक्षपूजनम् ।
दीपैः पुष्पैश्च धान्यैश्च प्रियैरन्यैस्तथाऽऽत्मनः ॥
लक्षपूजां प्रकुर्वीत लक्ष्मीनाथस्य तुष्टये ।
मूलमन्त्रेण गायत्र्या वैष्णव्या केशवादिभिः ॥

End :

धनं धान्यं यथाशक्ति व्रतसाद्गुण्यसिद्धये ।
ततः शालाबहिर्भूत्वा विष्णुदेवोत्तमं विभुम् ।
भोजयेद्ब्राह्मणान् भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ।
एवं यः पूजयेद्विष्णुं स याति हरिमन्दिरम् ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे लक्षदीपपूजाविधानम् समाप्तम् ॥

387

Sl. No : 15113 लक्षदीपव्रतम् Ms. No : P. 6807/11

Beginning :

धरण्युवाच—

देवदेव महाबाहो शङ्खचक्रगदाधर ।
श्रुतमेतन्मया ब्रह्मन् त्वन्मुखाम्बुरुहाद्विभो ॥
इदानीं श्रोतुमिच्छामि दीपानां लक्षणं यथा ।
तद्विधानफलं चास्य ब्रूहि मे करुणाकर ॥

End :

तस्मात्त्वयाऽपि कर्तव्यं इदं प्रोक्तं त्वयाऽनघे ।
एतद्गुह्यतमं देवि नाख्येयं विमुखान्विभो ॥
कर्ता कारयिता चैव प्रेरकाश्चानुमोदकाः ।
ते सर्वपापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्रीमत्पाञ्चरात्रे भारद्वाजसंहितायां उत्सवकाण्डे लक्षदीपप्रशंसा नाम नवमोऽध्यायः ॥

388

Sl. No. 15115 लक्षदीपव्रतम् Ms. No : P. 8004/34

Beginning :

नारदः —

नराणां गोप्यपापानां पापानि विविधानि वै ।
गुरुदारादिगपानां भव + + जनेऽपि वा ॥

भ्रूणहत्यादिपापानां गर्भवासादिकं तथा ।
परपुरुषाभिकांक्षा वा रज:सङ्करजं तथा ॥

End :

तस्मात् त्वयाऽपि कर्तव्यं इदं प्रोक्तं मयाऽनघ ।
एतत् गुह्यतमं देवि नाख्येयं विमुखान् विभो ॥
कर्ता कारयिता चैव व्रतकश्चानुमोदिता ।
ते सर्वे पापनिर्मुक्ता: यास्यन्ति हरिमन्दिरम् ॥

Colophon :

इति श्रीपञ्चरात्रे भरद्वाजसंहितायां उत्तरकाण्डे लक्षदीपप्रशंसनं नवमोऽध्याय: ॥

389

Sl. No : 15116 मृतानन्तोद्यापनम् **Ms. No. P. 8165/25**

Beginning :

देवदेवारविन्दाक्ष मायातीत महामते ।
त्वमेव वेत्सि तत्सर्वं भूयोभूयो नमाम्यहम् ॥
दीपानां लक्षसंख्याकंव्रतं ब्रूही महामते ।
शृणु ब्रह्मन् प्रवक्ष्यामि लक्षदीपव्रतोत्तमम् ॥

End :

कृत्वा वैधव्यसम्भूते दु:खचैवनवृत्त्य च ।
जन्मन्यस्मिन् महाभागे सौख्यं पुत्रादिसम्पद: ॥
प्रतिमास व्रतं येन राजदोषं निवार्य च ।
विष्णुलोकं समासाद्य मोक्षन्ते दम्पती सह ॥

Colophon :

इति स्कन्दपुराणे लक्षदीपव्रतकल्प: संपूर्ण: ॥

390

Sl. No 15119 मार्गशिरलक्ष्मीव्रतम् **Ms. No : P. 4335/50**

Beginning :

देवदेवारविन्दाक्ष मायातीत महामते ।
त्वमेव वेत्सितत्सर्वं भूयोभूयो नमाम्यहम् ॥

दीपानां लक्षनङ्ख्याकं व्रतं ब्रूहि महामुने।

श्री भगवानुवाच—

शृणु ब्रह्मन् प्रवक्ष्यामि लक्षदीपव्रतोत्तमम् ॥

End :

कृत्वा वैधव्यसम्भूतं दुःखं चैव निवृत्य च।
जन्मन्यस्मिन् महासौख्यं पुत्रपौत्रादिसम्पदः ॥
प्रतिमासं व्रतं चक्रे रजोदोषं निवार्य च।
विष्णुलोकं समासाद्य मोदते दम्पती मुदा ॥

Colophon :

इति श्री भविष्योत्तरपुराणे लक्षदीपव्रतोद्यापनं सम्पूर्णम् ॥

391

Sl. No : 15126 लक्षनमस्कारव्रतम् **Ms. No : P. 3121/9**

Beginning :

× × उवाच —

इक्ष्वाकूणां कुलगुरो ब्रह्म × क्षिपुव्रत।
ब्रूहि पापक्षयकरं व्रतं सर्वोत्तमोत्तमम ॥
ब्रह्मघ्नश्च सुरापी च गुरुदाराभिमर्शनः।
सुवर्णस्तेयनश्चैव × × × ॥
सङ्कीर्णपापिनश्चापि सङ्कलीकरणोऽपि वा।

End :

तस्मात्त्वमपि राजेन्द्र कुरु व्रतमनुत्तमम्।
कृत्वा व्रतं कथां श्रुत्वा विष्णुसायुज्यमाप्नुयात् ॥
न शृणोति व्रतं कृत्वा तस्य वै निष्फलं भवेत्।
य इदं शृणुयाद्भक्त्या विष्णुसायुज्यमाप्नुयात् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे लक्षनमस्कारव्रतं समाप्तम् ॥

392

Sl. No. 15129 लक्षनमस्कारव्रतोद्यापनम् **Ms. No ; P. 6807/9**

Beginning :

अथ लक्षनमस्कारविधिः ।
आषाढस्य सिते पक्षे द्वादश्यां च जितेन्द्रियः ।
आरब्धव्यं व्रतमिदं सद्यो मुक्तिविधायकम् ॥
यावत्प्रबोधिनी दिव्या कार्तिके विष्णुवल्लभा ।
तावल्लक्षनमस्कारव्रतं पापदवानलम् ॥

End :

किमत्र बहुनोक्तेन श्रृणु मे वचनं शुभम् ।
जन्मत्रयात्परं नूनं हरेर्मुक्तिप्रदायिनः ॥
अपरोक्षो भवेत्तस्य नात्र कार्या विचारणा ।
नावैष्णवं भवेज्जन्म न तिर्यग्योनिगं क्वचित् ॥

Colophon :

इति श्रीं स्कान्दे लक्षनमस्कारव्रतोद्यापनविधिः सम्पूर्णः ॥

393

Sl. No : 15139 लक्षनमस्कारव्रतोद्यापनम् **Ms. No ; P. 4218/74**

Beginning ;

आषाढस्य सिते पक्षे दशम्यां विजितेन्द्रियैः ।
प्रारब्धव्यं व्रतमिदं भुक्तिमुक्तिविधायकम् ॥
यावत्प्रबोधिनी दिव्या कार्तीके विष्णुवल्लभा ।
तावल्लक्षनमस्कारः भवत्यापद्दवानलम् ॥

End ;

नावैष्णवं भवेज्जन्म न तिर्यग्योनि वै क्वचित् ।
सद्वैष्णवो भवत्येव जन्मजन्मनि भूपते ॥

किमत्र बहुनोक्तेन हरिप्रीतिविधायकम् ।
सर्वेषामाश्रमाणां च वर्णानां च महीपते ॥

Colophon :

इति श्री स्कन्दपुराणे कृष्णयुधिष्ठिरसंवादे लक्षनमस्कारव्रतोद्यापनं संपूर्णम् ॥

394

Sl. No : 15145 लक्षपद्मव्रतम् **Ms. No : P. 3121/5**

Beginning :

श्री ब्रह्मोवाच —

देवदेवारविन्दाक्ष मायातीत महामते ।
× × मिच्छामि लक्षपद्मान्यशेषत: ॥

श्री भगवानुवाच —

लक्षपद्मस्य माहात्म्यं शृणुष्व कमलोद्भव ।
चातुर्मास्यं समारभ्य याव × × × ॥

End :

देवस्य सन्निधौ नारी पद्मान्येतानि कारयेत् ।
गोष्ठे वृन्दावने चैव नदीतीरे विशेषत: ॥
पूर्वाह्णकाले कुर्वीत व्रतसाकल्यभाग्भवेत् ।
× कुरुते ब्रह्मन् विष्णुसायुज्यमाप्नुयात् ॥

इति वायुपुराणे लक्षपद्मव्रतकल्पं संपूर्णम् ॥

395

Sl. No : 15146 लक्षपद्मव्रतम् **Ms. No : P. 5293/24**

Beginning :

मान्धाता उवाच –

कन्या यदा × मायुष्यमारोग्यं पुत्रदायकम् ।
पतिव्रतं च तं लोकं प्रापकं भक्तिवर्धनम् ॥

शाण्डिल्य उवाच—
शृणु राजन् प्रवक्ष्यामि स्त्रीणां व्रतमहोत्तमम् ।
लक्षपद्मव्रतं तुभ्यं हरिप्रीतिकरं महत् ॥

End :

भुक्त्वा भोगान् मनसिजान् बहुऋतुकाले सुखेस्थिता । (?)
वृद्धा सुखासने सुक्त्वा भर्तुः सामीप्यमागमत् ॥
य इदं पुण्यमाख्यानं शृणोति श्रावयेदपि ।
तावुभौ सुखिनौ भूत्वा विष्णुलोके वसेद्ध्रुवम् ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे मान्धातृशाण्डिल्यसंवादे लक्षपद्मव्रतकथा सम्पूर्णा ॥

396

Sl. No : 15149 लक्षपद्मव्रतम् Ms. No P 6807/10

Beginning :

अथ लक्षपद्मविधिः ॥ पार्वत्युवाच —
देवदेव महाशम्भो कैलासनिलयप्रभो ।
पृच्छामि संशयं देव हृदि मे वद सुव्रत ।
सधवाविधवानां च पापानां निष्कृतिः कथम् ॥
केन कर्मविपाकेन वक्तुमर्हसि तत्त्वतः ।
+ + + + +
पद्मव्रतं च कर्तव्यं सर्वाभिः सर्वदा शुभे ॥
विष्णुमुद्दिश्य कुरुते सा याति हरिमन्दिरम् ।

End :

तस्मात्त्वमपि कर्तव्यं त्वया सह वरानने ।
एतद्व्रतं गुह्यतमं पवित्रं परमं शुभम् ॥

शच्यादिपुण्यस्त्रीभिश्च कृतं चैवोत्तरोत्तरम् ।
लक्षपद्मस्य महिमा तवाख्यातं मया शुभम् ॥

Colophon :

इति श्री पद्मपुराणे पातालकाण्डे उमामहेश्वरसंवादे लक्षपद्मव्रतोद्यापनं नाम पञ्चाशत्तमोऽध्यायः ॥

397

Sl. No : 15079 लक्षपद्मव्रतम् **Ms. No : C. 3032/55**

Beginning :

पुरा द्वैतवने पार्थः वसंस्तत्र हरिं स्मरन् ।
भगवानागतो कृष्णः द्रौपद्याः स्मरतो विभुः ॥
द्रौपद्युवाच —
भगवन् ब्रूहि चास्माकं महद्दुःखस्य नाशनम् ।
लक्ष्मीप्रदं तथारोग्यं व्रतं ब्रूहि मम प्रभो ॥

End :

सुभद्रया च चरितं इह जन्मनि सर्वदा ।
त्वयाऽपि चेरितं यच्चेत् सर्वान् कामानवाप्स्यसि ॥
ये शृण्वन्ति कथां दिव्यां ये पठन्ति च मानवाः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे कृष्णद्रौपदीसंवादे लक्षपद्मव्रतं समाप्तम् ॥

398

Sl. No : 15152 लक्षपद्मव्रतोद्यापनम् **Ms. No : P. 4810/86**

Beginning :

नारदः —
देव देव जगन्नाथ नमस्ते भक्तवत्सल ।
लक्ष्मीपते नमस्तेऽस्तु शङ्खचक्रगदाधर ॥
श्रुतानि देवदेवेश व्रतानि च बहूनि च ।
सांप्रतं मे समाचक्ष्व लक्षपद्मव्रतं शुभम् ॥

End :

पयस्विनीं च गां दद्याद्दक्षिणां च स्वशक्तितः ।
ब्राह्मणान् भोजयित्वा तु यथा वित्तानुसारतः ॥
यस्योद्यापनमाकर्ण्य तत्र चैव समाचरेत् ।
पुत्रपौत्रप्रदं नृणां सर्वकामफलप्रदम् ॥

Colophon :

इति स्कान्दपुराणे लक्षपद्म उद्यापनं सम्पूर्णम् ॥

399

Sl. No : 15153 लक्षपद्मव्रतोद्यापनम् Ms. No : P. 4218/75

Beginning ;

देवदेवारविन्दाक्ष मायातीत महामते ।
इदानीं श्रोतुमिच्छामि लक्षपद्मान्यशेषतः ॥

श्रीभगवानुवाच —

लक्षपद्मस्य माहात्म्यं श्रुणुष्व × × भव ।
चातुर्मास्यां समारभ्य यावदुद्बोधितो हरिः ॥

End :

गोष्ठे वृन्दावने चैव नदीतीरे विधानतः ।
पञ्चवर्णैः रङ्गवल्या पद्मान्यष्टदलानि वै ॥
सिञ्चेन् स × × णि विष्णुः प्रीतो भवेदिति ।
पूर्वाह्णकाले कुर्वीत अन्यथा निष्फलं भवेत् ॥

Colophon :

इति वामनपुराणे श्रीहरिचतुर्मुखसंवादे × × × व्रतोद्यापनं समाप्तम् ॥

400

Sl. No : 15165 लक्षपद्मव्रतोद्यपनम् Ms No : P. 6807/5

Beginning :

अथ लक्षपद्मविधिः ।

ब्रूहि कृष्ण व्रतं श्रेष्ठं मुक्तिदं दुःखनाशनम् ।
पुत्रपौत्रादिक चैव कृपया मधुसूदन ॥

श्रीकृष्ण: ।

शृणु राजन् प्रवक्ष्यामि व्रतानामधिकं व्रतम् ।
सर्वदु:खहरं स्त्रीणां सर्वकामफलप्रदम् ॥

End :

प्रदक्षिणनस्कारान्कुर्यान्मूर्ध्नि कृताञ्जलि: ।
एतत्ते व्रतमाख्यातं स्त्रीणां कामफलाप्तये ।
पुत्रपौत्रादिसन्तानवृद्ध्यर्थं कुरुनन्दन ।
या नारी कुरुते भक्त्या हरिस्तस्या: प्रसीदति ॥

Colophon :

इति सौरपुराणे लक्षपद्मप्रकरणे उद्यापनं सम्पूर्णम् ॥

401

Sl. No ; 15159 लक्षपुष्पव्रतम् Ms. No : P. 3121/8

Beginning ;

ब्रह्मोवाच —

सर्वज्ञ देवदेवेश सर्वसज्जनरक्षक ।
व्रतं ब्रूहि सुरश्रेष्ठ लक्षपुष्पस्य सर्वदा ॥

श्री भगवानुवाच—

शृणु ब्रह्मन् प्रवक्ष्यामि लक्षपुष्पव्रतं शुभम् ।
× माल्यादीनि च पुष्पाणि विष्णवे त्वं समर्पय ॥

End :

आयुष्यारोग्यदं पुण्यं सर्वमृत्युहरं सदा ।
तस्मात् त्वमपि हे ब्रह्मन् ज्ञानं मार्गं च विन्दति ॥
ये वै शृण्वन्ति सततं ये पठन्ति च मानवा: ।
× × पापनिर्मुक्ता: यान्ति विष्णो: परं पदम् ॥

Colophon :

इति श्रीलक्ष्मीसहितायां ब्रह्महंससंवादे लक्षपुष्प × × व्रतं सम्पूर्णम् ॥

402

Sl. No : 15160 लक्षपुष्पव्रतम् **Ms. No. P. 4335/47**

Beginning :

पुष्पारोपणमाहात्म्यं विधानञ्च यथाक्रमम् ।
ब्रह्मादिभिर्मुनिश्रेष्ठ श्रृणुष्व सुमना भव ॥
जलजातीनि रम्याणि कमलान्युत्पलानि च ।
कुमुदागस्त्यपुष्पाणि कदम्बं केतकी तथा ॥

End :

एकपुष्पप्रदानेन समाप्ते यत्फलं भवेत् । (?)
स्वर्णपुष्पफलं वक्तुं न शक्नोमि महामुने ॥
तस्मात्सर्वप्रयत्नेन पुष्पपूजां समाचरेत् ॥
सर्वान् कामनानवाप्नोति विष्णुसायुज्यमाप्नुयात् ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे पुष्पप्रदानं नाम पञ्चदशोऽध्यायः ॥

403

Sl. No : 15161 लक्षपुष्पव्रतम् **Ms. No : P. 5293/71**

Beginning :

लक्षपुष्पम् । ब्रह्मोवाच --
विष्णो सर्वज्ञ सर्वेश सर्वसज्जनरक्षक ।
व्रतं ब्रूहि सुरश्रेष्ठ लक्षपुष्पस्य सर्वदा ॥
श्री भगवानुवाच—
श्रृणु ब्रह्मन प्रवक्ष्यामि लक्षपुष्पव्रतं शुभम् ।
मौल्यादानीय पुष्पाणि विष्णोरेव समर्पयेत् ॥

End :

तस्मात्त्वमपि हे ब्रह्मन् ज्ञानं मोक्षञ्च विन्दसे ।
आयुरारोग्यदं पुण्यं अपमृत्युहरं तथा ॥

ये वै श्रृण्वंति सततं ये पठंति च मानवाः ।
ते सर्वे पापनिर्मुक्ताः यांति विष्णोः परंपदम् ।।

Colophon :

इति ब्रह्मसंहितायां लक्षपुष्पव्रतोद्यापनं चतुःपञ्चाशोऽध्यायः ॥

404

Sl. No ; 15164 लक्षपुष्पव्रतम् Ms. No ; P 6000/62

Beginning ;

रोमश उवाच —
लक्षपूजां प्रवक्ष्यामि विष्णोरमिततेजसः ।
दीपानां लक्षपूजां च कार्तिक्यां च समाचरेत् ॥
एकैकं मूलमन्त्रेण विष्णुसूक्तेन वा पुनः ।
अथवा विष्णुगायत्र्या सहस्रैर्नामभिर्हरेः ।।

End ;

गोघृतेन समायुक्तं सर्वकामार्थसिद्धये ।
प्रदक्षिणनमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः ॥
क्षमापयेत्तथा देवं ब्राह्मणान् भोजयेच्छतम् ।
एवं यः कुरुते पूजां तस्य विष्णुः प्रसीदति।।

Colophon :

इति श्री लक्षपुष्पव्रतं सम्पूर्णम् ॥

405

Sl. No. 15168 लक्षपुष्पव्रतम् Ms. No ; B. 1211/4

Beginning :

नारदः —
श्रुतं लक्षतुलस्याश्च व्रतं त्वत्करुणावशात् ।
लक्षपुष्पव्रतं सम्यग्वदस्व सुरसत्तम ।।

ब्रह्मा उवाच ।

ब्रह्महत्यादिपापानि कोटिजन्मार्जितानि च ।
लक्षपुष्पार्चनेनैव नश्यन्ति हि न संशयः ॥

End :

इदं व्रतं महापुण्यं अवश्यं पुण्यकामिनाम् ।
माङ्गल्यस्याप्यविच्छिन्नं जन्मजन्मान्तरेष्वपि ।
आयुरारोग्यदं पुंसां अपमृत्युहरं तथा । + + +
ये वै शृण्वन्ति सततं ये पठन्ति च मानवाः ।
ते सर्वे पापनिर्मुक्ताः याति विष्णोः परं पदम् ॥

Beginning :

इति बृहत्संहितायां ब्रह्मनारदसंवादे लक्षपुष्पोद्यापनविधिर्नाम षडशीतितमोऽध्यायः ॥

406

Sl. No : 15170 लक्षपुष्पव्रतम् **Ms. No. C. 3032/54**

Colophon :

ब्रह्मोवाच—

छिन्धि सर्वज्ञ सर्वेश सर्वसज्जनकारण ।
व्रतं ब्रूहि सुरश्रेष्ठ लक्षपुष्पस्य सर्वथा ॥

भगवानुवाच —

शृणु ब्रह्मन् प्रवक्ष्यामि लक्षपुष्पव्रतं शुभम् ।
मौन्यादानीय पुष्पाणि विष्णुमेव समर्पयेत् ॥

End :

आयुरारोग्यदं पुंसां अपमृत्युहरं तथा ।
तस्मात्त्वमपि भो ब्रह्मन् ज्ञानं मोक्षं च विन्दसि ॥
ये च शृण्वन्ति सततं ये पठन्ति च मानवाः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्री ब्रह्मसंहितायां विष्णुब्रह्मसंवादे लक्षपुष्पव्रतं सम्पूर्णम् ॥

407

Sl No. 15171 लक्षपुष्पव्रतोद्यापनम् Ms. No : P. 4218/68

Beginning :

लक्षपुष्पस्य माहात्म्यं व्रतं कथय मे विभो ।
केन चादौ पुरा चीर्णं तत्सर्वं ब्रूही सत्तमे ॥

श्री विष्णुः ।

सौवीरदेशाधिपतिः राजा धर्मभृतां वरः ।
तस्य राज्ञः शतं पुत्रा बभूवुः तत्त्वकोविदाः ॥

End :

आयुरारोग्यदं पुंसां अपमृत्युहरं तथा ।
तस्मात्त्वमपि भो ब्रह्मन् ज्ञानं मोक्षं च विन्दसि ॥
ये वै शृण्वन्ति सततं ये पठन्तीह मानवाः ।
ते सर्वे पापनिर्मुक्ताः यान्ति विष्णोः परं पदम् ॥

Colophon :

इति श्री ब्रह्मसंहितयां ब्रह्मविष्णुसंवादे लक्षप्पुपोद्यापनं सम्पूर्णम् ॥

408

Sl. No : 15172 लक्षपुष्पव्रतोद्यपनम् Ms. No : P. 4335/37

Beginning :

सर्वज्ञ सर्वलोकेश सर्वजन्मनि कारणम् ।
व्रतं ब्रुहि सुरश्रेष्ठ लक्षपुष्पस्य सर्वदा ॥
शृणु ब्रह्मन् प्रवक्ष्यामि माघे वैशाख एव च ॥
पुष्पाणि पुरतो विष्णोः स्वस्ति पुण्याहवाचनम् ॥

End :

आयुरारोग्यदं पुंसां अपमृत्यहरं तथा ।
तम्मात्त्वमपि हे ब्रह्मन् ज्ञानं मोक्षं च विन्दति ॥

ये तच्छृण्वन्ति सततं ये पठंति हि मानवाः ।
ते सर्वे पापनिर्मुक्ताः ते यान्ति परमां गतिम् ॥

Colophon

इति श्री ब्रह्माण्डपुराणे ब्रह्मसंहितायां लक्षपुष्पोद्यापनविधिर्नाम पञ्चदशोऽध्यायः ॥

409

Sl. No. 15175 लक्षपूजाव्रतम् Ms. No : P. 6807/9

Beginning :

अथ विष्णोर्लक्षपुष्पपूजाविधिः ।

ऋषय ऊचुः ।

यानि कानि च तीर्थानि पुण्यान्यायतनानि च ।
किमुद्दिश्य च कार्याणि तत्सर्वं कथय प्रभो ॥

लोमशः —

पृथिव्यां यानि तीर्थानि सागरान्तानि भो द्विजाः ।
माहात्म्यानि च सर्वाणि कथितानि मया पुरा ॥

End :

एवं हि सर्वपुष्पैश्च सर्वकार्यार्थसिद्धये ।
लक्षपूजां प्रकुर्याच्चेत्प्रसन्नोऽथ हरिर्भवेत् ॥
उद्यापनं तथा कार्यं तुलसीपूजने यथा ।
एवं यः कुरुते पूजां तस्य विष्णुः प्रसीदति ॥

Colophon :

इति विष्णुधर्मे लक्षपुष्पपूजोद्यापनं संपूर्णम् ॥

410

Sl. No : 15176 लक्षपूजाव्रतम् Ms. No P. 6807/7

Beginning :

अथ शिवस्य नानाविधलक्षपूजाविधिः ।

ऋषय ऊचुः—

यानि कानि च तीर्थानि पुण्यान्यायतनानि च ॥

किमुद्दिश्य च कार्याणि तत्सर्वं कथय प्रभो ।
शिवाख्यानपरो लोके त्वत्तोऽन्यो न हि विद्यते ॥
कृपया व्यासदेवस्य सर्वज्ञोऽसि महामते ॥

End :

अनेनैव विधानेन लक्षपूजां करोति यः ।
पुत्रपौत्रप्रपौत्रैश्च राज्यं प्राप्नोति शाश्वतम् ॥
य इदं पठते नित्यं श्रद्धाभक्तिसमन्वितः ।
देवदेवो महादेवो ददाति विपुलां गतिम् ॥

Colophon :

इति श्रीस्कान्दे पुराणे उत्तरखण्डे शिवस्य नानाविधपुष्पपूजोद्यापनं संपूर्णम् ॥

411

Sl. No: 15179 लक्षप्रदक्षिणव्रतम् **Ms. No: P. 3121/10**

Beginning :

युधिष्ठिरः—

कृष्ण कृष्ण महाबाहो सर्वाघौघविनाशन ।
येन व्रतेन चीर्णेन सर्वपापक्षतिर्भवेत् ॥
सर्वेषामाश्रमाणां च वर्णानां चैव योषिताम् ।

श्रीकृष्णः—

पुरा कल्माषनृपतिः गुरुपुत्रवधान्नृप ॥

End :

आगामिजन्मभिश्चैव मुच्यते नात्र संशयः ।
तस्मात्त्वमपि राजेन्द्र कृत्वेदं व्रतमुत्तमम् ॥
विमुक्तः सर्वपापेभ्यः मुच्यसे नात्रसंशयः ॥

Colophon :

इति श्रीविष्णुधर्मोत्तरे लक्षप्रदक्षिणकल्पं सम्पूर्णम् ॥

412

Sl. No. 15180 लक्षप्रदक्षिणव्रतम् Ms. No : P. 5293/73

Beginning ;

लक्षप्रदक्षिणम् । युधिष्ठिर उवाच—

कृष्ण कृष्ण महाबाहो सर्वाघौघविनाशनम् ।
येन व्रतेन चीर्णेन सर्वपापक्षयो भवेत् ॥
सर्वेषामाश्रमाणां च वर्णानां च स्त्रियामपि ।
लक्षप्रदक्षिणं नाम व्रतं पापप्रणाशनम् ॥

End :

एवं कृत्वा व्रतमिदं पवित्रं पापनाशनम् ।
पूर्वजन्मार्जितैः पापैः इहजन्मार्जितैरपि ।
× मिजन्मसिश्चैव मुच्यते नात्र संशयः ॥
तस्मात्वमपि राजेन्द्र कुर्विदं व्रतमुत्तमम् ।
विमुक्तः सर्वपापेभ्यो विष्णुलोकं च विन्दसि ॥

Colophon ;

इति श्रीविष्णुधर्मपुराणे लक्षप्रदक्षिणकल्पः सम्पूर्णः ॥

413

Sl. No : 15183 लक्षप्रदक्षिणव्रतम् Ms No. P 6807/8

Beginning :

नारदः—

ये चान्ये पापिनो लोके दानधर्मविवर्जिताः ।
व्रतहीना व्रतभ्रष्टा दुराचारश्च दाम्भिकाः ॥
अग्निकार्येण रहिताः ब्रह्मचर्यविवर्जिताः ।
वेदाभ्यासविहीनाश्च शास्त्रमार्गबहिष्कृताः ॥

End :

बिष्णवे वैश्वदेवाय हुनेदग्नौ ततो हविः ।
कार्पसकम्बलं चैव कपिलां गां पयस्विनीम् ।

दद्याद्व्रतसमाप्त्यर्थं कुर्याद्ब्राह्मणभोजनम् ।
विश्वेदेवात्मिकां कुर्यात्प्रतिमां हरिमेधसः ।।

Colophon :

इति श्री भविष्योत्तरे लक्षप्रदक्षिणकल्पं संपूर्णम् ।।

414

Sl. No : 15184 लक्षप्रदक्षिणव्रतम् **Ms No : P. 6866/13**

Beginning :

युधिष्ठिर उवाच —

कृष्ण कृष्ण महाबाहो सर्वाघौघविनाशन ।
येन व्रतेन चीर्णेन सर्वपापक्षयो भवेत् ।।

\+ \+ \+ \+ \+

श्रीकृष्णः—

पुरा कल्माषनृपतिः गुरुपुत्रवधान्नृप ।
किल्बिषी क्रूरकर्मायं ब्रह्मराक्षसरूपधृक् ।।

End :

श्री भगवान् —

तस्मात्त्वमपि राजेन्द्र कृत्वेदं व्रतमुत्तमम् ।
विमुक्तः सर्वपापेभ्यः आपदब्धिं तरिष्यसि ।।

Colophon :

इति श्रीविष्णुपुराणे लक्षप्रदक्षिणव्रतं सम्पूर्णम् ।।

415

Sl. No : 15185 लक्षप्रदक्षिणव्रतम् **Ms. No P 6866/14**

Beginning :

नारदः—

ये चान्ये पापिनो लोके दानधर्म विवर्जिताः ।
व्रतहीना व्रतभ्रष्टा दुराचाराः सुडाम्भिकाः ।।

अग्निवृत्तिविहीनाश्च ब्रह्मचर्यविवर्जिताः ।
वेदाभ्यासविहीनाश्च शास्त्रमार्गविवर्जिताः ॥

End :

विश्वेदेवात्मकाः कुर्यात्प्रतिमां हरिमेधसः ।
एवं यः कुरुते भक्त्या सर्वपापैः प्रमुच्यते ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे लक्षप्रदक्षिणव्रतकल्पं संपूर्णम् ।।

416

Sl. No : 15189 लक्षप्रदक्षिणव्रतम् **Ms. No : P. 9633/28**

Beginning :

युधिष्ठिरः—

कृष्णकृष्ण महाबाहो सर्वाघौघविनाशन ।
येन व्रतेन चीर्णेन सर्वपापक्षयो भवेत् ॥
सर्वेषामाश्रमाणां च वर्णानां च स्त्रियावपि ।

श्रीकृष्ण उवाच—

पुरा कल्मापनृपतिर्गुरुपुत्रवधान्नृप ।
किल्बिपी कुकल्माषं ब्रह्मराज सरूपधृक् ॥

End :

पूर्वजन्मार्जितैः पापैः इहजन्मार्जितैरपि ।
आगामिजन्मभिश्चैव मुच्यते नात्र संशयः ॥

श्री भगवानुवाच—

तस्मात्त्वमपि राजेन्द्र कृत्वेदं व्रतमुत्तमम् ।
विमुक्तः सर्वपापेभ्यो अपरेत्ता इष्यति ॥

Colophon :

इति श्रीविष्णुधर्मे लक्षप्रदक्षिणव्रतकल्पं संपूर्णम् ।।

417

Sl. No: 15193 **लक्षप्रदक्षिणव्रतोद्यापनम्** Ms. No: P. 4180/88

Beginning:

युधिष्ठिर उवाच—

कृष्ण कृष्ण महाबाहो सर्वाघौघविनाशन ।
येन व्रतेन चीर्णेन सर्वपापक्षयो भवेत् ।
सर्वेषामाश्रमाणां च स्त्रीणां च पुरुषास्तथा ॥

श्रीकृष्णः—

पुरा कल्माषनृपतिः गुरुपुत्रवधान्नृप ।
किल्बिषाय तत ब्रह्मन् ब्रह्मराक्षसरूपधृक् ॥ (?)

End:

ब्राह्मणान् भोजयित्वा तु यथावित्तानुसारतः ।
एवं कृत्वा तु विप्रेन्द्र पवित्रं पापनाशनम् ॥
पूर्वजन्मार्जितैः पापैः स × मुच्ये न संशयः ।
त + +, मपि राजेन्द्र कृत्वेदं व्रतमुत्तमम् ।
विमुक्तः सर्वपापेभ्यः सर्वसौभाग्यवर्धनः ॥

Colophon:

इति भविष्योत्तरे लक्षप्रदक्षिणोद्यापनं सम्पूर्णम् ॥

418

Sl. No. 15194 **लक्षप्रदक्षिणव्रतोद्यापनम्** Ms. No: P. 4218/73

Beginning:

कृष्ण कृष्ण महाबाहो सर्वाघौघप्रणाशन ।
येन व्रतेन चीर्णेन सर्वपापक्षयो भवेत् ॥
सर्वेषामाश्रमाणां च पुरुषाणां स्त्रियामपि ।

श्री कृष्णः—

पुरा कल्माषनृपतिः गुरुपुत्रवधान्नृप ।
कल्माषी क्रूरकर्मो च ब्रह्मराक्षसरूपधृत् ॥

जन्मजन्मार्जितैः पापैः पूर्वजन्मार्जितैरपि ।
आगामिजन्मभिश्चैव मुच्यते नात्र संशयः ॥
तस्मात्त्वमपि राजेन्द्र कृत्वेदं व्रतमुत्तमम् ।
विमुक्तः सर्वपापेभ्यो आपदश्च तरिष्यसि ॥

Colophon :

इति श्री विष्णुधर्मोत्तरे लक्षप्रदक्षिणव्रतोद्यापनं सम्पूर्णम् ॥

419

Sl: No. 15195 लक्षबिल्वव्रतोद्यापनविधिः Ms. No: P. 4335/38

Beginning :

ये शम्भुं सुरसत्तमं सुरगणैराराध्यमीशं शिवम्
शैलाधीशसुतासमेतममलं सम्पूजयन्त्यादरात् ।
ते धन्याः शिवपादपूजनपराः धन्याश्च धन्या जनाः
सत्यं सत्यमिहोच्यते मुनिवराः सत्यं पुनस्सर्वदा ॥

अर्जुन उवाच —

देव देव जगन्नाथ प्राणिनां हितकाम्यया ।
बिल्वपत्रस्य माहात्म्यं व्रतं ब्रूहि जगत्पते ॥

End :

एवं यः कुरुते मर्त्यो नारी वा पुरुषोऽपि वा ।
देहान्ते ज्ञानवान् भूत्वा शिवसायुज्यमाप्नुयात् ॥
ये च शृण्वन्ति सततं ये पठन्ति च मानवाः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्री ब्राह्मोत्तरखण्डे पुराणे कृष्णार्जुन संवादे लक्षबिल्वपत्रिकल्पोद्यापनं सम्पूर्णम् ॥

420

Sl. No : 15199 लक्षबिल्वव्रतम् Ms. No : P. 8165/25

Beginning :

ऋषय: ऊचु:—

तत्र श्रुतं पुरा सूत अस्माभि: कमलापते: ।
तुलसीपत्रलक्षस्य समर्पणफलं महत् ॥
लक्षबिल्वदलै: शम्भो: अर्चने यत्फलं भवेत् ।
तत्त्वया श्रोतुमिच्छामि विधिं चोद्यापनं तथा ॥

End :

मन्त्रेणानेन विप्राय दद्याद्वै भूरिदक्षिणाम् ।
ब्राह्मणान् भोजयेत् पश्चात् स्वस्य शक्तिमवञ्चयेत् ॥
एवं कुरुध्वं सततं बिल्वपत्रै: शिवार्चनम् ।
इति सूतवच: श्रुत्वा सन्तुष्टा मुनयोऽभवन् ॥

Colophon :

इति स्कन्दपुराणे बिल्वपत्रपूजाविधि: संपूर्ण: ॥

421

Sl. No : 15201 लक्षबिल्वव्रतम् Ms. No : C. 3032/67

Beginning :

लिङ्गार्चनचन्द्रिकायां भविष्ये लक्षबिल्वार्चनविधि: ।

शिव उवाच—

अथ पार्वति वक्ष्यामि लक्षबिल्वदलार्चनम् ।
शिवप्रीतिकरं नृणां शिवभक्तिविवर्धनम् ॥
श्रावणे कार्तिके वाऽथ माघे वैशाख एव वा ।
दिने दिने सहस्रं तु अर्पयेत् श्रीदलानि तु ॥

End :

कामार्थी काममाप्नोति धर्मार्थी धर्ममाप्नुयात् ।
विद्यार्थी लभते विद्यां मोक्षार्थी मोक्षमाप्नुयात् ॥
भोगान् भुक्त्वा तु विपुलान् इह जन्मनि साधुभिः ।
स स्वर्गं याति विपुलं अन्ते स्वर्गं च विन्दति ॥

Colophon :

इति श्रीं स्कान्दपुराणे लक्षपूजाविधिः सम्पूर्णः ॥

422

Sl. No : 15202 लक्षबिल्वव्रतम् Ms. No. C. 3032/71

Beginning :

लक्षबिल्वारोपणमुक्तं स्कान्दे —
यस्तु वै चतुरो मासान् बिल्वपत्रैः शिवार्चनम् ।
कृत्वा व्रतान्ते देवेशं विधिवत्पूज्य भक्तितः ।
बिल्वपत्राकृतिं हेम्ना कृत्वेशाय निवेदयेत् ॥
हेमाद्रौ पाद्मे —
यस्तु बिल्वार्चनं शम्भोः कुरुते भक्तिमान्नरः ।

End :

ब्राह्मणान् भोजयेत्पश्चात् ताम्बूलादि समर्पयेत् ॥
एवं यः कुरुते मर्त्यः प्रतिसंवत्सरं नरः ।
स भुक्त्वा सकलान् भोगान् शिवसायुज्यमाप्नुयात् ॥

Colophon :

इति लक्षबिल्वविधिः ॥

423

Sl. No : 15203 लक्षबिल्वव्रतोद्यापनम् Ms. No : P. 4218/66

Beginning :

त्वत्तः श्रुतं पुरा सूत अस्माभिः कमलापतेः ।
तुलसीलक्षपत्रस्य समर्पणफलं महत् ॥

लक्षविल्वदले शम्भोः अर्चने तत्फलं भवेत् ।
तत्त्वया श्रोतुमिच्छामि तिथिं चोद्यापनं तथा ॥

End:

मन्त्रेणानेन विप्राय दद्याद्वै भूरिदक्षिणाम् ।
ब्राह्मणान् भोजयेत् पश्चात स्वस्य शक्तिं न वञ्चयेत् ॥
एवं कुरुध्वं सततं बिल्वपत्रैः शिवार्चनम ।
इति सूतवचः श्रुत्वा सन्तुष्टैः मुनयो वदेत् ॥

Colophon:

इति श्री भविष्योत्तरपुराणे लक्षविल्वव्रतोद्यापनं सम्पूर्णम् ॥

424

Sl. No: 15204 लक्षविल्वव्रतोद्यापनम् Ms. No: P. 8015/1

Beginning:

ऋषयः ऊचुः—
बिल्वं च × सङ्ख्यातं व्रतं ब्रूहि महामुने।
विधानं किं फलं तस्य दयापर नमोऽस्तु ते॥

श्रीसूतः—
पुरा कैलासशिखरे गौरी पप्रच्छ शङ्करम् ।
तत्सर्वं कथयामासुः श्रृणुध्व सुसमाहिताः ॥

End:

आयुरारोग्यद पुंसां अपमृत्युहरं तथा ॥
तस्मात्त्वमपि हे ब्रह्मन् ज्ञानं मोक्षं च विन्दति ॥
ये श्रुण्वंति सततं ये पठन्ति स मानवाः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon:

इति ब्रह्मसंहितायां लक्षबिल्व × × व्रतकल्पः समाप्तः ॥

425

Sl. No: 15206 लक्षबिल्वव्रतोद्यापनम् Ms. No: P. 8637

Beginning:

कैलासशिखरे रम्ये सिद्धगन्धर्वसेविते
वज्रवैडूर्यमाणिक्यरचिते हेमपीठके ॥
सुखासीनं महादेवं सर्वलोकनमस्कृतम् ।
इदानीं श्रोतुमिच्छामि बिल्वपत्रव्रतं वद ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ।
लक्षबिल्वव्रतं सम्यग्वक्ष्यामि शृणु पार्वति ॥

End:

मुनिना मुक्तिमार्गेण व्रतं कुर्याद्यथाविधि ।
पुत्रपौत्रधनन्धान्यमन्ते कैवल्यमाप्नुयात् ॥
यद्व्रतं कारयेद्धीमान् श्रावयेदवलोकितः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

Colophon:

इति श्री लिङ्गपुराणे उमामहेश्वरसंवादे लक्षबिल्वपत्रव्रतोद्यापनं समाप्तम् ॥

426

Sl. No: 15208 लक्षबिल्वव्रतोद्यापनम् Ms: No: P. 9771/2

Beginning:

पूर्वोक्त एवंगुणविशेषणविशिष्टायां शुभतिथौ मम समस्तपापक्षयार्थं सर्वाभ्यु दयार्थं इह जन्मनि + + + + समस्तपापक्षयार्थं .... लक्षबिल्वपत्रव्रतं कर्तुं प्रत्यहं .... शिवपूजां करिष्ये ॥

End

ब्राह्मणान् भोजयेत्पश्चात् भूरिदानमतः परम् ।
एवं कृते नरो भक्त्या शिवलोकमवाप्नुयात् ॥
शिवस्य प्रियतामेति यथाऽहं नात्र संशयः ॥

Colophon :

इति श्री रुद्रयामले संहितायां नारायणप्रोक्तलक्षविल्वव्रतोद्यापनं संपूर्णम् ॥

427

Sl. No : 15212 लक्षलिङ्गपूजाव्रतम् **Ms. No. P. 8758/47**

Beginning :

अथ कालाग्निरुद्रोपनिषद्विधिना सर्वाङ्गं भस्मनोद्धूल्य —
पुरा कैलासशिखरे मुनिवृन्दनिषेविते ।
सुखोपविष्टं देवेशं पार्वती विनयान्विता ॥
पप्रच्छ देवं जगतां हिताय शिवमव्ययम् ।
+ + + + + + + + +

End:

ब्राह्मणान् भोजयेत् पश्चात् तेषामाशीः प्रगृह्य च ।
बन्धुभिः सह संयुक्तः स्वयं भुञ्जीत वाग्यतः ।
एवं यः कुरुते मर्त्यः सर्वान् कामानवाप्नुयात् ॥

Colophon :

इति लक्षलिङ्गपूजाविधिः ॥

428

Sl. No : 15213 लक्षवर्तिव्रतम् **Ms. No : P. 3121/2**

Beginning :

लक्षवर्तिव्रतं वक्ष्ये शाण्डिल्येनोदितं पुरा ।
सर्वपापक्षयकरं सर्वसम्पत्प्रदायकम् ॥
रजसोत्थं महत्पापं नारीणां च न संशयः ॥
निर्मूलं व्रजति क्षिप्रं लक्षवर्तौ कृते सति ॥

End :

तेभ्यो हि दक्षिणां दद्यात् स्वयमयाचतः परम् ।
एवं व्रतं तु या नारी करोति नियमान्विता ॥

रजोदोषविनिमुक्तो जीवभर्ता भवेद्धि सा ।
या चैव कुरुते नारी तस्मात्पुण्यमनन्तकम् ॥

Colophon :

इति श्री वायुपुराणे लक्षवर्तिव्रतं सम्पूर्णम् ॥

429

Sl. No : 15215 वरमहालक्ष्मीव्रतम् **Ms. No P 5295/16**

Beginning :

लक्षवर्तिव्रतं —

नारीणां गोप्यपापानां पापानि विविधानि च ।
अज्ञानां क्रूरता चैव परपुरुषाभिकांक्षिता ॥
भ्रूणहत्यादिकं पापं गर्भस्रावादिकं तथा ।
रहस्यभेदकरणं नानावर्णैः प्रलापनम् ॥

End :

तस्मादनेन दानेन सुप्रीतो भवतु केशवः ।
पात्रे स्थितां हरिं ध्यात्वा आचार्याय सदक्षिणम् ॥
दद्याद्गोमिथुनं चापि व्रतसंपूर्णहेतवे ।
ब्राह्मणान् भोजयेद्भक्त्या स्वयं भुञ्जीत बन्धुभिः ॥

Colophon :

इति स्कन्दपुराणोक्तलक्षवर्तिव्रतकल्पं समाप्तम् ॥

430

Sl. No : 15225 वरमहालक्ष्मीव्रतम् **Ms No : P. 10306/11**

Beginning :

ब्रह्मा —

देवदेवारविन्दाक्ष मायातीत महामते ।
त्वमेव वेत्ति तत्सर्वं भूयो भूयो नमाम्यहम् ॥
दीपानां लक्षसंख्याकं व्रतं ब्रूहि महामुने ।

End :

प्रतिमासं व्रतं चक्रे रजोदोषं निवार्य च।
विष्णुलोकं समासाद्य मोदते दम्पती मुदा॥

Colophon :

इति भविष्योत्तरपुराणे लक्षवर्तीव्रतकल्पं संपूर्णम्॥

431

Sl. No : 15226 लक्षवर्तिव्रतोद्यापनम् Ms. No. P. 2370/26

Beginning :

आर्यावर्ते पुरा कश्चित् वेश्याऽभूल्लक्षणाह्वया।
तस्या भुजङ्गः शूद्रोऽभूत् मुक्षो नाम महाबली॥
सा लक्षणा ऋतुस्नाता स्थिता गोदावरीतटे।

End :

अष्टोत्तरशतं हुत्वा होमशेषं समापयेत्॥
पात्रं च गुरवे दद्यात् ब्राह्मणान् भोजयेत्ततः॥
एवं कृत्वा महाभाग मुच्यते सर्वकिल्बिषैः॥

Colophon :

इति श्री स्कान्दपुराणे व्रतखण्डे लक्षवर्तीव्रतोद्यापनविधिः समाप्तः।

432

Sl. No : 15228 लक्षवर्तिव्रतोद्यापनम् Ms. No : P. 4335/64

Beginning :

वायुपुराणे लक्षवर्तीव्रतोद्यापनविधिरुच्यते।
उद्यापनदिनात्पूर्वं देवस्य लक्षवर्त्या × × × हूय, मदर्थं अग्ने नयेति मन्त्रेण तिलतण्डुलेन मम समस्तपापक्षयार्थं तर्पणं कुरुतेति ब्राह्मणान् वृणुयात्।

End :

सुवर्णवर्तिसंयुक्तं घृतेन परिपूरितम्।
तस्मादस्य प्रदानेन अतः शांतिं प्रयच्छ मे॥

यज्ञसाधनेति गोदानं कृत्वा, होमकर्तृभ्यः तर्पणकर्तृभ्यः दक्षिणां दद्यात्।
दशदानं कुर्यात्। यस्य स्मृत्येति समर्पणम्।+ + + + +

धौतवस्त्रं परिधाय त्रिराचम्य च वारिणा।
गायत्र्या मन्त्रितं वाऽपि वारि त्रिः प्रोक्ष्य तज्जलम्।
सोऽपि स्नानफलं प्राप्य मोदते विष्णुमन्दिरे।

Colophon :

इति श्री वायुपुराणे माघमाहात्म्ये लक्षवर्तीप्रशंसनं नाम त्रयोविंशोऽध्यायः॥

433

Sl No 15235 लक्षवर्तिव्रतोद्यापनम् Ms. No: P. 9633/27

Beginning :

लक्षवर्तिव्रतस्यास्य विधानं कीदृशं वद।
कस्मिन्मासे तु कर्तव्यं कस्य वा तु समर्पणम्॥
उद्यापनं कथं कार्यं किं फलं तस्य वा मुने।
त्वया पृष्टो याचकोऽपि लोकानां हितकाम्यया॥

End :

त्रिंशत्पलं कांस्यपात्रं घृतेन परिपूरितम्।
सुवर्णवर्तिसंयुक्तं आचार्याय निवेदयेत्॥
अथवा दशपलं कांस्यं तथा घृतसमन्वितम्।
सुवर्णवर्तिसंयुक्तं आचार्याय निवेदयेत्॥

Colophon :

इति लक्षवर्ति + + + सम्पूर्णम्॥

434

Sl. No. 15241 लक्षवर्तिव्रतोद्यपनम् Ms. No ; P. 10074/8

Beginning :

साधु साधु महाभाग चित्तं मे भयविह्वलम्।
लक्षवर्तिव्रतस्यास्य विधानं कीदृशं-वद॥
कस्मिन् मासे तु कर्तव्यं कस्य वा तु समर्पणम्।
उद्यापनं कथं कार्यं किं फलं तस्य वा मुने॥

End :

नमस्ते सर्वपापघ्न केशवाय नमो नमः ।

नमस्कारम् ।

जन्मप्रभृति यत्पापं तत्पापं हन्तुमर्हसि ।

प्रार्थनम् । इति पूजाविधानम् ।

कलशप्रतिमादानम् ।

दामोदर जगन्नाथ भक्तानुग्रहकारक ।

तव मूर्तिप्रदानेन सुप्रीतो भव मे हरे ॥

इति कलशवस्त्रप्रतिमादानम् ।

Colophon :

— — —

435

Sl. No 1524 : लक्षवर्तिव्रतोद्यापनम् **Ms. No : B 1211/5**

Beginning :

कर्ता मङ्गलस्नातो गोमयानुलेपित रङ्गवल्यादिरचिते रम्भास्तम्भाद्यलंकृते वितानेचूतपल्लवतोरणसहिते मण्डपे शुचौ देशे उपविष्टः × + × लक्षवर्तिव्रतोद्यापनाख्यं कर्म करिष्ये । इति सङ्कल्प्य ।

End :

इति यन्त्रेण त्रिंशत्फलकांस्यपात्रं घृतेन पूरितं सुवर्णवर्तिकायुक्तं आचार्याय निवेदयेत् । आचार्याय गां दद्यात । गां सम्पूज्य गवा अङ्गेष्विति दद्यात् । शत ब्राह्मणान भोजयेत् । स्वयं भुञ्जीयात् ।

Colophon

इति लक्षवर्तीव्रतोद्यापनविधिः समाप्तम् ॥

436

Sl. No : 15224 लक्षवर्तीव्रतम् **Ms No P. 9993/35**

Beginning :

सूतः —

शृण्वन्तु मुनयस्सर्वे दीपमाहात्म्यमुत्तमम् ।

गालवाय पुराऽऽख्यातं शिखिसारथिना पुरा ॥

गालवः— + + + + +

कथितानि त्वया सम्यग् व्रतानि विविधानि च ।
इदानीं श्रोतुमिच्छामि सर्वव्रतफलप्रदम् ॥

End :

शिखिसारथिना चेदं गालवाय महात्मने ।
कथितं मुनयः सर्वे मया वः सम्प्रकाशितम् ॥
ये शृण्वन्तीदमाख्यानं श्रद्धया धर्मतत्पराः ।
स स पापविनिर्मुक्तो यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्री स्कान्दपुराणे कपिलासंहितायां व्रतकाण्डे लक्षवर्तिव्रतं नाम षडशीतितमोऽध्यायः ।

437

Sl. No : 15245 लक्षशङ्खचक्रकथोद्यापनम् **Ms. No : C. 221/4**

Beginning :

सर्वेषामेव पापानां प्रायश्चित्तं परन्तप ।
विद्यन्ते देवदेवेश वद मेवपरा प्रभो । (?)

श्रीकृष्णः—

शृणुराजन् प्रवक्ष्यामि लक्षश्रीशङ्खचक्रकम् ।
सर्वसम्पत्करं नृणां सर्वशत्रुनिवारणम् ।
पुत्रादिसम्पदश्चैव सर्वरोगविनाशनम् ।

End

तदैव नारदो गत्वा यमलोकं महाद्भुतम् ।
राजपुत्रान् करे धृत्वा कुरुक्षेत्रं समागतः ॥
राजा च कृतकृत्यःस्याद्गोदानं कृतवान् मुदा ।
द्रव्यदानं तथा दत्वा ब्राह्मणाय महर्षये ॥
कालादी चैव सन्तुष्टा मुनिपादाभिवन्दनात् ।
दीर्घायुः.........

Colophon :

— — —

438

Sl. No : 15246 — लक्षस्वस्तिकव्रतम् — Ms. No : P. 3121/4

Beginning :

पार्वत्युवाच—

श्रीकरं जगतां नाथं गिरीशं नागभूषणम् ।
दयासमुद्रं भद्रं च रुद्रं भद्रासने स्थितम् ॥
पप्रच्छ मधुरैर्वाक्यैः पत्युरानन्दकारणैः ।
भवत्प्रसादात्तुलसीमाहात्म्यं च मया श्रुतम् ॥

End :

श्रीहरिः परमं तुष्टः प्रदद्यात् वाञ्छितं फलम् ।
एतद्धर्मप्रभावेन मोदते विष्णुमंदिरे ॥
लिखित्वा श्रावयित्वा च वाचयेच्च दिने दिने ।
अश्वमेधायुतं पुण्यं सम्प्राप्नोति न संशयः ॥

Colophon :

इति ब्रह्माण्डपुराणे लक्षस्वस्तिकं सम्पूर्णम् ॥

439

Sl. No. 15248 — लक्षस्वस्तिकव्रतम् — Ms. No : P. 5293/74

Beginning :

लक्षस्वस्तिकम् । युधिष्ठिर उवाच—

किं दानं किं व्रतं तस्य को विधिः कस्य पूजनम् ।
तत्सर्वं विस्तरेणैव ब्रूहि कृष्ण नमोऽस्तु ते ॥

श्रीकृष्णः—

चातुर्मास्ये च संप्राप्ते दशम्यां प्रारभेद्व्रतम् ।
पुण्याहवाचनं कृत्वा दापयेत् पञ्चगव्यकम ।

End :

एवं कृत्वा व्रतं सम्यक् पवित्रं पापनाशनम् ।
सर्वजन्मकृतैः पापैः मुच्यते नात्र संशयः ॥

ब्राह्मण: क्षत्रियो वैश्य: शूद्रश्चैव विशेषत: ।
एतत् स्वस्तिकलक्षेण व्रतं कुर्यान्महामते ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे लक्षस्वस्तिकव्रतकल्प: सम्पूर्ण: ॥

440

Sl No : 15250 लक्षस्वस्तिकव्रतम् Ms. No : P. 6866/17

Beginning :

युधिष्ठिर: —
श्रीनित्ये जगतां नाथ सर्वाघौघनिवारण ।
एवं सहस्रसंख्याकस्वस्तिकानि निबोध मे ॥
चातुर्मास्ये समारभ्य एकादश्यां समारभेत् ।
दिने दिने हरेरग्रे रचयेत्स्वस्तिकानि तु ॥

End :

पुत्रपौत्रांश्च लभते हरौ भक्तिं च शाश्वतीम् ।
तस्मात्सर्वप्रयत्नेन कर्तव्यं भूतिमिच्छता ॥
इदं व्रतं महापुण्यं सर्वाघौघविनाशनम् ।
करोति सुभगा नारी विष्णुलोकं च गच्छति ॥

Colophon :

इति भविष्योत्तरपुराणे लक्षस्वस्तिकव्रतं सम्पूर्णम् ॥

441

Sl. No : 15251 लक्ष्मीनारायणव्रतम् Ms. No : P. 2370/66

Beginning :

सनत्कुमार उवाच—
कृत्वा तु पातकं घोरं नरो वाऽप्यथवाऽङ्गना ।
मुच्यते कृत्तिकापुत्र तद्व्रतं ब्रूहि मे प्रभो ॥
स्वल्पायासेन गाङ्गेय कृतं मुनिजपुङ्गवै: ।

End :

कृत्वा पापसहस्राणि × × न गच्छति ।
यः पठेत् शृणुयाद्वाऽपि भक्तियुक्तेन चेतसा ॥
उपविश्य च साधूनां सोऽपि विष्णोः पदं व्रजेत् ॥

Colophon :

इति श्रीस्कन्दपुराणे लक्ष्मीनारायणव्रतं संपूर्णम् ॥

442

Sl. No : 15253 लक्ष्मीव्रतम् Ms. No : C 3416

Beginning :

आगमार्थं त्विति घण्टानादं कृत्वा, एवंगुणेत्यादिशुभतिथौ × × स्कान्दपुराणोक्त × × × प्रकारेण श्रीमहालक्ष्मीपूजां षोडशोपचारपूजां करिष्ये ।

End :

प्रार्थनम् —
आयुःप्रज्ञावैभवादि सर्वे सर्वेष्टार्थफलप्रदे ।
फलं समर्पये तुभ्यं सफलं कुरु मद्व्रतम् ॥

छत्रचामरदिषु पुनः पूजां कृत्वा यस्य स्मृत्यादि पूजासमर्पणं कुर्यात् । अनन्तरं सुवासिनीपूजा. फलपूजा । मङ्गळनीराजनं कृत्वा श्री ॥

Colophon :

इति महालक्ष्मीव्रतं संपूर्णम् ॥

443

Sl. No. 15255 वटसावित्रीव्रतम् Ms. No : C 4313/1

Beginning :

अथ वटसावित्रीपूजाप्रारम्भः ।

तत्र ज्येष्ठे पौर्णमास्यां वटसावित्रीव्रतम् । तत्र पूर्वविद्धाऽग्राह्या ।
पूर्वविद्धा न कर्तव्या अमावास्या च पौर्णमी ।
वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमम् ॥ इति ब्रह्मवैवर्तात् ॥

End :

सावित्री ब्रह्मगायत्री सर्वदा प्रियभाषिणी ।
तेन सत्येन मां पाहि दुःखसंसारसागरात् ॥
त्वं गौरि त्वं शुचिर्गौरी त्वं प्रभा चण्डमण्डले ।
भस्मीभवतु तत्सर्वं अवैधव्यं च देहि मे ॥

सावित्र्यै प्रार्थनम् । यस्य स्मृत्ये---न्यूनं सं ॥ अनेन--श्रीवटसावित्री प्रीयताम् ॥

Colophon :

— — —

444

Sl. No : 15257 वनभोजनविधिः **Ms No :P. 9916/48**

Beginning :

द्वादश्यां वा चतुर्दश्यां पौर्णमास्यामथापि वा ।
पञ्चम्यां वा महाप्सीह वनभोजनमाचरेत् ॥
सर्वोपस्कारसंयुक्तं वृद्धबालैश्च संयुतः ॥

End :

अश्वमेघसहस्रेषु वाजपेयशतेषु च ।
यत्फलं समवाप्नोति तत्फलं वनभोजने ॥

Colophon :

इति श्रीपाञ्चरात्रे भारद्वाजसंहितायां ब्रह्महंससंवादे उत्सवकाण्डे वनभोजन विधिर्नाम त्रिंशोऽध्यायः ॥

445

Sl. No : 15258 वरज्येष्ठाव्रतम् **Ms No : P. 5865/47**

Beginning :

चतुर्भुजामेकवक्त्रां त्रिनेत्रां च स्वरूपिणीम् ।
वामे चाभये पाशं च दक्षिणे कमलाङ्कुशाम् ।
रक्तवस्त्रधरां देवीं रक्तमाल्यानुलेपनाम् ।
रक्तवर्णां महातेजां चिन्तयेत् गृहमध्यगाम् ।

End :

ज्येष्ठायेति नमस्तुभ्यं मोदकं सघृतं प्रिये ।
अविघ्नं कुरु मे देवि सर्वकामफलप्रदा ॥

उपायनदानम् ।

ज्येष्ठस्य प्रतिगृह्णामि ज्येष्ठस्य प्रददाति च ।
ज्येष्ठायै तारकोभाभ्यां ज्येष्ठायै ते नमो नमः ॥

प्रतिग्रहणम् ।

Colophon :

इति अर्चनं संपूर्णम् ॥

446

Sl. No : 15261 वरज्येष्ठाव्रतम् Ms. No : P. 8165·52

Beginning :

चतुर्भुजामेकवक्त्रां त्रिनेत्रां सुखरूपिणीम् ।
वामे चाभयपादे च दक्षिणे कमलाङ्कुशौ ॥
रक्तवस्त्रधरां देवीं रक्तमाल्यानुलेपिनीम् ।
रक्तवर्णां महदेवीं चिन्तयेद्गृहमध्यगाम् ॥

ध्यानम्—

मात्राक्षरमयीं लक्ष्मीं नवानां रूपधारिणीम् ॥

End :

अविघ्नं कुरु मे देवि सर्वकामहरिप्रिये ।
क्षीरार्णवसमुद्भूते पापदारिद्र्यहारिणि ॥
उपायनं प्रदास्यामि प्रीत्या स्वीकुरु मङ्गले ॥

इति दानमन्त्रः ।

ज्येष्ठा वै प्रतिगृह्णाति ज्येष्ठा वै प्रददाति च ।
ज्येष्ठा हि तारकोभाभ्यां ज्येष्ठायै ते नमो नमः ॥

Colophon :

इति वरज्येष्ठाव्रतं संपूर्णम् ॥

447

Sl. No: 15263 वरमहालक्ष्मीव्रतम् Ms. No : P. 1617/3

Beginning ;

संङ्कल्पः। शुभतिथौ दीर्घसौमङ्गल्यसिद्ध्यर्थं वरलक्ष्मीमुद्दिश्य वरलक्ष्मीप्री त्यर्थं वरलक्ष्मीपूजां करिष्ये। कलशशङ्ख गणपतिपूजां करिष्ये।

पद्मासने पद्मकरे सर्वलोकैकपूजिते।
सुप्रीता भव सर्वदा॥

End :

एतत्ते सर्वमाख्यातं व्रतानामुत्तमं व्रतम्।
यथा दरिद्रः कुरुते व्रतं संपूर्णदं भवेत्॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः।
तत्प्रसादेन सर्वार्थाः भविष्यन्ति न संशयः॥

Colophon :

इति भविष्योत्तरपुराणे उमामहेश्वरसंवादे वरलक्ष्मीव्रतमाहात्म्ये सप्तत्रिं शोऽध्यायः।

448

Sl. No. 15267 वरमहालक्ष्मीव्रतम् Ms No: P 2268/31

Beginning ;

शुभे शोभने मुहूर्ते शुभतिथौ वर्षे वर्षे प्रयुक्त वरलक्ष्मीमुद्दिश्य वरलक्ष्मी प्रीत्यर्थं वरलक्ष्मीपूजां करिष्ये। आदौ कलशाराधनं करिष्ये। ध्यानम्।

पद्मासने पद्मकरे सर्वलोकैकपूजिते॥

End .

इदं सत्यमिदं सत्यं नरो भद्राणि पश्यति।
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः॥
इह प्राप्नोति सौभाग्यं परत्र च परां गतिम्।
स्वस्ति प्रजाभ्यः .... सुखिनो भवन्तु॥

Colophon :

इति ब्रह्माण्डपुराणे उमामहेश्वरसंवादे वरलक्ष्मीव्रतकल्पं संपूर्णम्॥

449

Sl. No : 15268 **वरमहालक्ष्मीव्रतम्** **Ms. No : P. 2370/30**

Beginning :

चतुर्भुजां महालक्ष्मीं जगदेकपूज्यां तथा ।
दण्डाक्षसूत्रवरदां तथैवाभयपाणिनीम् ।
पद्मासनां पद्महस्तां पद्मपत्रनिभेक्षणाम् ।।

End :

एतत्ते सर्वमाख्यातं व्रतानामुत्तमं व्रतम् ।
य इदं श्रृणुयान्नित्यं श्रावयेद्वा समाहितः ।।
तत्प्रसादेन सर्वेषां भविष्यन्ति सुसंपदः ।।

Colophon :

इति श्रीभविष्योत्तरपुराणे वरलक्ष्मीव्रतं सम्पूर्णम् ।।

450

Sl. No : 15277 **वरमहालक्ष्मीव्रतम्** **Ms. No : P. 5293/1**

Beginning :

पद्मासने पद्मकरे सर्वलोकैकपूजिते ।
नारायणप्रिये देवि सुप्रीता भव सर्वशः ।।
पद्मासनां पद्महस्तां पद्मपत्रालयप्रियाम् ।
× जस्तूयमानां च काञ्चनेक × × ।।

ध्यानम्—

End :

पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि ।
विश्वप्रिये विष्णुमनोमुकूले त्वत्पादपद्मं मयि संनिधत्स्व ।।

बायनदानमंत्रः—

इन्दिरा प्रतिगृह्णाति इन्दिरा वै ददाति च ।
इन्दिरा तारकोभाभ्यां इन्दिरायै नमो नमः ।।

Colophon :

इति पूजाविधानम् ।।

451

Sl. No : 15285 वरमहालक्ष्मीव्रतम् **Ms. No : P. 6866/9**

Beginning :

श्रीवरमहालक्ष्मीप्रीत्यर्थं सर्वकालेषु सकलचिंतितमनोरथावाप्ति + + +
यावच्छक्ति ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ।

End :

धन्या चारुमती लोके सुकृतं किं कृतं तथा ।
ततश्चारुमती साध्वी चचार व्रतमुत्तमम् ॥
तदारभ्य व्रतं कृत्वा सर्वे चाप्तमनोरथाः ।
सर्वसम्पत्समृद्धाश्च सन्ततं सुखमाप्नुयुः ॥

Colophon :

इति श्री भविष्योत्तरपुराणे उमामहेश्वरसंवादे वरलक्ष्मीव्रतकल्पं समाप्तम् ॥

452

Sl. No : 15297 वरमहालक्ष्मीव्रतम् **Ms No : P. 8015/2**

Beginning :

सुमुखश्चेत्यादि गणपतिपूजां कुर्यात् । आचम्य प्राणानायम्य- एवंगुणेत्यादि
शुभतिथौ मम सौभाग्यवृद्ध्यर्थं + + + + वरमहालक्ष्मीप्रीत्यर्थं
कल्पोक्तप्रकारेण यावच्छक्ति ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ।

End

वरलक्ष्मि महादेवि सर्वकामफलप्रदे ।
गृहीत्वेत्युपचारान् हि क्षमस्व परमेश्वरि ॥
सदसद्वा कृतं कर्म त्वामुद्दिश्य महेश्वरि ।
यद्भक्त्या वाऽप्यभक्त्या वा तत्सर्वं सफलं कुरु ॥
क्षमापणं । यस्य स्मृत्येत्यादिना पूजासमर्पणम् ॥

Colophon :

— — —

453

Sl. No: 15301 लक्षबिल्वव्रतम् **Ms. No: P. 8281/1**

Beginning :

आत्मशुद्धिं गृहशुद्धिं च सम्पाद्य सालङ्कारं कलशं रम्यमण्डपमध्ये संस्थाप्य तत्र महालक्ष्मीमावाह्य श्रीसूक्तेन लक्ष्मीसूक्तेन लक्ष्मीगायत्र्या श्रीं श्रियै पद्मनाभप्रियायै नमः स्वाहा इति मन्त्रैः ।

End

इन्दिरा तारकोभाग्यमिनि:रायै नमो नमः ।

इति वायनदानमन्त्रः —

पञ्चवायनकं दद्यात् फलाद्यैश्च सदक्षिणैः ।

विप्राय जायपतये वेद्यै तु ब्रह्मचारिणे ।

सुवासिन्यै ततस्त्वेकं दापयेच्च यथाविधि ॥

Colophon :

इति वरलक्ष्मीव्रतपूजाविधान सम्पूर्णम् ॥

454

Sl. No: 15303 लक्षवर्तिव्रतोद्यापनम् **Ms. No: P. 8486/1**

Beginning :

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी

गम्भीरावर्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।

लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुम्भैः

नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥

अनेन मन्त्रेण कलशस्थापनम् ।

\+ + + + + + +

End :

देवि देवि महालक्ष्मि सर्वदा सुखदायिनि ।

दशापूपं मया दत्तं सुप्रीता मम सर्वदा ॥

इदं षोडशपक्वान्नं शर्कराघृतपायसम् ।
इन्दिरे प्रीयतां देवि अतः शांतिं प्रयच्छ मे ।।

उपायनदानमन्त्रः —

इन्दिरा प्रतिगृह्णातु इन्दिरा वै ददाति च ।
इन्दिरा तारकोभाभ्यां इन्दिरायै नमो नमः ।।

प्रतिग्रहमन्त्रः —

Colophon :

इति पूजाविधानं समाप्तम् ।।

455

Sl. No : 15305 वरमहालक्ष्मीव्रतम् **Ms. No : P. 8758/13**

Beginning :

ओं अस्माकं सहकुटुम्बानां मम समस्तपापक्षयार्थं सर्वप्रतिबन्धनिवृत्त्यर्थं धनकनक वस्तु वाहनसंपूर्णसमग्रफलावाप्त्यर्थं सर्वाभीष्टसिद्ध्यर्थं दारिद्र्यविमोचनार्थं + + + वरलक्ष्मीव्रतं करिष्ये ।

पद्मासने पद्मकरे सर्वलोकैकपूजिते ।
नारायणप्रिये देवि सुप्रीता वरदा भव ।।
\+ + + + +

End :

उपायनदानम् —

इति संपूज्यसकले वरलक्ष्मी स्वशिक्षितः ।
उपायनं प्रदद्याद्वै श्रोत्रियाय द्विजन्मने ।।
इंदिरा प्रतिगृह्णाति इंदिरा वै ददाति च ।
इंदिरा तारकोभाभ्यां इंदिरायै नमो नमः ।।

प्रतिग्रहणम् —

Colophon :

इति पूजाविधानं समाप्तम् ।।

456

Sl. No : 15317 **वरमहालक्ष्मीव्रतम्** Ms. No P 9946/52

Beginning ;

संकल्प्य, एवंगुणविशेषणविशिष्टायां शुभतिथौ सुवासिनीनां सन्तान-सौभाग्यसिध्यर्थं पुत्रपौत्राभिवृद्ध्यर्थं आचरिष्यमाणसमग्रसम्पूर्णफलावाप्त्यर्थं वरमहालक्ष्मीदेवताप्रीत्यर्थं कल्पोक्तप्रकारेण यावच्छक्त्याध्यानावाहन षोडशोपचारपूजां करिष्ये ।

End :

भक्त्या विप्राय दातव्यं कमलारूपधारिणे ।
कमला प्रतिगृह्णातु कमला वै ददाति च ॥
कमला तारकोभाभ्यां कमलायै नमो नमः ।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं हरिप्रिये ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥

Colophon ;

— — —

457

Sl. No : 15320 **वरमहालक्ष्मीव्रतम्** Ms. No : C. 3032/12

Beginning :

आसनप्राणायामसङ्कल्पाः—
पूर्वोक्तैवंगुणविशेषणविशिष्टायां शुभतिथौ मम सर्वाभीष्टसिद्ध्यर्थं सकलकामनासिद्ध्यर्थं पुत्रपौत्राभिवृद्ध्यर्थं श्रीसूक्तमन्त्रेण वरमहालक्ष्मीपूजां करिष्ये—
अस्य श्री श्रीसूक्तमन्त्रस्य—

End :

पुत्रपौत्रधनं धान्यं वरं वृणीष्व मनसा वरदाहं यदीप्ससि । नैवेद्यशेषं एकपूगं एकपर्णपूर्णवर्जितं पुत्रपौत्रधनंधान्यं हः ॥ ऋक् ॥ अनेन मन्त्रेण दद्यात् ॥

Colophon :

इति वरमहालक्ष्मीपूजा समाप्ता ॥

458

Sl. No : 15324 वराहजयन्तीव्रतम् Ms. No : P. 4396/20

Beginning :

अथ वराहजयन्ती—

विष्णुं वराहरूपं च पाटलं बहुपीवरम् ।

हिरण्याक्षारिममलं कुन्थ्यां यज्जगतां हितम् ॥

इति ध्यात्वा पूजानमस्कारान्ते—

ततः प्रकल्पयेदर्घ्यं वराहायाथ विष्णवे ।

जानुभ्यामवनिं गत्वा ताम्रपात्रस्थवारिणा ॥

End :

वराहस्य जयन्त्याश्च विधिस्ते कथितो मया ।

उपोष्य जागरं कृत्वा + + ज्ञानज्ञोनृकृतं तथा ॥

व्रतं पुण्यप्रदं पुंसां पुरुषार्थप्रदायकम् ।

य इदं कीर्तयेद्भक्त्या श्रावयेद्वा समाहितः ॥

आयुरारोग्यमैश्वर्यं भवत्येव न संशयः ॥

Colophon :

इति स्कान्दे वराहजयन्तीकल्पः ॥

459

Sl. No : 15329 वसन्तपञ्चमीव्रतम् Ms No : C 3062/2

Beginning ;

व्रतराजग्रन्थे—अथ माघशुक्लपञ्चम्यां वसन्तप्रवृत्तिः । सा मध्याह्नव्यापिनी ग्राह्या । दिना × तद्व्याप्ता तद्व्याप्तौ वा पू × । मुहुर्तमात्रसत्त्वेपि परा ग्राह्या ।

End :

गन्धपुष्पैश्च धूपैश्च नैवेद्यैः पूजयेत्सदा ।

नारी नरो वा ×गोविन्द सन्तर्प्य पितृदेवताः ॥

× × चन्दनसमायुक्ता ब्राह्मणान्भोजयेत्ततः ॥

Colophon :

इति हेमाद्रौ वसन्तपञ्चमीनिर्णयः ॥

460

Sl No 15331 **विजयदशमीव्रतम्** Ms. No : P 9950/18

Beginning :

अथातः शृणु राजेन्द्र दशम्यां मङ्गलं महत् ।
सर्वरोगप्रशमनं सर्वपुष्टिप्रदं शुभम् ।।
रिपुञ्जयकरं सम्यगायुरारोग्यवर्धनम् ।
आश्वयुक्शुक्लपक्षे तु दशम्यां कारयेन्नृपः ।।

End

एवं यः कुरुते राज्ञा वर्षे वर्षे शुभोत्सवम् ।
आयुरारोग्यमैश्वर्यं विजयं चाधिगच्छति ।।
आधयो व्याधयस्तस्य न भवन्ति पराजयाः ।
श्रियं पुण्यमवाप्नोति विजयं चैव सन्ततम् ।।

Colophon :

इति विजयदशमीविधिः ।।

461

Sl. No : 15332 **विनायकचतुर्थीव्रतम्** Ms No P 923/3

Beginning :

स्कन्दपुराणोक्तप्रकारेण श्रीसर्वसिद्धिविनायकचतुर्थीकल्पोक्तप्रकारेण सर्वविघ्न निवारणार्थं सर्वविद्याप्राप्त्यर्थं सर्वाभीष्टसिद्ध्यर्थं सर्वगणनाथं नत्वा लक्षणफलकाम श्रीसिद्धिविनायकचतुर्थीव्रतंकरिष्ये ।

End :

उमापुत्राय नमः — अर्कपत्रम् ।
भिन्नदन्ताय नमः —अर्जुनपत्रम् ।
धूमकेतवे नमः — विष्णुक्रान्तपत्रम् ।
वटवे नमः – दाडिमपत्रम् ।
विघ्नराजाय नमः—देवदारुपत्रम् ।। ओम् ।।

Colophon :

— — —

462

Sl. No : 15333 विनायकचतुर्थीव्रतम् **Ms. No : P. 1617/1**

Beginning :

× × × × × वर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
ध्यायेद्गजाननं देवं तप्तकाञ्चनसन्निभम् ।
× × × × × वन्देऽहं गणनायकम् ॥

End :

चण्डिकाद्या मातृगणाः परितुष्टा भवन्ति च ।
य इदं शृणुयान्नित्यं सर्वकामस × × × म् ॥
सिध्यन्ति सर्वकार्याणि सिद्धिदस्य प्रसादतः ॥

Colophon :

इति स्कान्दे पुराणे कृष्णयुधिष्ठिरसंवादे सिद्धिविनायकव्रतकथा सम्पूर्णा ॥
सिद्धिविनायककल्पः सम्पूर्णः ॥

463

Sl. No : 15337 विनायकचतुर्थीव्रतम् **Ms. No : P 2370/29**

Beginning :

एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम् ॥
ध्यानम्—
विघ्नराज नमस्तेऽस्तु गौरीमलसमुद्भव ॥

End :

तस्मिन् संपूजिते वीर भक्त्या सिद्धिविनायके ।
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ॥
सिद्ध्यन्ति सर्वकार्याणि सिद्धिदस्य प्रसादतः ॥
इति श्री स्कन्दपुराणे सिद्धिविनायकव्रतं सम्पूर्णम् ॥

464

Sl. No : 15339 **विनायकचतुर्थीव्रतम्** Ms. No. P. 2561/1

Beginning :

वन्दे सौराष्ट्रदेशं × णजितद्विजरूपं स गृध्रम् ॥

ध्यानम् ।

छायापुत्रं महाकायं सायुधाष्टभुजं विभुम् ।
आवाहयामि मत्पीडानाशनायार्थसिद्धये ॥

End

अश्वत्थरूपिणे विष्णो सर्वकामफलप्रद ।
ध्यात्वा चालिङ्गय बाहुभ्यां आमूलाग्रं विलोकयेत् ॥
अश्वत्थकमहाभाग भगवत्प्रियदर्शन ।
नाशयित्वाऽथ निर्वृत्तां पीडां संरक्ष मां विभो ॥

Colophon :

इति श्रावणशनिवारव्रतं सम्पूर्णम् ॥

560

Sl. No. 15688 श्रीकल्पः Ms. No : P. 3374/56

Beginning :

श्रीकल्पं — पूर्वपक्षे पञ्चम्यां पौर्णमास्यां वा श्रियमर्चयेत् । पूर्वेद्युरुपोषितो बिल्व सारेण वा कदम्बसारेण वा श्रीप्रतिकृतिं कृत्वा स्थण्डिले वा लिखेत् ।

End :

धान्यै नमः। तुष्ट्यै नमः। प्रत्यङ्ग निर्माष्टि क्षुत्पिपासामिति स्विष्टकृदादि। एवमेव मासिमासि वा अहरहर्वा कुर्यात्। धनप्रा (?) × मायुष्यमारोग्यं च लभते ।।

Colophon :

इति श्रीकल्पः ॥

561

Sl. No : 15689 षष्ठकालव्रतम् Ms. No : P. 9760/40

Beginning :

संशयं परिपृच्छामो व्यासं वासिष्ठनारदाः।
अकाले वन्दिता सन्ध्या तामसैर्मानसैर्भुवि ॥
अधुना श्रोतुमिच्छामो × × × × ।
अमङ्गलहरं पुण्यं प्रायश्चित्तात्मकं व्रतम्।
अकालकरणे सन्ध्यापूर्वषड्विधकर्मणाम् ॥
तत्पापघ्नं वद मुने व्रतानामुत्तमं व्रतम्।

व्यासः —

षष्ठकालव्रतं नाम व्रतानामुत्तमं व्रतम्।
यत्कृत्वा मुच्यते जन्तुः अकालकरणादघम् ॥

End :

षष्ठकालव्रतमिदं यदि चीर्णं तु मानवैः।
सर्वकर्माणि पूर्णानि तेषां स्युर्नात्र संशयः॥

Colophon :

इति भविष्योत्तरपुराणे अष्टकालव्रतोद्यापनं (?) समाप्तम्।।

562

Sl. No : 15690 षोडशगौरीव्रतम् Ms. No : P. 4235/6

Beginning :

सूत उवाच —

शृणुध्वं मुनयः सर्वे व्रतं पापहरं शुभम्।

सर्वसंपत्करं स्त्रीणां पुत्रपौत्रप्रवर्धनम् ।
पुरा त्रेतायुगे विप्राः गङ्गातीरमुपाश्रिताः ॥

End :

चकार तद्व्रतं भक्त्या गौरीलोकमुपागता ।
एवं षोडशवर्षाणि कृत्वा व्रतमनुत्तमम् ॥
× × × पं माचरेत् ॥
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति स्कन्दपुराणे षोडशगौरिव्रतकल्पः सम्पूर्णः ॥

563

Sl. No : 15692 संकष्टहरचतुर्थीव्रतम् Ms : No. P. 4179/1

Beginning :

पार्वत्युवाच —
तपस्तप्तं महाघोरं दुस्तरं रोमहर्षणम् ।
न प्राप्तः पार्वती × × वल्लभः ॥
सङ्कष्टतरणं दिव्यं व्रतं नारद उक्तवान् ।
त्वदीयं यद्व्रतं तत्त्वं कथयस्व पुरातनम् ॥

End

श्रीपतिर्नैषधं लब्ध्वा पुण्यश्लोकं द्विजोत्तम ।
अहल्या च पतिं लब्ध्वा गौतमं प्राणवल्लभा ॥
विद्यार्थी लभते विद्यां धनार्थि लभते धनम् ।
पुत्रार्थी पुत्रमाप्नोति रोगी रोगात्प्रमुच्यते ॥

Colophon :

इति श्री स्कन्दपुराणे सङ्कष्टतरणश्रीविनायकव्रतं सम्पूर्णम् ॥

564

Sl. No. 15703 संकष्टहरचतुर्थीव्रतोद्यापनम् Ms. No: C. 1604/3

Beginning:

ब्रह्मणा कथमादिष्टं कृतवीर्याय द्विजम् ।
तन्ममाचक्ष्व संकष्टचतुर्थीव्रतमुत्तमम् ॥

इन्द्र उवाच—

सत्यलोके सुरासीनं सर्वेशं चतुराननम् ।
कृतवीर्यो महाभागः पप्रच्छ प्रणतो नृपः ॥

End:

ऋषिभिः पण्डितैस्सार्धं प्रेक्षकैस्सत्कुलैरपि ।
तस्य पुण्येन ते सर्वे गणेशं धाम चागमन् ।
पठनाच्छ्रवणादेतत्सद्यः स्यान्मुक्तिदं व्रतम् ॥

Colophon:

इति श्री ब्रह्माण्डपुराणे गणेशमाहात्म्ये ब्रह्मकृतवीर्जसंवादे .... ॥

565

Sl. No: 15705 संकष्टहरचतुर्थीव्रतोद्यापनम् Ms. No. P 5967/5

Beginning:

दारिद्र्यव्याधिशोकाद्यैः नानासंकष्टसंयुतैः ।
पीडितैः क्षुधया चैव रज्यभ्रष्टैर्नराधिपैः ॥
नर्वानैर्नरकस्कन्धरूधीं द्रवपीडितैः ।
किं कर्तव्यं वदोपायं पुत्रक्षेमार्थसिद्धये ॥

End:

रं [illegible]न्वेषणकामेन कृतं वायुसुतेन च ।
तेन व्रतप्रभावेन प्राप्ता तस्य पुनस्सती ॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रं वरार्थी [illegible] वरान् ।
कन्यार्थी लभते कन्या मोक्षार्थी मोक्षमाप्नुयात् ॥

Colophon:

इति [illegible]पुराणे [illegible]खण्डे स्कन्दऋषिसंवादे संकष्टचतुर्थीव्रतोद्यापनं संपूर्णम् ॥

566

Sl No 15707 | संक्रान्तिर्दीपव्रतम् | Ms No P 6000 18

Beginning :

युधिष्ठिर उवाच –
भगवन् ब्रूहि सम्यक्त्वं व्रतं पापप्रणाशनम् ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रायोपितयो वद ॥

+ + + +

श्री कृष्ण उवाच —
घनूराशि परित्यज्य मकरं याति भास्करे ।
पुण्यकालः स विज्ञेयः सर्वेषां नृपसत्तम ॥

End :

विसृज्य ब्राह्मणान् पश्चात् × × स्व वरवर्णिनी ।
कृष्णमुक्त्वा जगामासौ काशीं द्विजवरस्तदा ॥
कमला च तथा चक्रे संक्रान्त्या दीपकव्रतम् ।
व्रतप्रभावान्नष्टाऽपि सूर्यलोकं जगाम सा ।

Colophon

इति श्रीविष्णुरहस्ये संक्रान्तिदीपव्रतं समाप्तम् ॥

567

Sl. No: 15711 | संक्रांतिर्दीपव्रतोद्यापनम् | Ms. No: P. 4218,85

Beginning

संक्रान्तौ पञ्चवर्षाणि आज्येनैकं द्वितीयकम् ।
तैलेनोभयदीपाभ्यां कारयेदिष्टसिद्धये ॥
कृत्वैवं पञ्चवर्षे च पुण्यकाले शुचिव्रतः ।
पात्राधः प्रथमे वर्षे व्रीहितण्डुलमेव च ॥

End

यमो दीपेन सतुष्टः बाधां नैव करोति यः ।
अन्ते दिव्यविमानं च समारुह्य समाहितः ॥

सर्वैः भोगैः समायुक्तो दीपमालासमाहितः ।
जाज्वल्यमानो भृत्यैश्च विष्णुलोके महीयते ॥

Colophon :

इति श्री कूर्मपुराणे उत्तरखण्डे नारदजाबालिसंवादे संक्रान्तिदीपमालाव्रतोद्यापनं सम्पूर्णम् ॥

568

Sl. No : 15713 शिवरात्रिव्रतम् Ms: No. B. 622/15

Beginning :

अथ संक्रान्तिव्रतोद्यापनविधिः ।

एवंगुणविशेषणविशिष्टायां शुभतिथौ मया आचरितव्रतस्य साङ्गताफल-सिद्ध्यर्थं त्रिवर्षपरिमितस्य वा, अथवा पञ्चवर्षपरिमितस्य वा समस्तपापक्षयार्थं संक्रान्तिव्रतोद्यापनं........करिष्ये ।

End :

प्रतिमां कांस्यपात्रं च आचार्याय निवेदयेत् ।
तत्फलं कोटिगुणितं महादेवव्रतेन तु ॥
अस्थिमज्जागतैः पापैः जन्मान्तरशतैरपि ।
मुच्यते नात्र सन्देहः महादीपव्रतेन तु ॥

Colophon :

इति श्रि इतिहासपुराणसमुच्चये उमामहेश्वरसंवादे महादीपकथा संपूर्णा ॥

569

Sl. No : 15714 श्रवणद्वादशीव्रतम Ms. No : P. 7408/3

Beginning :

सङ्कल्प्य घण्टानादं कुर्यात् । कलशशङ्खपूजां च कृत्वा आकृष्णेनेति मन्त्रेण सूर्यनारायणपूजां कृत्वा एवं सर्वत्र । आप्याय स्व समेतु ते चन्द्राय नमः । अग्निर्मूर्धा दिवः ककुभोमाय नमः । उद्बुध्यस्वं बुधाय—

End :

सत्यनारायणं देवं वन्देऽहं कामदं प्रभुम् ।
लीलया विततं विश्वं येन तस्मै नमो नमः ॥

इति प्रार्थना ॥

Colophon :

—

570

S.No : 15715 सन्तानगोपालव्रतम् Ms. No : P. 2370/52

Beginning :

अथ ध्यानं प्रवक्ष्यामि पुत्रावाप्तिकरं परम् ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये वर्णसङ्कराः ॥
तेषां गृहस्थधर्माणां न चेत्पुत्रसन्ततिः ।

End

कृष्णध्यानरतो रात्रौ संभोगं कुरुतेऽपि च ।
सुतलाभो भवेत् क्षिप्रं सत्यं सत्यं न संशयः ।
सुचिरायुस्सुखीपुत्रो जायते च शुभावहो ॥

Colophon :

इति कालिकापुराणे सन्तानगोपालव्रतं संपूर्णम् ॥

571

Sl. No : 15720 सरस्वतीव्रतम् Ms. No : P. 2370/46

Beginning :

सनत्कुमार उवाच —

भगवन् देवदेवेश त्रिपुरार्दन शङ्कर ।
वक्तुमर्हसि सर्वज्ञ श्रोतुकामोऽस्मि साम्प्रतम् ॥
कां देवतां नमस्कृत्य पूजासिद्धिः कथं भवेत् ॥

End :

संप्राप्य वाग्विजृंभित्वं परां प्रीतिमवाप सः ।

देवास्सर्वेर्पफखास्सर्वे (?) व्यासाद्या मुनयस्तथा ।
सिद्धिं परामिमां प्राप्ताः भारत्यास्सुप्रसादतः ॥

Colophon :

इति श्री स्कन्दपुराणे सरस्वतीपूजा समाप्ता ॥

572

Sl No 15724 सरस्वतीव्रतम् Ms No : P 4218/83

Beginning :

सरस्वतीं यजेद्विद्वान् प्रणो देवीति मन्त्रतः ।
देवीं वाचमिवेत्यृग्भ्यां सरस्वत्यै नमो नमः ॥ इति ॥
ध्यायेच्चैव चतुर्हस्तां पाशांकुशकमण्डलुम् ।
तथैवाभयहस्तं च श्वेतवस्त्रैश्च भूषिताम ॥

End :

विसर्जनं श्रवण्यां तु यथा विभवविस्तरैः ।
प्रतिवर्षं तु कर्तव्यं वाग्देवीपूजनं मुदा ॥
पुत्रपौत्रभाग्यसम्पत्तिः बलवृद्धिर्यशोधनम् ।
विद्यार्थी लभते विद्यां प्राप्नोत्येव न संशयः ॥

Colophon :

इति शारदाविहितसरस्वतीपूजाविधानं संपूर्णम् ॥

573

Sl. No : 15726 सरस्वतीव्रतम् Ms No : P. 5574/12

Beginning :

एवंविशेषणविशिष्टायां शुभतिथौ मम धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्ध्यर्थं
+ + + + सरस्वतीदेवतामुद्दिश्य + + ध्यानावाहनादि +
षोडशोपचारपूजां करिष्ये इति सङ्कल्प्य, कलशपूजा गणपतिपूजा । ततः
कुसुमाक्षतान् गृहीत्वा पूजयेत् ।

पुस्तकेषु यतो देवी क्रीडते परमार्थतः ।
ततस्तत्र प्रकुर्वीत ध्यानमावाहनादिकम ॥

End

सरस्वति नमस्तुभ्यं × × × × ।
भरती प्रतिगृह्णातु भारतीयं ददाति च ।
भारती तारकोभाभ्यां भारत्यै ते नमो नमः ॥

वायनदानम् ॥

Colophon:

इति पूजाविधानं संपूर्णम ॥

574

Sl. No : 15728 सरस्वतीव्रतम् Ms. No. P. 8823/2

Beginning

सङ्कल्प्य पूर्ववत् कलशशङ्खपीठार्चनं कृत्वा सरस्वतीं ध्यायेत् ।
दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।
× × + × × सर्वदा सुप्रसन्ना ॥

End :

प्रदक्षिणम् —
नमश्शङ्खेन्दुवर्णायै नमस्ते ब्रह्मणः प्रिये ।
नमो वेदान्तवेद्याय शरण्यायै नमो नमः ॥
देहि मे × देवि विद्यां देहि महेश्वरि ।
सौभाग्यं सन्ततं देहि सर्वान्कामांश्च देहि मे । प्रार्थना ॥

Colophon

— — —

575

Sl. No. 15732 सरस्वतीव्रतम् Ms. No : P 9945/22

Beginning :

स्कन्द उवाच —
भगवन देवदेवेश त्रिपुरान्तक शङ्कर ।
वक्तुमर्हसि सर्वज्ञ श्रोतुकामोऽस्मि साम्प्रतम् ॥

कां देवतां नमस्कृत्य पूजासिद्धिः कथं भवेत् ।
नरा नार्यश्च सौभाग्यं लभन्ते यत्प्रसादतः ॥

End :

चन्द्रानने चन्द्रवर्णे चन्द्रादित्यसमप्रभे ।
इदमर्घ्यं प्रदास्यामि गृहाण भुवनेश्वरि ॥
अभीष्टदानाद्देवेशि चतुराननवल्लभे ।
श्रियं सौख्यं सौमनस्यं दत्वा मां पाहि सर्वदा ॥

Colophon :

— — —

576

Sl. No : 15739 सर्वतोभद्रमण्डलविधिः Ms. No. P. 2370/16

Beginning

ऋषय ऊचुः—
उद्यापनं विना यस्मात् व्रतं चाप्यतिनिष्फलं ।
उद्यापनप्रकारोऽयं संक्षेपात्कथ्यते मया ।
सर्वतोभद्रसंज्ञस्य मण्डलस्य क्रमं नृप ॥

End

आवाहयेऽहं सर्वेषु श्रीभूम्यां पार्श्वयोस्तथा ।
पश्चायुधानि मन्त्रेण देवमावाहयेद्ध्रुवम् ॥
एवं मण्डलरूपेण सर्वपापहरं शुभम् ॥

Colophon :

इति मण्डलक्रमः समाप्तः ॥

577

Sl. No : 15740 सर्वतोभद्रमण्डलविधिः Ms. No : P. 6297/71

Beginning :

मण्डलस्य क्रमं राजन् लक्षणं चावधारय ।
शास्त्रे भागवतीयेन सांख्येनोक्तं महात्मना ॥

गोमयेनोपलिप्योर्वीं चतुरश्रसमन्विताम् ।
बाहुमात्रमरत्निं च कर्तुः सूत्रेण ताडयेत् ॥

End :

पिशङ्गो गगनान्नीलमित्येतद्वर्णपञ्चकम् ।
तदभीष्टप्रदं धन्यं यशस्यं पुष्टिवर्धनम् ॥
तस्य दक्षिणपार्श्वे तु दर्भाम्बुपरिपूरितम् ।
सूत्रसौमसमायुक्तं कुम्भं संस्थापयेद्बुधः ॥
एवं मण्डलरूपेण सर्वपापहरं शुभम् ।
अर्चयेन्नियतो भक्त्या सर्वपापैः प्रमुच्यते ॥

Colophon :

इति सर्वतोभद्रम् ॥

578

Sl. No : 15743 सहस्रब्राह्मणभोजनव्रतम् Ms. No . P. 9965/106

Beginning :

अथ सहस्रब्राह्मणभोजनविधिः उच्यते —
सहस्रब्राह्मणं वक्ष्ये भोजनानां विशेषतः ।
दानतः विष्णुकरं दिव्यं सर्वपापप्रणाशनम् ।
प्रातरुत्थाय नद्यादौ स्नात्वा सन्ध्यादिकानि च ।
निर्वर्त्य वेदशीलांश्च ब्राह्मणान वरयेदथ ॥

End :

तव प्रसादात् सर्वं मे निर्विघ्नं कुरु सर्वदा ।
आयुरारोग्यमैश्वर्यं ज्ञानवित्तं महाबलम् ॥
शत्रुनाशो भवेत्तस्य राजवश्यं भवेत्तत ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे सहस्रब्राह्मणभोजनविधिः सम्पूर्णः ॥

579

Sl. No: 15745 सिद्धिलक्ष्मीव्रतम् Ms: No. P. 7581/8

Beginning:

श्री धेनुवागीश्वर्यै नमः ।

अथातः सम्प्र × × × ।

व्रतेनानेन सिध्यन्ति परे चापि मनोरथाः ॥

End:

दधित्यागे तु दध्यन्नं क्षीरत्यागे तु + +मनम् ।

सुवासिनीभ्यः पञ्चभ्यो दत्वाऽदश्चैव भोजयेत् ।

एवं कृते महाराज कां × × सुव्रतम् ॥

Colophon:

इति भविष्योत्तरपुराणे सिद्धिलक्ष्मीव्रतकल्पं सम्पूर्णम् ॥

580

Sl. No: 15747 सुब्रह्मण्यकल्पः Ms. No: C. 3772/2

Beginning:

प्रतितन्त्रे – आगमार्थं तु – घण्टानादं कृत्वा आचम्य प्राणानायम्य तिथ्यादिसंकीर्त्य चतुर्विधफलपुरुषावास्यर्थं पुत्रपौत्रपरिवृतस्य × × चिन्तितमनोरथावास्यर्थं श्री सुब्रह्मण्येश्वरप्रीत्यर्थं कल्पोक्तध्यानावाहनादि षोडशोपचारपूजां करिष्ये ।

End:

श्रीमज्जगलयाधीशं देवसेनापतिं प्रभुम् ।

सर्वावयवसंपूर्णं सर्वाभरणभूषितम ॥

तप्तजाम्बूनदप्रख्यं दिव्यसिंहासने स्थितम् ।

शक्तिं वरदहस्तं च सौम्यं त्रैलोक्यपूजितम् ।

इन्द्रादिदेवमुख्यानामावृतं षण्मुखं स्मरेत् ॥

Colophon:

— — —

581

Sl. No : 15748 सुमङ्गलीपूजाव्रतम् Ms. No : P. 3121/18

Beginning :

कुलधर्मं प्रवक्ष्यामि सावधानमनाः शृणु ।
गौतमेनैव मुनिना जनकाय परंतप ॥
उक्तं श्रुत्वा चकारासौ स्वसूत्रोक्तविधानतः ।
आदावेव विवाहः स्यात् सीतायाः शुभकारणम् ॥

End :

तस्मात् सत्यकुले जातः आगताश्च कुलं प्रति ।
तास्सर्वाः मत्कुला ज्ञेयाः मम क्षेमकरा इति ।
ज्ञात्वा पूजां उत्सवादौ सम्प्रदायानुसारतः ॥
कर्तव्यं × × द्भिः सर्वमङ्गलदायिनीम् ॥

Colophon :

इति भीष्मयुधिष्ठिरसंवादे मार्कण्डेयोपाख्याने पञ्चाशीत्यध्याये सुमङ्गली प्रार्थनाविधिः समाप्तः ॥

582

Sl. No : 15749 सुवासिनीपूजाव्रतम् Ms. No : P. 8735

Beginning ;

एवंगुणविशेषणविशिष्टायां शुभतिथौ एतच्छुक्लप्रतिपदारभ्य महानवमी पर्यन्तं कुमारीपूजां सुवासिनीपूजां करिष्ये ॥

End :

जया च विजया चैव जयन्ती चापराजिता ।
आकालिका कर्मदेवी पृथिवी चैकनन्दिनी ।
माहेशी चेति विज्ञेयौ नव दुर्गाः प्रकीर्तिताः ।

Colophon :

इति मार्कण्डेयोक्त सुवासिनी पूजाविधिः सम्पूर्णः ।

583

Sl. No : 15752 सूर्यचन्द्रव्रतम् Ms. No . P. 4218/79

Beginning :

एवंगुणविशेषणविशिष्टायां × × × तिथौ श्री सूर्यचन्द्रदेवतामुद्दिश्य सूर्यचन्द्रदेवताप्रीत्यर्थं कल्पोक्तप्रकारेण यावच्छक्ति ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ।

End :

प्रार्थनम् ।

दुःखार्णवनिमग्नोऽहं श्री सूर्यप्रतिमां विभो ।
दास्यामि तुभ्यं देवेश सोपस्करसदक्षिणम् ।।

इति प्रतिमादानमन्त्रः ।।

तापत्रयनिमग्नोऽहं सुखं वा × द्विजोत्तम ।
चन्द्रस्य प्रतिमां दास्ये गृह्यतां प्रीयतां विभो ।।

Colophon :

इति पूजाविधानं समाप्तम् ।।

584

Sl. No : 15754 सूर्यचन्द्रव्रतम् Ms No P 2370/24

Beginning :

एवंगुणविशेषणविशिष्टायामस्यां पुण्यतिथौ ममेष्टकाम्यादिसिद्ध्यर्थं चिन्तितमनोरथसिद्ध्यर्थं सूर्यनारायणदेवतामुद्दिश्य सूर्यनारायणदेवताप्रीत्यर्थं, चन्द्रदेवतामुद्दिश्य ....

End :

चन्द्रमावाहयामि । आकृष्णेनेति मन्त्रेण सूर्यनारायणस्य ध्यानावाहनादिषोडशोपचारपूजां कुर्यात् ।

अप्यायस्वेति मन्त्रेण चन्द्रपूजां कुर्यात् ।

दिवाकर नमस्तुभ्यमिति सूर्यार्घ्यम् । आप्यायस्वेति चन्द्रार्घ्यम् ।।

Colophon : — —

585

Sl. No : 15757 सूर्यनमस्कारव्रतम् Ms. No : P. 6004/2

Beginning :

अर्जुनस्य हितार्थाय कृष्णो वचनमब्रवीत् ।
उद्यंन्नद्येति मन्त्राङ्गं सौरं पापप्रणाशनम् ।।
रोगघ्नं च विषघ्नं च भक्तिमुक्तिफलप्रदम् ।
कण्वेन च मुदा दृष्टं गुह्यं परमसिद्धिदम् ।।

End

अणुभिश्च त्रिष + + स्याल्लघुमित्यभिधीयते ।
तूलैश्च त्रिशतं कुर्याद्यावा इत्यभिधीयते ।।
यवैश्च त्रिशतं कुर्यान्महं इत्यभिधीयते ।
योमे ह्यर्घ्यं प्रदा नृणां सूर्य एव न संशयः ।। (?)

Colophon :

श्री सूर्यनारायणार्पणमस्तु ।।

586

Sl. No 15762 सूर्यनमस्कारव्रतोद्यापनम् Ms. No : C 224/9

Beginning :

अथ नमस्कारोद्यापनविधिरुच्यते —
अथातः संप्रवक्ष्यामि व्रतं पापप्रणाशनम् ।
पुत्रप्रदमपुत्राणां रोगिणां रोगनाशनम् ।।
+ + + + +
रामरावणयोर्युद्धे कथितं कुम्भजन्मना ।।

End :

ब्राह्मणान् भोजयेत्पश्चात् शक्त्या षड्रससंयुतम् ।
तैर्गृहीत्वाऽऽशिषः पश्चात् स्वयं भुञ्जीत वाग्यतः ।।
एवं यः कुरुते मर्त्यो नमस्कारव्रतं द्विजः ।
सर्वान्कामानवाप्नोति सूर्यलोकं स गच्छति ।।

Colophon

इत्यगस्त्यवसिष्ठसंवादे अगस्त्यप्रोक्तनमस्कारोद्यापनविधिः समाप्तः ॥

587

Sl. No. 15765 सूर्यनारायणपूजाव्रतम् Ms No: P 7706/1

Beginning :

अथ कल्पोक्तप्रकारेण सूर्यनारायणपूजाविधिः उच्यते। नदीतीरं गत्वा शुद्धस्थलं गोमयेनोपलिप्य, पूजासम्भारमासाद्य, सूर्यस्याभिमुखमुपविश्य, मण्डलोद्धारणं कृत्वा,

जले वाऽपि स्थले वाऽपि पद्ममष्टदलं लिखेत् ।

End :

भास्कराय नमः इदमर्घ्यं, एवं क्रमेण अर्घ्यं कृत्वा, उत्तरपूजां कुर्यात् । यस्य स्मृत्येति समर्पणम् । मण्डलमध्यस्थित श्रीचन्दनधारणं कृत्वा, ओं ॥

Colophon :

इति सूर्यपूजाविधिः ॥

588

Sl No 15767 सूर्यनारायणपूजाव्रतम् Ms. No : P 6002/6

Beginning :

आसनप्राणायामादिकं कृत्वा, शुभतिथौ मम चिन्तितमनोरथावाप्त्यर्थं धन कनकवाहनसमृद्ध्यर्थं मनसाभीष्टसिद्ध्यर्थं आयुरारोग्यऐश्वर्याभिवृद्ध्यर्थं मम विद्यावाप्तत्वसिद्ध्यर्थं + + + पूजां करिष्ये ।

End :

कालिङ्गं गृहमध्यभागिनिलयं प्राचीमुखं × ×
रक्तं रक्तभूषणध्वजरथछत्राम्बराराध्यताम् ।
सप्ताश्वाकमलद्वयं (?) निधिकरं पद्मासनं काश्यपम्
दिव्यं मेरुगिरिप्रदक्षिणकरं सेवामहे भास्करम् ॥

Colophon :

— — —

589

Sl. No : 15770 सूर्यनारायणपूजातन्त्रम् **Ms. No : C. 4291/13-b**

Beginning :

आचम्य सुमुखश्च .... देशकालौ .... मम इह जन्मनि अखण्डसौभाग्यपुत्रपौत्राभिवृद्ध्यर्थं रथसप्तमीमहापर्वनिमित्तं श्रीसवितासूर्यनारायण-प्रीत्यर्थं + + षोडशोपचारपूजां करिष्ये ।

तेजोरूपं सहस्रांशुं सप्ताश्वरथगं वरम् ।
द्विभुजं वरदं पद्मलाञ्छनं सर्वकामदम् ॥

श्री सवितासूर्यनारायणाय नमः; ध्यायामि; ध्यानं समर्पयामि

End :

आचमनीयम्—

रक्तवस्त्रयुगं देव सूक्ष्मतन्तुविनिर्मितम् ।
शुद्धं चैव मया दत्तं गृहाण कमलाकर ॥

वस्त्रम्—

नमः कमलहस्ताय विश्वरूपाय ते नमः ।
उपवी + + पुंसां + + मनं कर्णौषु...... ॥

वायनम्—

यस्योदये स्याज्जगतः प्रबोधः
स कर्मसाक्षी भुवनस्य गोप्ता ।
कुष्ठादिकव्याधिविनाशको यः
स भास्करो मे दुरितं निहन्यात् ॥

प्रार्थना । यस्य स्मृत्येत्युक्त्वा ।

सनकादिनतं देवं – – – – –

सकलपू – – – कर्मेश्वरार्पणमस्तु । अनेन ध्यानावाहनादिषोडशो-पचारपूजनेन भगवाननेन सविता सूर्यनारायणः प्रीयताम् ।

Colophon :

— — —

590

Sl. No : 15773 **सोमप्रदोषव्रतम्** Ms No : P 10067/9

Beginning :

अथ पूजाविधिः। अथ मक्षतगात्रः स्नात्वा, कृतनित्यक्रियः पुण्याहं वाचयित्वा, पूजागृहे घण्टानादादिना भूतोच्चाटनादिकं कृत्वा, सम्भवद्भि-रुपचारैश्च नियतः करिष्ये।

End :

धर्मार्थकाममोक्षाणां यदेतत्साधनं परम्।
ज्ञानार्थमृक्षमः प्रावोधनाश्रीनः॥
जयाधिकारसिद्ध्यर्थं इन्द्रोपेन्द्रपुरोगमः।
विद्यार्थिनो × × ×

Colophon :

— — —

591

Sl. No : 15774 **सोमवतीव्रतम्** Ms: No. C.4291/10

Beginning :

सुमुखश्चेति श्लोकान् पठित्वा, देशकालौ स्मृत्वा, मम सौभाग्यादि सकलैश्वर्यपुत्रपौत्राभिवृद्ध्यर्थं + + × सोमवार अमायां अश्वत्थमूले लक्ष्मीनारायणपूजन अश्वत्थपूजनं सह तन्त्रेण करिष्ये। लक्ष्मीनारायण प्रतिमायां प्राणप्रतिष्ठां कृत्वा प्रतिमां चावाह्य—

अथ ध्यानम् –

व्यक्ताव्यक्तस्वरूपाय सृष्टिसंहारकारिणे।
आदिमध्यान्तहीनाय विष्टरश्रवसे नमः॥
अश्वत्थमूले लक्ष्मीनारायणाभ्यां नमः।

End :

अलङ्कारान् समर्पयामि।

नानाविधानि गन्धानि कृष्णागरुसमन्वितान्।
प्रीयतां तव देवेश गृह्यतां पुरुषोत्तम॥

गन्धम्॥

592

S.No: 15779 | सोमवारव्रतम् | Ms. No: P. 4218/37

Beginning:

आचम्य , प्राणानायम्य ।

सोमवारव्रतं देव करिष्ये त्वदनुज्ञया ।
निर्विघ्नेन व्रतस्यास्य परिपूर्तिः भवेन्मम ॥

व्रतग्रहणमन्त्रः ।

सोमवारे दिवा स्थित्वा × × × महेश्वर ।
नक्तं भोक्ष्यामि देवेश प्रसीद × × शेखर ॥

End:

नक्तेन सोमवारेऽस्मिन सोमनाथ जगत्पते ।
सन्तानभोगसौभाग्यमनन्तं कुरु शङ्कर ॥

प्रार्थनम् ।

सोमवारे दिवा स्थित्वा निराहारो महेश्वर ।
नक्तं पूजादिकं सर्वं अर्पयामि सदाशिव ॥

Colophon:

इति पुजाविधानं सम्पूर्णम् ॥

593

Sl. No: 15784 | सोमवारव्रतम् | Ms. No: P. 5292/3

Beginning:

ममोपात्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं मया आचरितस्य सोमैवारव्रतस्य सम्पूर्णफलसिद्ध्यर्थं सोमवारार्घ्यप्रदानं करिष्ये ।

सोमवारे दिवा स्थित्वा निराहारो महेश्वर ।
नक्तं भोक्ष्यामि देवेश अर्पयामि सदाशिव ॥

End:

सुब्रह्मण्य महाभाग कार्तिकेय षडानन ।
इदमर्घ्यं प्रदास्यामि सुप्रीतो भव सर्वदा ॥

इत्यर्घ्यम् ।

× रोगादि दारिद्र्यपापक्षुदपमृत्यवः।
भयक्रोधमनःक्लेशाः नश्यन्तु मम सर्वदा ॥

Colophon :

— — —

594

Sl. No : 15787 सोमवारव्रतम् Ms No : P 629/35

Beginning :

अथातः संप्रवक्ष्यामि रहस्यं ह्येतदुत्तमम्।
येन लक्ष्मीर्धृतिस्तुष्टिः पुष्टिः कान्तिश्च जायते॥
तद्विद्धि वस्तु संगृह्य सोमवारव्रतं प्रति।
नक्तोक्तविधिना सर्वं कुर्यात्पूजादिकं बुधः॥

End :

इत्येवमुक्त्वा धर्मात्मा वेदव्यासस्तिरोदधे।
सम्भूयते मुनिवराः स्तोत्रं कुर्युः रथोत्तमम॥
तेऽपि नित्यत्वमापन्नाः सर्वे च मुनिपुङ्गवाः।
व्रतस्यास्यानुभावेन नात्र कार्या विचारणा॥

Colophon

इति स्कान्दपुराणे गिरिकन्यकाप्रबोधने सोमवारव्रतं नाम एकोनपञ्चाशोऽध्यायः॥

595

Sl. No : 15791 सोमवारव्रतम् Ms. No : P ६ 81/9

Beginning :

नमस्ते शारदा देवि काश्मीरपुरवासिनि।
त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे॥
सोमवारव्रतं शम्भो करिष्ये तव सन्निधौ।
निर्विघ्नं कुरु मे देव सर्वाभीष्टफलप्रद॥

श्री उमामहेश्वराय नमः।

End :

कैलासवासि गौरीशो भगवान् भगनेत्रहृत् ।
चराचरात्मकं लिङ्गं लिङ्गरूपी नमोऽस्तु ते ॥
अज्ञानध्वान्तमीशानं दीपं ज्ञानप्रदायकम् ।
भद्रदीपं प्रदास्यामि प्रीयतां मे सदाशिवः ॥

Colophon : — — —

596

Sl. No : 15793 सोमवारव्रतम् **Ms : No. P. 8410/28**

Beginning :

उमया सहितं देवं प्रसन्नं परमेश्वरम् ।
अङ्काधिरोपितस्कन्दं हेरम्बं वृषवाहनम् ॥
व्याघ्रचर्मपरीधानं सोमं सोमविभूषितम् ।
ध्यायेच्चतुर्भुजं शम्भुं चन्द्रमौक्तिकसुप्रभम् ॥

End

उपवाससमर्पणम् —

एवं कृते तु विप्रेन्द्राः कांक्षितं लभते ऽचिरम् ।
किमत्र बहुनोक्तेन पापं यत्पूर्वसञ्चितम् ॥
अज्ञानिना मया देव व्रतमेतत् सुदुर्लभम् ।
कृतं भवतु मे देव अर्पयामि सदाशिव ॥

Colophon :

इति स्कान्दपुराणे सोमवारव्रतकल्पः संपूर्णः ॥

597

Sl. No : 15799 सोमवारव्रतम् **Ms No : P. 9916/26**

Beginning :

कोटिसूर्यप्रतीकाशं त्रिनेत्रं चन्द्रभूषणम् ।
शूलटङ्कगदाढक्का कुन्तपाशधरं विभुम् ॥
वरदाभय .... परमेश्वरम् ।
अङ्काधिरोपितस्कन्दं ॥

End :

कार्तिके लिङ्गदानेन कार्तिके पूजया विभो ।
शिवलोकमवाप्नोति नक्तभोजनकर्मणा ॥

लिङ्गदानमन्त्रः—

कैलासवासी गौरीशः .... दिशतु वाञ्छितम् ॥

Colophon :

— — —

598

Sl No : 15806 सोमवारव्रतोद्यापनम् Ms. No. P. 2370/65

Beginning

सनत्कुमार उवाच—

सोमवारव्रतस्यास्य समाप्य च विधानतः ।
कथयस्व गणेशान नन्दीश्वर महाप्रभो ॥

End

पाठश्रवणमात्रेण शिवभक्तिपरायणः ।
एतत्कृत्वा महाभाग परं पदमवाप्स्यसि ॥
तस्माद्व्रतोत्तममिदं शिवसायुज्यमाप्नुयात् ॥

Colophon:

इति शैवपुराणे सोमवारव्रतकथोद्यापनं समाप्तम् ॥

599

Sl No : 15809 सोमवारव्रतोद्यापनम् Ms. No : P 6496/59

Beginning :

सनत्कुमारः–

सोमवारव्रतस्यास्य उद्यापनविधिं क्रमात् ।
कथयस्व गुणेशान नन्दीश्वर महाप्रभो ॥

नन्दिकेश्वरः–

वर्षव्रतमिदं प्रोक्तं वर्षान्ते स्यात्समाहितः ॥

End :

य इदं शृणुयान्नित्यं यः पठेद्भक्तिसंयुतः ।
शिवलोकमवाप्नोति प्रयाति शिवसाम्यताम् ॥

Colophon :

इति श्रीलैड्ग्यपुराणे (?) सोमवारव्रतोद्यापनं सम्पूर्णम् ॥

600

Sl. No : 15810 सोमवारव्रतोद्यापनम् Ms No : P. 8758/26

Beginning :

सनत्कुमार उवाच—
कथितं व्रतमाहात्म्यं सोमवारस्य सत्तम ।
उद्यापनविधिं ब्रूहि तेनानन्तफलं भवेत् ॥
नन्दिकेश्वर उवाच—
शृणुष्वोद्यापनं ब्रह्मन् सोमवारस्य सत्तम ।
एतत्कृत्वा नरस्तस्माद्व्रतं सम्पूर्णतामियात् ॥

End :

इदं ते कथितं सर्वमुद्यापनविधिः प्रभो ।
य इदं शृणुयाद्भक्त्या कीर्तयेद्वाऽथ भक्तितः ॥
समस्तदुःखनिर्मुक्तः सर्वभोगसमन्वितः ।
इह लोके महाभोगान् प्राप्यान्ते च शिवं व्रजेत् ॥

Colophon

इति शिवरहस्ये सोमवारव्रतोद्यापनं सम्पूर्णम् ॥

601

Sl. No : 15812 सोमवारव्रतोद्यापनम् Ms. No : P. 9916/28

Beginning :

उद्यापनविधिं वक्ष्ये सोमनाथव्रतस्य तु ।
प्रारभेत व्रतं चैतत् मार्गे माघे च चैत्रके ।
शुद्धकालेऽन्यथा वाऽपि कार्तिके च विशेषतः ॥

End :

हेमाद्रिव्रतकोटिदानफलदा नृणां यदेकादशी
चीर्णा तच्छतवासरैकफलदा काचिज्जयन्ती तिथिः।
विख्यातं शिवरात्रिपर्वणि भवेत्पुण्यं जयन्ती शतं
तत्सादृक्षशतजं फलं गिरिसुते स्यात्सोमवारव्रते ॥

Colophon :

इति श्री स्कान्दपुराणे उमामहेश्वरसंवादे सोमवारव्रतोद्यापनं समाप्तम् ॥

602

Sl No : 15813 सोमवारान्वाधानव्रतम् Ms : No P. 9667/17

Beginning :

अमावासे सोमवार अन्वाधानम् ।
पूर्वोच्चरित एवंगुणविशेषणविशिष्टायां + + + + अमावास्या सोमवार व्रतोद्यापनहोमाख्यं कर्म करिष्ये ।

End

व्याहृतिभिः अष्टोत्तरसंख्यया तिलाज्यद्रव्यैः। मध्ये गृह्योक्ततन्त्रेण शेषेण स्विष्टकृदादि ।

Colophon :

— — —

603

Sl. No : 15814 सोमवारामावास्याव्रतम् Ms. No. P. 2370/24

Beginning :

श्री स्कन्द उवाच —
सोमवारे त्वमावस्या मध्याह्नव्यापिनी तिथिः।
तस्यां तिथ्यामेकभुक्तं स्नानं दानं महाफलम् ॥
प्रदोषव्यापिनी सा चेत् शिवार्चायां महत्फलम् ॥

End :

मोक्ष्यामि देवदेवेश अर्पयामि सदाशिव ।
उपवाससमर्पणम् । लिङ्गदानमन्त्रः —

कैलासवास गौरीश भगवन् भगनेत्रहृत् ।
चराचरात्मकं लिङ्गरूपी दिशतु वाञ्छितम् ।।

Colophon :

सोमवारामावास्याव्रतं समाप्तम् ।।

604

Sl. No. 15818 | सोमवारोपवासव्रतम् | Ms No: P 8165/21

Beginning :

शृणुध्वं मुनयः सर्वे नैमिशारण्यवासिनः ।
पप्रच्छ सूतमव्यग्रं सर्वे धर्माभिकांक्षिणः ।।

ऋषयः—

भगवन् सर्वधर्मज्ञ सर्वशास्त्रार्थपारग ।
ब्रूह्यसोमवारस्य: उपवासफलंमुने ।।

श्रीसूतः—

शृणुध्वमृषयः सर्वे इतिहासं पुरातनम् ।।

End

प्रदेयं धर्मभक्तायानुष्ठानवते तदा ।
गुरुभक्ताय शान्ताय शिवभक्ताय धीमते ।।
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
धर्मादिमोक्षपर्यन्ताः करस्थाः सर्वसिद्धयः ।।

Colophon :

इति सोमवारव्रतोपवासकल्पः संपूर्णः ।।

605

Sl. No: 15819 | सोमवारोपवासव्रतम् | Ms; No: P, 9667/28

Beginning :

शृण्वन्तु मुनयः सर्वे नैमिषारण्यवासिनः ।
पप्रच्छु :सूतमव्यग्रं सर्वधर्माभिकांक्षिणः ।।
भगवन् सर्वधर्मज्ञ सर्वशास्त्रार्थपारग ।
ब्रूह्य सोमवारस्य उपवासफलं मुने ।।

End :

य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः।
धर्मादिमोक्षपर्यन्ताः करस्थाः सर्वसिद्धयः॥

Colophon :

इति श्री सोमवारउपवासं सम्पूर्णम् ॥

606

Sl. No : 15820 सोमेश्वरव्रतम् Ms. No : P. 8774/4

Beginning :

उमया सहितं देवं प्रसन्नं परमेश्वरम् ।
अङ्काधिरोपितस्कन्धं हेरम्बं वृषवाहनम् ॥
व्याघ्रचर्मपरीताङ्गं सोमं सोमविभूषणम् ।
ध्यायेच्चतुर्भुजं शम्भुं चन्द्रमौलिसमप्रभम् ॥

End :

इन्दुवारे दिवा स्थित्वा निराहारो महेश्वरः।
नक्तं होष्यामि देवेश अर्पयामि सदाशिव ॥
उपवाससमर्पणम् ।
कैलासवासि गौरीश भगवन् भगनेत्रहन् ।
अज्ञानध्वान्तशमन त्राहि मां परमेश्वर ॥

Colophon.

— — —

607

Sl· No· 15821 स्वर्णगौरीव्रतम् Ms. No : P, 923/2

Beginning :

स्वर्णगौरीव्रत बरेवुदक्के निर्विघ्नमस्तु। (!)
एवंगुणविशेषणविशिष्टायां शुभतिथौ मम इष्टकामार्थसन्तानसौभाग्यसिद्ध्यर्थं सर्वकालसौमङ्गल्यसिद्ध्यर्थं स्वर्णगौरीप्रीत्यर्थं कल्पोक्तप्रकारेण षोडशोपचारपूजां करिष्ये इति सङ्कल्प्य ।

End

इह लोके सुखं भूत्वा जातजातिस्मरो भवेत् ।
तदन्ते मत्प्रसादेन मम सायुज्यमाप्नुयात् ॥

Colophon :

इति श्रीगौरी उद्यापनं संपूर्णम् ।गौर्यर्पणमस्तु ॥

608

Sl. No : 15822 स्वर्णगौरीव्रतम् Ms : No. P. 1617/2

Beginning :

संकल्पः । एवंगुण + तिथौ सुवर्णगौरीप्रीत्यर्थं गौरीपूजां करिष्ये ॥
कलशशङ्खपूजां करिष्ये । विनायकपूजां करिष्ये ।

विनायकं च गौरीं च नमस्कृत्य यथाविधि ।
उत्पलाद्यर्चनविधिं प्रवक्ष्याम्यनुपूर्वशः ॥

End :

या कुर्याद्व्रतमिदं मनसा भक्तियुक्ता च साध्वी
गौर्या रूपं प्रतिपदसशिवापाङ्गदृष्ट्या च योग्या ।
तस्यै सर्वं ददतु गिरिजा वाञ्छितार्थान् सुपुत्रान्
अन्ते मोक्षं भवति सुलभं गौरिसायुज्यमाप ॥

Colophon :

इति ब्रह्मोत्तरखण्डे शिवप्रोक्तस्वर्णगौरीव्रतं नाम सप्तषष्टितमोऽध्यायः ॥

609

Sl. No : 15824 स्वर्णगौरीव्रतम् Ms No. P. 2370/35

Beginning

चतुर्भुजां त्रिणेत्रां च सार्धचन्द्रविभूषिताम् ।
ध्यायेद्गौरीं महादेवीं चन्द्रकान्तसमप्रभाम् ॥
श्री गौरीध्यानम्—
लोकमाते मनोरम्ये सृष्टिस्थित्यन्तकारिणि ॥

End :

य: शोभनं व्रतमिदं कथितं शिवाया:
कुर्यान्मम प्रियतरो वनिता च गौर्या: ।
प्राप्य श्रियं समधिकं भुवि शत्रुसंङ्घं
निर्जित्य निर्मलपदं स च सा च याति ॥

Colophon :

इति श्री स्कान्दपुराणे स्वर्णगौरीव्रतं संपूर्णम् ॥

610

Sl. No : 15830 स्वर्णगौरीव्रतम् Ms. No : P. 4383/18

Beginning :

विनायकं च गौरीं च नमस्कृत्वा यथाविधि ।
उत्पलाद्यर्चनविधिं प्रवक्ष्याम्यनुपूर्वशः ।
तप्तकाञ्चनसङ्काशां पाशांकुशवराभयाम् ।
चित्रांशुकां सर्वभूषां त्रिनेत्रां चारुविग्रहाम् ॥
ईशार्धदेहिनीं देवीं गौरीं तां सस्मराम्यम् ।

End :

य: शोभनव्रतमिदं कथितं शिवाया:
कुर्यान्नर: सकलदुष्कृतनाशनं य: ।
प्राप्य श्रियं समधिकां भुवि शत्रुसङ्घान्
निर्जित्य निर्मलपदं स च सारयान्ति ॥

Colophon:

इति श्री स्कान्दपुराणे स्वर्णगौरीव्रतं सम्पूर्णम् ॥

611

Sl. No. 15831 स्वर्णगौरीव्रतम् Ms No : P. 5293/7

Beginning :

आगच्छ देवदेवेशि मर्त्यलोकहितेच्छया ।
सुव्रतं भवतु क्षिप्रं मम पूजां गृहाण मे ॥

ध्यानम्—

अपर्णायै नमस्तुभ्यं गृहाणासनमुत्तमम् ।
मया दत्तमिदं देवी सर्वपापविनाशिनी ॥

End :

यानि कानि चेति मन्त्रेण प्रदक्षिणम् ।
पापोऽहमिति नमस्कारः ।
आयुष्यमारोग्यमयाभिवृद्धि
सुसम्पदो भोगमतुल्यलक्ष्मीम् ।
माङ्गल्यवृद्धिं पतिभक्तिमग्र्यां
प्रयच्छ मे देवि सदा प्रसन्ना ॥
प्रार्थना ॥ यस्य स्मृत्यादि ॥

Colophon :

इति स्वर्णगौरीव्रतपूजाविधिः समाप्तः ॥

612

Sl. No : 15835 स्वर्णगौरीव्रतम् **Ms. No : P. 5865/61**

Beginning

सूत उवाच—

पुरा कैलासशिखरे सिद्धगन्धर्वसेविते ।
उमया सहितं स्कन्दं प्रप्रच्छ शिवमव्ययम् ।।
व्रतं कथय देवेश पुत्रपौत्रप्रवर्धनम् ।
सर्वसौभाग्यसुखदं सर्वसिद्धिप्रदं शुभम् ।

End ;

यः शोभनं व्रतमिदं कथितं शिवायाः
कुर्यान्मम प्रियतरो वनिता ह गौर्याः ।
प्रायशं × समधिकं सुविषष्टसंघं (?)
निर्जित्य मङ्गलपदं स च सा प्रयाति ॥

Colophon:

इति स्कन्दपुराणे काशीकाण्डे स्वर्णगौरीव्रतम् ।।

613

Sl. No : 15836   स्वर्णगौरीव्रतम्   Ms. No : P. 5865/37

Beginning :

ध्यायेत् त्रिलोचनीं देवीं सर्वाभरणभूषिताम् ।
चतुर्भुजस्वर्णरूपां सर्वाभरणभूषिताम् ।

ध्यानम्—

आयाहि कृपया गौरि स्वर्णनामसुपूजिते ।
अर्पयासि कृपया पूजां गृह्णी × य मयाऽद्रिजे ॥

End :

करिष्यामि व्रतं देवि स्वर्णजे × व्रतं तव ।
निर्विघ्नं कुरु कल्याणि व्रतस्य परिपूर्तये ॥

दोरबन्धनम् ।

स्वर्णगौरि शिवे देवि करिष्येऽहं व्रतं तव ।
पुत्रं देहि धनं देहि सुप्रीता मम सर्वदा ॥

Colophon :

इत्यर्चनं संपूर्णम् ॥

614

Sl. No : 15837   स्वर्णगौरीव्रतम्   Ms. No. P. 5946/6

Beginning :

विनायकं च गौरीं च नमस्कृत्वा तथा शिवम् ।
स्वर्णगौरीव्रतमिदं प्रवक्ष्यामि यथाविधि ॥
तप्तकाञ्चनसङ्काशां पाशांकुशवराभयाम् ।
चित्रांशुकां स्वर्णभूषां त्रिनेत्रां चारुविग्रहाम् ॥

End

वत्सलाङ्गि नमस्तुभ्यं गृहाणेदं सुपावनम् ।
सुव्रतं कुरु मे देवि सर्वकामांश्च देहि मे ॥

बायनदानम् —

भवानी प्रतिगृह्णातु भवानी वै ददाति च।
भवानी तारकोभाभ्यां भवान्यै ते नमो नमः ॥

Colophon :

इति पूजाविधानं समाप्तम् ॥

615

Sl. No : 15844 स्वर्णगौरीव्रतम् **Ms. No : P. 7143/1**

Beginning :

आगमर्थन्तु . . . . ।
+ + + + लाञ्छनम् ॥

पूर्वोक्तएवंगुणविशेषणविशिष्टायां शुभतिथौ विशेषेण मम आचन्द्रार्कसुव सिनीत्वसिद्ध्यर्थं ...... स्वर्णगौरीप्रसादसिद्ध्यर्थं ..... षोडशोपचारपूजां करिष्ये ।

End :

कमलाक्षि शिवे गौरि गृहाणेदमुपायनम् ।
सुव्रतं कुरु मे देवि सर्वकामार्थसिद्धये ॥

दानमन्त्रः —

भवानी प्रतीगृह्णाति भवानी वै ददाति च ।
भवानी तारकोभाभ्यां भवान्यै ते नमो नमः ॥

Colophon

इति पूजाविधानं सम्पूर्णम् ॥

616

Sl No : 15856 स्वर्णगौरीव्रतम् **Ms. No. P .8165/50**

Beginning :

ध्यायेच्चतुर्भुजां देवीं चन्द्रार्धकृतशेखराम् ।
सृणिपाशवराभीतिकरां वि × मभूषणाम् ॥ (?)
सुवर्णवर्णम्वर्णाख्यां गौरीं सर्वफलप्रदाम् ।

गौर्यै नमः ध्यानम् ।

एहि गौरि वरारोहे सर्वमङ्गलदायिनि ॥

End :

नमस्तुभ्यं महादेवि गृहीत्वोपायनं शुभम् ।
सप्तसन्तानसौभाग्यं भोगान् दत्त्वाभिरक्ष माम् ॥
पार्वती प्रतिगृह्णाति पार्वत्येव ददाति च।
पार्वती तारकोभाभ्यां पार्वत्यै च नमो नमः ॥

Colophon :

इति स्वर्णगौरीव्रतविधानं समाप्तम् ॥

617

Sl. No : 15860 स्वर्णगौरीव्रतम् Ms. No. P. 8410/10

Beginning .

विनायकञ्च गौरीञ्च नमस्कृत्य यथाविधि।
गौर्यर्चनविधिं वक्ष्ये यथाशास्त्रानुपूर्वकम् ॥
या सा पद्मासनस्था विपुल कुचतटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिः स्तनभरणयुता शुभ्रवस्त्रोपनीया ॥

End

अर्घ्यं —

त्वं देवी देवदेवानां त्वं माता त्वं पितामही ॥
त्वत्प्रसादेन मे देवि न वैधव्यं भवेदिह ॥
उत्पलाङ्गि सिते गौरि करिष्यामि व्रतोत्तमम् ।
सम्पूर्णं कुरु मे गौरि भवतु त्वत्प्रसादतः ॥

Colophon :

इति पूजाविधानं संपूर्णम् ॥

618

Sl No : 15862 स्वर्णगौरीव्रतम् Ms. No : P .8769/13

Beginning :

एवंगुणेत्यादिशुभतिथौ मम आचरितव्रतस्य सम्पूर्णसकलसमग्रफलावाप्त्यर्थं चिरकालसुवासिनीत्वसिद्ध्यर्थं स्कन्दपुराणोक्तप्रकारेण सम्भावितनियमेन स्वर्णगौरीव्रतं करिष्ये । कलशपूजां कृत्वा,

End :

पूगीफलञ्च पर्णानां नारीणां गौरिमेव च ।

इत्युपायनदानम् —

गौरी च प्रतिगृह्णातु गौरी वै च ददाति च ।

गौरी च तारकोभाभ्यां स्वर्णगौर्यै नमो नमः ॥

Colophon :

इति पूजाविधानं सम्पूर्णम् ॥

619

Sl. No. 15863 स्वर्णगौरीव्रतम् **Ms. No : P. 8870/8**

Beginning :

गौरी सुवर्णवर्णाभां स्वर्णपद्मनिवासिनीम् ।

पाशांकुशधरां विभूतिवरदां शिववल्लभाम् ॥

गौरीध्यानम —

पद्मासनस्थां द्विभुजां स्वर्णाभां सर्वसुन्दरीम् ।

End :

मोदकान् शर्करायुक्तान् घृताक्तान् सुमनोहरान् ।

ताम्बूलञ्चापि दास्यामि तुष्टा भवतु पार्वती ॥

उपायनदानम् —

गौरी च प्रतिगृह्णातु .... ॥ प्रतिग्रहमन्त्रः ॥

Colophon :

इति गौरीपूजाविधानं समाप्तम् ॥

620

Sl. No : 15873 स्वर्णगौरीव्रतम् **Ms. No : P. 9879/1**

Beginning :

पाद्यं गृहाण देवेशि ज्ञानैश्वर्यस्वरूपिणि ।

रम्याप्यङ्गोल × देवि मुनिभिः परिशो × ॥

\+ + + + कलशे स्थितम् ।

सुगन्धोदकसंयुक्तं गृहाण सुरसुन्दरि ॥ अर्घ्यम् ॥

यानि कानि च पापानि . . . . ॥

प्रदक्षिणम् । मन्त्रपुष्पम् ।

नमस्ते देवि + + नमस्ते सर्वमङ्गले ।

नमस्कारम् ।

पुत्रं देहि यशो देहि सर्वसौभाग्यमेव च ।

दोरबन्धनम् । श्रिये जातेति नीराजनम् । गौरीमिमायेति प्रार्थनम् ॥

Colophou

इति पूजाविधानम् ॥

621

Sl. No : 15877 स्वर्णगौरीव्रतम् Ms No : P.10048/10

Beginning :

प्राणनायम्य, सङ्कल्प्य, सार्वकालसौमङ्गल्यसिध्यर्थं पुत्रपौत्राभिवृध्यर्थं स्वर्णगौरीपूजां करिष्ये । कलशपूजा । प्राणप्रतिष्ठापनम् । आदौ गणेश पूजां करिष्ये ।

End :

षोडशापूपसंयुक्तं नवसूपस्थितं च यत् ।
शूर्पेणाच्छादितं तत्र सुवासिन्यै प्रदापयेत् ॥
कमलाक्षि शिवे गौरि गृहाणेदमुपायनम् ।
सुव्रतं कुरु मे देवि सर्वकामार्थ देहि मे ॥

दानमन्त्रः ।

भवानी प्रतिगृह्णातु भवानी वै ददाति च ।
भवानी तारकोभाभ्यां भवान्यै ते नमो नमः ॥

प्रतिग्रहणमन्त्रः ।

Colophon :

इति पूजाविधिः ॥

622

Sl. No. 15882 **स्वर्णगौरीव्रतम्** **Ms. No : C.3032/19**

Beginning :

ओं स्वर्णगौरीपूजां करिष्ये ।

ध्यायेत्त्रिलोचनीं देवीं रक्तवस्त्रविभूषिताम् ।
चतुर्भुजां स्वर्णरूपां सर्वाभरणभूषिताम् ॥

ध्यानम् —

पाहि मां कृपया गौरि स्वर्णनाम्न सुपूजिते ।
अर्चयामि कृतां पूजां गृहाण हिमकन्यके ॥

End

वायनदानं, शूर्पदानम् ,

गौरीदं प्रतिगृह्णातु गौरी वै च ददाति च ।
गौरिजा तारकोभाभ्यां गौरिजायै नमो नमः ॥

यस्य स्मृत्या च ॥ षोडशार्घ्यम् ॥

Colophon ;

इति स्वर्णगौरीव्रतं समाप्तम् ॥

623

S.No : 15883 **स्वर्णगौरीव्रतोद्यापनम्** **Ms : No : P. 2209/4**

Beginning :

कैलासशिखरे रम्ये सिद्धगन्धर्वसेविते ।
उमया सहितं स्कन्दः पप्रच्छ शिवमव्ययम् ॥
उद्यापनविधानेन व्रतस्य फलमस्ति हि ।

ईश्वर उवाच —

स्वर्णगौरी व्रतस्यास्य उद्यापनविधिं ततः ।
शृणु स्कन्द महाप्राज्ञ व्रतं सम्पूर्णतां यथौ ॥

End :

देवी स्पर्श (?) नमस्कृत्वा । [illegible] ([illegible]) ॥

विसर्जयित्वा तान्सर्वान् हविष्याशजितेन्द्रिय:।
एवं य: कुरुते भक्त्या शिवलोके महीयते॥

Colophon:

इति श्री स्कान्दपुराणे गौरीकाण्डे स्वर्णगौरीव्रतोद्यापनं समाप्तम् ॥

624

Sl. No: 15884 स्वर्णगौरीव्रतोद्यापनम् Ms. No P 4180/89

Beginning;

स्वर्णगौर्युद्यापनम् — सूत:—
उद्यापनविधिं ब्रूहि स्वर्ण × रीव्रतस्य तु।
व्रतं षोडशवर्षाणि कुर्यादुद्यापनं तत:।
यदा भाद्रपदे मासि प्राप्ता शुक्लतृतीयया॥
कृत्वा व्रतं पू × × च कुर्यान्नियतमानस:।

End:

ततो व्रती कथां श्रुत्वा व्रतस्य परिपूर्तये।
ब्राह्मणान् भोजयेत्पश्चात् सुवासिन्यादिभि: सह॥
सोऽद्यापनव्रतमिदं य: कुर्याद्भक्तिमानस:।
इह लोके सुखीभूत्वा अन्ते शिवपुरं व्रजेत्

Colophon:

इति स्कन्दपुराणे गौर्युद्यापनं समाप्तम् ॥

625

Sl. No: 15890 स्वर्णगौरीव्रतोद्यापनम् Ms. No: P. 8410/27

Beginning:

उद्यापनं स्वर्णगौर्या: सर्वमङ्गलहेतवे।
तद्विधानं प्रवक्ष्यामि शृणुष्व सुसमाहित:॥
उद्यापनदिनात्पूर्वं समुत्थाय स्नानं कुर्याद्यथाविधि। (?)
पत्न्या च सहित: कुर्यात् स्वस्तिवाचनपूर्वकम्॥

End :

शूर्पोपायनकं चैव कञ्चुकेन समन्वितम् ।
दद्यात् सुप्रीतये गौर्याः × समर्पणम् ॥
अर्घ्यं दद्याच्च पूर्वोक्तकल्पानुसरणेन तु ।
एवं कृत्वा व्रतं गौर्या शिवलोके महीयते ॥

Colophon :

इति श्रीकाशीखण्डे स्वर्णगौरीव्रतोद्यापनं समाप्तम् ॥

626

Sl. No : 15891 स्वर्णगौरीव्रतोद्यापनम् **Ms No. P. 8769/16**

Beginning:

युधिष्ठिर उवाच—
उद्यापनविधिं ब्रूहि तृतीयायां सुरेश्वर ।
भक्तितः श्रोतुमिच्छामि व्रतसम्पूर्णहेतवे ॥
श्रीकृष्ण उवाच—
उद्यानविधिं वक्ष्ये सावधानेन वै शृणु ।
त्रिंशद्दण्डप्रमाणेन प्रसृतं दक्षिणोत्तरे ॥

End :

अन्येभ्यो ब्राह्मणेभ्यश्च दक्षिणा च प्रयत्नतः ।
प्रयत्नपरया भक्त्या दद्याद्वित्तानुसारतः ॥
बन्धुभिः सह भुञ्जीन परतश्च परेऽहनि ।
एवं कृत्वा भवेत्पार्थ परिपूर्णव्रती यतः ॥

Colophon :

इति भविष्योत्तरे स्वर्णगौरीउद्यापनविधिः समाप्तः ॥

627

Sl. No : 15893 स्वस्तिकपद्मव्रतम् **Ms : No. P. 5669/16**

Beginning :

पूर्वोच्चरितएवंगुणतिथौ मम दीर्घसौमङ्गल्यमनसा स्वस्तिकपद्मव्रतांगपूजां करिष्ये । ओम् नारायणाय नमः इति ध्यानादिसर्वोपचारपूजां कुर्यात् ॥

End :

श्रीसूत:

श्रीकरं जपतां नाथं भवद्भिर्जगभूषणम् ।
पद्मं सहस्रसंख्याकस्वस्तिकानि दिने दिने ॥
पलाशसमिधश्चैव इदं विष्णुश्च हावयेत् ।
घृतं तु विष्णुगायत्र्या होममष्टोत्तरं शतम् ॥
वह्निं प्रदक्षिणीकृत्य त्रिवारमभिवाद्य च ।
ब्राह्मणान्भोजयेत्पश्चात् स्वयं भुञ्जीत बन्धुभिः ॥
× लोपामुद्रांस्तथाष्टम्यां सपत्नीकं प्रपूजयत् ॥

Colophon :

इति भविष्योत्तरपुराणे स्वस्तिकव्रतं सम्पूर्णम् ॥

628

Sl. No : 15849 हंसजयन्तीव्रतम् Ms. No : P. 5325/121

Beginning :

शङ्खचक्रधरं देवं किरीटादिविभूषितम् ।
सम्यक् ज्ञानमयं देवं हंसासनहरिं भजेत् ॥
वक्ष्ये हंसजयन्तीं च सर्वेषां मुक्तिसिद्धये ।
उत्सवान्तं समभ्यर्च्य द्विजाद्याश्च जपादिभिः ॥

End :

दिव्ये सौधे स्वयंव्यक्तमानुषे ग्रामपट्टणे ।
तत्तत्स्थलादिवृद्ध्यर्थं जयायाप्यभिवृद्धये ॥
सर्वसस्याभिवृद्ध्यर्थं सर्वरोगहराय च ।
वेदशास्त्रादिवृद्ध्यर्थं ज्ञनमोक्षाभिवृद्धये ॥

Colophon :

इति श्री पराशरसंहितायां नृसिंहजयन्तीविधिर्नाम सप्तमः ॥

629

Sl. No: 15895 हरितालिकाव्रतम् Ms. No: P. 3329/20

Beginning:

पूर्वोच्चरित एवंगुणविशेषणविशिष्टायां शुभतिथौ मम सर्वकालिकसौमङ्गल्यादि धनरत्नक्षेत्रायुरारोग्यऐश्वर्याभिवृद्ध्यर्थं सन्तानसौभाग्यसिद्ध्यर्थं वर्षे वर्षे कर्तव्य एत द्वर्षप्रयुक्तहरितालव्रतं कल्पोक्तप्रकारेण उमाममहेश्वरपूजां करिष्ये ।

End:

अश्वमेधसहस्रेषु वाजपेयशतानि च ।
कथाश्रवणमात्रेण तत्फलं प्राप्यते नरैः ॥
एतत्ते कथितं देवि तवाग्रे व्रतनायकम् ।
कोटियज्ञफलं तस्य यस्यानुज्ञानमात्रतः ॥

Colophon:

इति श्री लिङ्गपुराणे हरपार्वतीसंवादे हरिताकव्रतकथाश्रवणं समाप्तम् ॥

630

Sl. No: 15898 हरितालिकाव्रतम् Ms. No: P. 7772/1

Beginning

प्राणानायम्य, सङ्कल्प्य, मम इह जन्मनि जन्मान्तरेषु सौभाग्यपुत्रपौत्रादि + + + नया स्वीकृतस्य हरितालगौरीव्रतसाङ्गोपाङ्गफलसिद्ध्यर्थं कल्पोक्तप्रकारेण पूजां करिष्ये ।

End.

इदं वायनदानं च (१) सोपस्करफलं ताम्बूलदक्षिणासहितं उमामहेश्वर-प्रीतिं .... । मम .... देवस्य त्वेति । यस्य स्मृत्या च .. ॥

एकचित्तेन मनसा शृणुयात्कथयान्वितः ।
सप्तजन्म भवेत्सौख्यं प्राप्नुयान्नात्र संशयः ॥
कथां श्रुत्वा यज्ञोपवीत उद्वासनम् । (?)

Colophon:

इति पूजाविधानं सम्पूर्णम् ।।

631

Sl. No : 15901 हरितालिकाव्रतम् Ms. No : P. 9760/21

Beginning :

मन्दारमालांकुरितालिकालिम्
कपालमालांकितशेखरायै ।
दिव्याम्बरायै च दिगम्बराय
नमश्शिवायै च नमश्शिवाय ॥

सहस्रशीर्षेत्यावाहनम् —

End

एवं पूजा प्रकर्तव्या रात्रौ जागरणं कृतम् ।
तेन पुण्यप्रभावेन आसनं चलितं मम ॥

Colophon :

इति पूजाविधानं सम्पूर्णम् ॥

632

Sl. No : 15902 हरितालिकाव्रतम् Ms. No P. 9939/3

Beginning :

गौर्यै नमः । फलम् । पूगीफलताम्बूलम् । दक्षिणाम् ।
चन्द्रादित्ये च ध × णि विधु × गिवस्तथैव च ।
त्वमेव सर्वज्योतींषि ला × प्रतिगृह्यताम् ।।

End :

अनेन हरितालिकागौरीदेवतापूजनेन भगवान् सर्वात्मकः श्रीउमामहेश्वरः प्रीणातु ।
एकचित्तेन मौनेन शृणुयात्कथयाऽन्वितः ।
सप्तजन्म भवेत्सौख्यं प्राप्नुयान्नात्र संशयः ।।

Colophon :

इति पूजाविधानं सम्पूर्णम् ।

633

Sl. No : 15906 | **हरितालिकाव्रतम्** | **Ms. No : C. 3032/16**

Beginning :

हरितालकव्रतं लिङ्गपुराणोक्तम् ।

एवंगुणविशेषणेति सङ्कल्पः । मम इह जन्मनि चिन्तिताभीष्टसिद्ध्यर्थं सौभाग्यवृद्धिपुत्रपौत्रसम्पत्सकलमनोरथसिद्ध्यर्थं यथाशक्ति मिलितोपचारैः हरितालकव्रतं करिष्ये ।

End :

यैर्नरैः कथितं देवि तवाग्रे व्रतनायकम् ।
कोटियज्ञफलं तस्य तस्यानुष्ठानमात्रतः ॥

शौनकः —

एवं ये कुर्वते भक्त्या उमया चरितं व्रतम् ।
तेषां मुक्तिः करतलामलकं च भवेद्ध्रुवम् ॥

Colophon :

इति श्री लिङ्गपुराणे ईश्वरपार्वतीसंवादे हरितालकव्रतं सम्पूर्णम् ॥

634

Sl. No : 15911 | **हरितालिकाव्रतोद्यापनम्** | **Ms. No. P. 10048/9**

Beginning :

उद्यापनविधिं वक्ष्ये हरितालव्रतात्मकम् ।
यथामति विधानेन वक्ष्ये सौभाग्यदायकम् ॥
उद्यापनं विना किञ्चित् व्रतं स्यान्निष्फलं क्वचित् ।
तस्मात्प्रयत्नमासाद्य × × उद्यापनक्रमम् ॥

End

गन्धमाल्यैश्च विविधैः दक्षिणाभिश्च दापयेत् ।
गोदानं च ततः कुर्यात् व्रतस्य पूर्तये तथा ।
× दानं ततः कृत्वा वित्तशाठ्यविवर्जितः ।
सुवासिनीब्राह्मणान् भोजयेत् प्रीतमानसः ॥

635

Sl. No : 15912 **स्वर्णगौरीव्रतोद्यापनम्** Ms No : C 214/2

Beginning :

ईश्वर उवाच—

आसीत्तत्र महादिव्यो हिमवान्नग उत्तमः ।
नानाभूमिसमाकीर्णो ननाद्रुमसमाकुलः ॥
नानापक्षिसमायुक्तो नानामृगविचित्रितः ।
यत्र देवाः सगन्धर्वाः सिद्धचारणगुह्यकाः ॥

\+ \+ \+ \+ \+

अथ हरितालकोद्यापनम् ॥

उद्यापनविधिं ब्रूहि तृतीयायाः सुरेश्वर ।
भक्तितः श्रोतुमिच्छामि व्रतसम्पूर्तिहेतवे ॥

End :

एवं या कुरुते नारी व्रतराजं सुमध्यमे ।
सौभाग्यमखिलं तस्याः सप्तजन्म न संशयः ॥

Colophon :

इति हरितालुकव्रतोद्यापनं सम्पूर्णम् ॥

636

Sl. No : 15913 **स्वर्णगौरीव्रतोद्यापनम्** Ms. No C 3032/17

Beginning ;

हरितालुकव्रतोद्यापनम् —

पार्वत्युवाच —

उद्यापनविधिं ब्रूहि तृतीयायाः सुरेश्वर ।
भक्तितः श्रोतुमिच्छामि व्रतसम्पूर्णहेतवे ॥

महादेव उवाच —

उद्यापनविधिं वक्ष्ये व्रतराजस्य शोभने ।
यस्यानुष्ठानमात्रेण सम्पूर्णं हि व्रतं भवेत् ॥

End :

स्वगृह्योक्तविधानेन कृत्वाऽग्निस्थापनं ततः ।
प्रारभेच्च ततो होमं नवग्रहपुरस्सरम् ॥
तिलांश्च यवसंमिश्रान् आज्येन च परिप्लुतान् ।
जुहुयाद्रुद्रमन्त्रेण गौरीमं × × + ॥

Colophon :

— — —

637

Sl. No : 15915 इष्टसिद्धिव्रतकथा Ms: No C 5337/1

Beginning :

हरिहरेश्वरव्रतारम्भः ।
शिवधर्मोक्तस्कान्दविष्णुधर्मोत्तरोदितम् ।
सर्वेष्टदं हरिहरव्रतमेतदुदीर्यते ॥
आगमार्थन्तु इति घण्टानादं कृत्वा । एवंगुणविशेषणविशिष्टायां शुभतिथौ .... श्री हरिहरेश्वरव्रतं करिष्ये ।

End :

स विनिर्धूतकलुषः श्रेयः प्राप्नोति शाश्वतम् ॥
इत्युक्त्वा सकलान् सूतो मुनीन्द्रान् समतोषयत् ॥

Colophon :

इति श्री स्कान्दपुराणे शिवधर्मोत्तरे विष्णुधर्मोत्तरे प्रोक्त श्री हरिहरेश्वर व्रतकथा सम्पूर्णा ॥

638

Sl. No : 15916 उपाङ्गललिताव्रतकथा Ms. No : C. 3568/1

Beginning :

आगमार्थन्तु देवानां गमनार्थन्तु रक्षसाम् ।
कुर्याद्घण्टारवं तत्र देवताह्वानलाञ्छनम् ॥

देशकालौ सङ्कीर्त्य, एवंगुणेत्यादि अस्यां शुभतिथौ + × + श्रीहिम केदारेश्वरपूजां समानतन्त्रन्यायेन करिष्ये।

End :

मिमाय अश्वारोहणम्। महते देवाय गजारोहणम्। सर्वेश्वराय सर्वोपचारपूजाः समर्पयामि। यस्य स्मृत्येत्यादिना पूजासमर्पणम्।

Colophon

इति श्री हिमकेदारेश्वरव्रतकल्पोक्तपूजाविधानं समाप्तम् ॥

639

Sl. No : 15917 होलिकाव्रतम् Ms. No : P. 10322/1

Beginning :

फाल्गुनशुद्धपौर्णम्यां होलिकाकथाप्रारम्भः। युधिष्ठिर उवाच—

किमर्थं फाल्गुणे मासि पौर्णम्यां च जनार्दन।
उत्सवो जायते लोके ग्रामे ग्रामे पुरे पुरे।
किमर्थं शिशवस्तस्य गृहे ग्राहेति वा दिनः॥

End :

अथ होलिकादहन मन्त्रः।

गते तुषारसमये वसन्तस्य समागमे।
होलिके दीपयिष्यामि सर्वकाम्यार्थसिद्धये॥

Colophon :

इति कृष्णाचार्यस्मृत्युक्तो होलिकाविधिः समाप्तः॥

व्रतकथा

640

Sl. No 15918 अंगुलीयकव्रतकथा Ms. No : P. 6496/54

Beginning :

मेषोच्चे च गते सूर्ये अंगुलीम्वर्णकारकम्।
सर्वसम्पत्करं सौख्यं सर्वाभीष्टफलप्रदम्॥

सूर्योपरागे संप्राप्ते प्रभासक्षेत्रमागताः ।
ऋषयोऽभ्यागतं सूतं पप्रच्छुर्बद्धपाणयः ॥

End

संशृण्वते यमित्रशांङ्गयसौख्यमार्गं
यज्ञानितांधनमसत्रजभानुरूपम् । (?)
तेषामभीष्टफलमाशु भवेदितीह
सन्देह एव न हि सूर्यवरप्रसादात् ॥

Colophon :

इति श्री ब्रह्मकैवर्तपुराणे मृकण्डुसात्त्वीयकीसंवादे अंगुलीयकव्रतकथा सम्पूर्णा ॥

641

Sl. No : 15919 अखण्डैकादशीव्रतकथा Ms. No : P. 8707/2

Beginning :

ब्रह्मोवाच—

एकादश्याश्च माहात्म्यं उत्पत्तिं च विधानकम् ।
सर्वं ब्रूहि मम स्वामिन् कृपया भूतभावन ॥

End :

स्वशक्त्या सर्वकर्तव्यं कुर्यादुद्यापनादिकम् ।
एतत्ते सर्वमाख्यातं अखण्डैकादशीव्रतम् ॥

Colophon :

इति श्री स्कन्दपुराणे मार्गशीर्षमाहात्म्ये अखण्डैकाशीव्रतं नाम एकादशोऽध्यायः ॥

642

Sl. No : 15920 अधिकमासव्रतकथा Ms. No : C. 3032/63

Beginning :

युधिष्ठिर उवाच—

अधिमासस्य महात्म्यं मार्कण्डेय मुनीश्वर ।
जपयज्ञादिकं पुण्यं ब्रूहि मे ऋषिसत्तम ॥
कर्तुस्तेषु कथं विप्र गङ्गास्नानं च दुर्लभम् ।
कथयस्व महाभाग कृपया द्विजपुङ्गव ॥

End :

स्थापयेदव्रणं कुम्भं पञ्चरत्नसमन्वितम् ।
तस्योपरि न्यसेत्पात्रं देवं तत्र प्रपूजयेत् ॥
आदौ स्वस्तिवाचनं कृत्वा पूजां समाचरेत् ।
अचार्यं वरयेद्धीमान् सर्वशास्त्र × × ॥

Colophon :

— — —

643

Sl. No : 15921 अनन्तदोरनष्टप्रायश्चित्तकथा Ms; No : P, 277/10

Beginning :

युधिष्ठिर उवाच—
अनन्तव्रतमाहात्म्यं सर्वदेवमयं शुभम् ।
दोररूपेण चानन्तो रक्षनां त्रिजगद्गुरुः ॥
प्रमादाद्यदि नष्टं च दोरकं × × × ।
तदा किं करणीयं स्याद्व्रतं त्रैलोक्यनायकम् ॥

End :

पूर्वोक्तेन विधानेन पूर्ववद्व्रतमाचरेत् ।
ब्राह्मणान् भोजयेत्पश्चात् यथा शक्त्या च दक्षिणाम् ॥
प्रायश्चित्तमिदं कृत्वा व्रतं सफलमश्नुते ।
प्रायश्चित्तं न कुरुते महान् दोषः प्रजायते ॥

Colophon :

इति श्री भविष्योत्तरपुराणे नष्टदोरप्रायश्चित्तं समाप्तम् ॥

644

Sl. No : 15922 अनन्तचतुर्दशीव्रतकथा Ms No. P. 2370/9

Beginning :

सूत उवाच—
अरण्ये वर्तमानास्ते पाण्डवा दुःखकर्शिताः ।
कृष्णं दृष्ट्वा महात्मानं प्रणिपत्येदमब्रुवन् ॥

युधिष्ठिर उवाच —

अहं दुःखाभिसन्तप्तः भ्रातृभिः परिवारितः ।

End :

एते चान्ये च बहवः राज्यं कृत्वा दिवं गताः ।
एतत्ते कथितं पार्थ व्रतनामुत्तमं व्रतम ॥
एतत् शृण्वन्ति सततं वाच्यमानं नरोत्तमाः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे श्रीमदनन्तव्रतकथा सम्पूर्णा ॥

645

Sl. No : 15923 अनन्तचतुर्दशीव्रतकथा Ms No : P. 4218/8

Beginning :

पुरा तु जाह्नवीतीरे धर्मो धर्मपरायणः ।
जरासन्धवधार्थाय राजसूयमुपाक्रमत् । (?)
कृष्णेन सह धर्मोऽसौ भीमार्जुनसमन्वितः ।

End :

एतत्ते कथितं पार्थ व्रतानामुत्तमं व्रतम् ।
तत् श्रुत्वा सर्वपापेभ्यः मुच्यते नात्र संशयः ॥
ये शृण्वन्तीदमाख्यानं सर्वपापहरं नृप ।
सर्वपापविनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे श्रीमदनन्तपद्मनाभव्रतकथा सम्पूर्णा ॥

646

Sl. No : 15924 अनन्तचतुर्दशीव्रतकथा Ms No : P. 5293/29

Beginning :

अरण्ये दूयमानास्ते पाण्डवाः दुःखकर्शिताः ।
कृष्णं दृष्ट्वा महात्मानं प्रणिपत्येदमब्रवन् ॥

श्री युधिष्ठिर उवाच —

अहं दुःखाभिसन्तप्तः भ्रातृभिः परिवारितः ।
कथं मुक्तिर्भवेदास्माकं अनन्तादूदुःखसागरात् ॥

End :

एतत्ते कथितं पार्थ व्रतनामुत्तममं व्रतम् ।
तत् श्रुत्वा सर्वपापेभ्यः मुच्यते नात्र संशयः ॥
ये तु शृण्वन्ति सततं वाच्यमानं पठन्ति ये ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon:

इति श्री ब्रह्माण्डपुराणे अनन्तव्रतकल्पं समाप्तम् ॥

647

Sl. No : 15935 अनन्तचतुर्दशीव्रतकथा Ms. No : P. 7515/10

Beginning :

सूत उवाच —

अरण्ये वर्तमानास्ते पाण्डवाः दुःखकर्शिताः ।
कृष्णं दृष्ट्वा महात्मानं प्रणिपत्य यथाक्रमम् ॥

युधिष्ठिर उवाच —

अहं दुःखी च सञ्जातः भ्रातृभिः परिवारितः ।
कथं मुक्तिर्भवेदास्माकं अनन्तादूदुःखसागरात् ॥

End ;

न्यूनातिरिक्तानि परिस्फुटानि
यानीह कर्माणि मया कृतानि ।
क्षम्यानि चैतानि मम क्षमस्व
प्रयाहि तुष्टः पुनरागमाय ॥

Colophon :

इति भविष्योत्तरपुराणे श्रीमदनन्तव्रतमाहात्म्यश्रवणं सम्पूर्णम् ॥

648

Sl. No. 15939 अनन्तचतुर्दशीव्रतकथा Ms. No. P. 8165/11

Beginning :

अनन्तव्रतमाहात्म्यं सर्वकामफलप्रदम् ।
सर्वपापहरं सूत तद्वक्तुमर्हस्यशेषत: ॥

सूत उवाच —
अरण्ये वर्तमानास्ते पाण्डवा: दु:खकर्शिता: ।
कृष्णं दृष्ट्वा महात्मानं प्रणिपत्य यथाक्रमम् ॥

End :

राज्यं स्वकं पुन: प्राप्य भुक्त्वा भोगान् यथेप्सितान् ।
अन्ते जगाम च स्वर्गं तस्मात् कुरुत भो द्विजा: ॥
इति सूतवच: श्रुत्वा शौनकाद्या महर्षय: ।
कृत्वा व्रतमनन्तस्य परं मोक्षमवाप्नुयु: ॥

Colophon :

इति श्री भविष्योत्तरपुराणे श्रीमदनन्तव्रतमाहात्म्यं समाप्तम् ॥

649

Sl. No 15946 अनन्तचतुर्दशीव्रतकथा Ms. No. P. 9359/2

Beginning :

युधिष्ठिर:—
कृतो × × त्वया ख्यात: कोऽनन्त इति विश्रुत: ।
किं शेषनाग आहोस्विदनन्तस्तक्षक: स्मृत: ॥
अनन्तव्रतमाहात्म्यं विधिं विधिमतां वर ।
एतत्समस्तं विस्तरात् ब्रूहि मे कृपया हरे ॥

End :

ये च शृण्वन्ति सततं वाच्यमानं नरोत्तमै: ।
ते सर्वे पापनिर्मुक्ता: यास्यन्ति परमां गतिम् ॥

Colophon

इति पद्मपुराणे श्रीमदनन्तपद्मनाभव्रतकथाकल्प: सम्पूर्ण: ॥

650

S No : 15947 **अनन्तचतुर्दशीव्रतकथा** Ms. No : P 9633/4

Beginning :

कूष्माण्डकुंकुमभासुरां कूलंकुशज्ञानमयं × मूर्तिम् ।
विद्यानिधिं मण्डलमङ्गं श्रीशङ्कराचार्यमहं नमामि ।। (?)

सूत उवाच —

पुरा तु जाह्नवीतीरे धर्मो धर्मपराक्रमः ।
जरासन्धवधार्थाय राजसूयमुपाक्रमत् ।।

End :

तत् श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ।
× लोकानखिलान् प्राप्य मम लोकं गमिष्यति ।।
एतत् शृण्वन्ति सततं ये पठन्ति द्विजोत्तमाः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ।।

Colophon :

इति श्री ब्रह्माण्डपुराणे कृष्णयुधिष्ठिरसंवादे × × ।।

651

Sl No : 15959 **अनन्तचतुर्दशीव्रतकथा** Ms. No. C. 2525/31b

Beginning :

सूत उवाच —

पुरा तु जाह्नवीतीरे धर्मो धर्मपराक्रमः ।
जरासन्धवधार्थाय राजसूयमुपाक्रमत् ।।
कृष्णेन सह धर्मोऽसौ भीमार्जुनसमन्वितः ।
यन्त्रशालां समकरोन्नानारत्नोपशोभिताम् ।।

End :

ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ।
ये कुर्वन्ति व्रतमिदं कारयंति च ये मुदा ।।
ते सर्वे पापनिर्मुक्ताः यास्यंति परमां गतिम् ।।

Colophon :

इति श्री भविष्योत्तरपुराणे श्रीकृष्णयुधिष्ठिरसंवादे अनन्तव्रतकथा समाप्ता ॥

652

Sl. No : 15966 अनन्तचतुर्दशीव्रतकथा Ms. No : C. 3032/31

Beginning :

श्री कौण्डिन्यः —

उद्यापनविधिं ब्रूहि तत्रानन्तविधायकम् ।
तदहं श्रोतुमिच्छामि व्रतसम्पूर्णहेतवे ॥
न्यूने वाऽप्यधिके वाऽपि कुर्यादुद्यापनं व्रतम् ।
त्रयोदश्यामुपोष्या च चतुर्दश्यां तु पारणम् ॥

End :

सभ्यो ब्राह्मणेभ्यश्च दद्याद्वै दक्षिणां ततः ।
ब्राह्मणान् भोजयेत्पश्चात् ताम्बूलं स दक्षिणम् ॥
दत्त्व तेभ्यो नमस्कृत्य हरेः प्रीतिं तथ वदेत् ।
न्यूनंसंपूर्णतां यातु इत्येतत् प्रार्थयेद्धरिम् ।

Colophon :

इत्यनन्तव्रतोद्यापनं संपूर्णम् ॥

653

Sl No : 15967 अनन्तचतुर्दशीव्रतकथा Ms : No. C. 3032/32

Beginning :

युधिष्टिर उवाच--

अनन्तस्य व्रतं कृष्ण कथितं वै पुरा त्वया ।
उद्यापनव्रतं ब्रूहि व्रतमहस्य च ।
तदहं श्रोतुमिच्चमि व्रतं संपूर्णहेतवे ।
श्रीकृष्णः— आदौ मध्ये तथा चान्ते व्रतस्योद्यापनं नृपः ॥

End :

एवमुद्यापनं कार्यं व्रतसंपूर्णहेतवे ।
ब्राह्मणान् भोजयेत् पश्चात् ताम्बूलं च सदक्षिणम् ॥

य इदं पुण्यमाख्यानं शृणोति श्रावयन्ति ये ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon:

इति श्री अनन्तव्रतोद्यापनं सम्पूर्णम् ॥

654

Sl. No : 15968 अनन्तचतुर्दशीव्रतोद्यापनकथा Ms. No : C. 3302/34

Beginning :

युधिष्ठिर उवाच--

त्वत्प्रसादात् हृषीकेश श्रुतमेतद्व्रतोत्तमम् ।
कालुष्यञ्च गतं सर्वं नैर्मल्यं समुपस्थितम् ॥
इदानीं कृपया ब्रूहि व्रतोद्यापनमुत्तमम् ।
उद्यापनं विना नैव व्रतस्य फलमश्नुते ॥

End :

कथामिमां नरः श्रुत्वा पुत्रपौत्रसमन्वितः ।
इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ।
अतः सम्पूर्णतां यातु त्वत्प्रसादाज्जनार्दन ॥

Colophon :

इति श्री भविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे श्रीमदनन्तव्रतोद्यापनविधिः समाप्तः ॥

655

Sl. No : 15975 अमासोमवारव्रतकथा Ms. No : P.8410/47

Beginnin :

श्री वैशम्पायनः —

शरतल्पगतं भीष्ममुपागम्य युधिष्ठिरः ।
कृतप्रणामो धर्मात्मा इदं वचनमब्रवीत् ॥

युधिष्ठिरः —

हतेषु कुरुसैन्येषु भीमसेनेन कोपिना ।
तथाऽपरेषु भूतेषु हतेषु युधि जिष्णुना ॥

End :

गां दद्याद्व्रतपुष्ट्यर्थं प्रतिमादानमाचरेत् ।
अलङ्कारसमायुक्तां सवत्सां गां पयस्विनीम् ॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
इह भुक्त्वाऽखिलान्भोगान् अन्ते विष्णुपदं व्रजेत् ॥

Colophon :

इति ब्रह्माण्डपुराणे अमासोमव्रतमाहात्म्यं समाप्तम् ॥

656

Sl. No : 15979 — अमासोमवारव्रतकथा — Ms. No. P. 9667/15

Beginning :

श्री वैशम्पायनः ।
शरतल्पगतं भीष्ममुपागम्य युधिष्ठिरः ।
कृतप्रणामो धर्मात्मा इदं वचनमब्रवीत् ॥
श्री युधिष्ठिर उवाच —
हतेषु कुरुसैन्येषु + + + + ।
+ + + + मतेषु युधि विष्णुना ॥

End :

व्रतमिदमादरं नरेन्द्र विष्णोः
श्रुतमनवजपमक्रमकमापि याति ।
पतिसुतसहितः पुरन्ध्रीभिः
स यदि तु पार्थ किमत्र चित्रम् ॥ (?)

Colophon :

इति श्री ब्राह्मोत्तरपुराणे ब्रह्मकैवर्ते भीष्मयुधिष्ठिरसंवादे मृतसञ्जीविनी नाम सोमवार अमावास्याव्रतं समाप्तम् ॥

657

Sl. No. 15985 **अमासोमवारव्रतकथा** Ms. No : P, 10366/6

Beginning :

श्रीवैशम्पायन उवाच—

शरतल्पगतं भीष्ममुपगम्य युधिष्ठिरः ।

कृतप्रणामो धर्मात्मा प्राञ्जलिर्वाक्यमब्रवीत् ॥

युधिष्ठिर उवाच— + + +

अश्वत्थामास्त्रदग्धोऽसौ उत्तरागर्भसम्भवः ।

अतो मे द्विगुणं दुःखं पिण्डविच्छेददर्शनात् ॥

किं करोमि क्व गच्छामि पिण्डविच्छेददर्शनात् ॥

भीष्म उवाच—

शृणु राजन् प्रवक्ष्यमि व्रतानामुत्तमं व्रतम् ।

अमावास्या यदा पार्थ सोमवारेण संयुता ॥

तस्यामश्वत्थमूले तु पूजयित्वा जनार्दनम् ।

आदौ मध्ये तथा चान्ते कुर्यादुद्यापनक्रियाः ॥

प्रत्युवाच युधिष्ठिरः— × × × ॥

तद्व्रतस्य च महात्म्यं विस्तरेण वदस्व मे ।

भीष्म उवाच —

अस्ति सर्वत्र विख्याता काञ्ची नाम महापुरी ।

तत्र राजा महासिंह्मो बभूवामितविक्रमः ॥

End :

इदं च शृणुयान्नित्यं श्रावयेद्वा समाहितः ।

तेषां पुत्राश्च पौत्राश्च वर्धन्ते नात्र संशयः ॥

Colophon :

इति श्रीकौशिकपुराणे अमावास्यासोमवारव्रतकथाकल्पस्सम्पूर्णः ॥

658

Sl. No: 15988 **अश्वत्थनारायणव्रतम्** **Ms. No: P. 7975/3**

Beginning:

युधिष्ठिर उवाच—

ऋषयो देवता: सर्वे नैमिशारण्यवारिनः ।

प्रप्रच्छुः × × पुराणेषु सर्वधर्मविदुत्तमम् ।।

तस्यानुष्ठानमात्रेण सर्वे धर्माः कृताः खलु ।

End:

सूत उवाच —

एवं श्रुत्वा धर्मराजः कृतवान् नैमिषे वने ।

विवाह × नैधातिशाश्वतः ।

× × वेदे सर्वपापप्रणाशनम् ।

करिष्यामो वयं चैवमित्युक्त्वा त्रिदिवं ययुः ।।

Colophon:

इति श्रीभविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे अश्वत्थकथाध्यायः ।।

659

Sl. No 15989 **अश्वत्थनारायणव्रतम्** **Ms No: P. 8165/27**

Beginning:

वैशम्पायन उवाच—

शरतल्पगतं भीष्मं उपगम्य युधिष्ठिरः ।

कृतप्रणामो धर्मात्मा इदं वचनमब्रवीत् ।।

युधिष्ठिरः—

हतेषु कुरुसैन्येषु भीमसेनेन कोपिना ।

तथा परेषु भूतेषु हतेषु युधि जिष्णुना ।

दुर्योधनकुमन्त्रेण जातोऽस्माकं कुलक्षयः ।

End

फलपुष्पैस्तथा धूपैः वस्त्राद्यैरपि पाण्डव ।

कुर्यात्प्रदक्षिणावर्तं [illegible] पूर्णफलं लभेत् ।।

व्रतमिदमादरान्नरेन्द्रविष्णो:
शुभमनघं जप × राक्रमापि याति।
पतिसुतसहिता पुरंध्रिका सा
यदि × × पार्थ किमत्र चित्रम् ॥

Colophon :

इति भविष्योत्तरपुराणे अमृतसञ्जीविनी नाम सोमवारामावास्याव्रतकल्पः (अश्वत्थपूजामाहात्म्यं(?)) संपूर्णः ॥

660

Sl. No : 15994 अश्वत्थप्रदक्षिणव्रतकथा Ms No : P,2268/24

Beginning :

सूतः —
शरतल्पगतं भीष्मं उपगम्य युधिष्ठिरः।
कृतप्रणामो धर्मात्मा इदं वचनमब्रवीत्।
युधिष्ठिरः —
पितामह महाभाग अश्वत्थोद्यापनव्रतम्।
श्रोतुमिच्छामि सर्वज्ञ . . . . ॥

End :

संपूज्य सोमां विविधैः भूषणैरुपचारकैः।
+ + + + +
चचार हर्षसंयुक्ता सा सोमा निजमन्दिरम्।
उक्त्वा सूत ऋषींश्चैव यथावत्पूर्ववत् स्थितः॥

Colophon :

इति श्री भविष्योत्तरपुराणे भीष्मयुधिष्ठिरसंवादे अमासोमवाराश्वत्थप्रदक्षिणव्रतोद्यापनं नाम पञ्चशोऽध्यायः ॥

661

Sl. No : 15995 अश्वत्थप्रदक्षिणव्रतकथा Ms. No P 4218 60

Beginning :

शौनकोऽहं प्रवक्ष्यामि अश्वत्थस्योपनायनम्।
स्थापनादष्टमे वर्षे द्वादशेकादशेऽथवा ॥

उक्ताः कालास्त्रयः शस्ताः कुर्यात्तत्रोपनायनम् ।
तत्रोत्तरायणं श्रेष्ठं गुरुशुक्रप्रकाशने ॥

End :

ब्राह्मणे (?) दक्षिणां दद्यात् यथावित्तानुसारतः ।
ब्राह्मणान् भोजयेत्पश्चात् भुञ्जीयाद्बन्धुभिः सह ॥
एवं यः भक्त्या तमते (?) कमला कुले ।
कुलकोटिं समुद्धृत्य विष्णुसायुज्यमाप्नुयात् ॥

Colophon:

इति अश्वत्थोपनयनं सम्पूर्णम् ॥

662

Sl. No: 15996 इष्टसिद्धिव्रतकथा Ms: No. P .9939/7

Beginning:

शृणु पूर्वं महादेवि व्रतानामुत्तमं व्रतम् ।
कथयिष्यामि यद्बाल्ये त्वया चीर्णं हिमालये ॥
पार्वत्युवाच --
आस्ते चाद्रिर्महान् दिव्यो हिमवांस्तु नगेश्वरः ।

End :

सङ्कल्पिता मया पूर्वं दास्यामि चक्रपाणये ॥
एवं चिन्तापरो भूत्वा मूर्छितो पतितो भुवि ।
हाहाकृत्वा ततो लोकाः प्रसुप्ते च + रिं प्रति ॥

663

Sl. No: 15997 उपाङ्गललिताव्रतकथा Ms. No: P. 9760/3

Beginning :

सूत उवाच --
पुरा कैलासशिखरे सुखासीनं षडाननम् ।
+ + + + इदमूचुर्महर्षयः ॥

महासेन महादेव × × × × ।
शुश्रूषवो वयं देव्याः व्रतं तत्कथयस्व न ।

स्कन्द उवाच—

साधु पृष्टं महादेव्या माहात्म्यं मुनिपुङ्गवाः ।
वच्मि सर्वं विधानेन तत् शृणुध्वं जगद्धितम् ॥
भृगुक्षेत्रे किल पुरा विप्रोऽभूद्गौतमाभिधः ।
श्रुतिस्मृतिपुराणज्ञो धनी च बहुबान्धवः ॥

End :

एतच्छृण्वन्ति कथितं पठ्यमानं नरोच्चैः ।
सर्वपापविनिर्मुक्ता यास्यन्ति परमां गतिम् ॥
यत् श्रुत्वा पापनिर्मुक्तो मुच्यते नात्र संशयः ॥

Colophon :

इति श्रीस्कन्दपुराणे उपाङ्गललिताव्रतकथाकल्पस्सम्पूर्णः ॥

664

Sl. No 15997 उपाङ्गललितागौरीव्रतकथा Ms. No : P 9760/3

Beginning :

उपाङ्गललितागौरीव्रतं वक्ष्यामि मङ्गलम् ॥
प्रणम्य वदतां चैव सर्वपापप्रणाशनम् ॥
पुराकृतयुगे विप्र मिथिलानामपट्टणे ।
तत्राभूद्ब्राह्मणः कश्चित् तत्पत्नी पद्मलोचना ॥

End :

ये पठन्तीदमाख्यानं शृण्वन्ति क × या सकृत् ॥
ते सर्वे पापनिर्मुक्ताः उपाङ्गा लोकमाप्नुयात् ॥

Colophon

इति श्री पद्मपुराणे उपाङ्गललितागौरीव्रतकल्पः ॥
उपाङ्गललितागौरीव्रतकथा समाप्ता ॥

—श्रीः—

665

Sl. No. 15999 उपाङ्गललितागौरीव्रतकथा Ms. No : C. 3424/27

Beginning :

ಸೂತನು ಹೇಳುವನು— ಓರಿಯುರಾದ ವೇದವ್ಯಾಸ ಮೊದಲಾದ ಋಷಿಗಳಿಗೆ ನಮಸ್ಕಾರಮಾಡಿ, ಸಕಲಪಾಪಗಳನ್ನು ಪರಿಹರಿಸುವ ಶುಭಪ್ರದವಾದ ಉಪಾಂಗ ಲಲಿತಾಗೌರೀವ್ರತವನ್ನು ಹೇಳುವೆನು.

End :

ಇತಿಹಾಸವನ್ನು ನಿತ್ಯವೂ ಕೇಳುವರೋ ಹೇಳುವರೋ ಅವರೆಲ್ಲರೂ ಪಾಪ ದಿಂದ ಮುಕ್ತರಾಗಿ ಉಪಾಂಗಲಲಿತಾದೇವಿಯ ಲೋಕವನ್ನು ಹೊಂದುವರೆಂದು ಅಧ್ಯಾಯಾರ್ಥ .

Colophon :

— — —

666

Sl. No : 16000 उमामहेश्वरव्रतकथा Ms . No : P. 2370/37

Beginning :

ऋषय:—

पुण्ये च नैमिशारण्ये मनो × × रणे ।
नानापुष्पसमाकीर्णे नानावृक्षविराजिते ।
तत्र स्थिता महात्मानः पुण्या ब्रह्मर्षयस्तथा ॥

End :

आयुरारोग्यमैश्वर्यं धनं पुत्राननवाप्य च ।
इह भुक्त्वा तु विपुलान् सर्वान् भोगान्यथेप्सितम् ॥
अनुभूय च देहान्ते प्रयाति परमां गतिम् ॥

Colophon :

इति श्रीस्कान्दे महापुराणे ब्रह्ममार्कण्डेयसंवादे उमामहेश्वरव्रतं समाप्तम् ॥

667

Sl. No : 16002 उमामहेश्वरव्रतकथा Ms No. P 6000/55

Beginning :

ऋषय: उवाच—

सपु ग्रेन × × मनोह्लाद कारके ।
नानापुष्पसमाकीर्णे नानामृगनिषेविते ॥

तत्र स्थिता महात्मानो शान्ताश्च मुनिसत्तमाः ॥
सर्वे ते मुदयोपेताः शिवभक्तिपरायणाः ॥

End :

इह भुक्त्वा स विपुलान्भोगान सर्वान्यथे × तान् ।
अनुभूय च × × स्तं ते प्रयाति शिवमन्दिरम् ॥
तत्सूतवचनं श्रुत्वा नैमिषारण्यवासिनः ।
शिवलिङ्गार्चनरता व्रतमे × × × मुः ॥

Colophon :

इति श्री शिवधर्मोत्तरे उमामहेश्वरव्रतकथाश्रवणं समाप्तम् ॥

668

Sl. No : 16006 **उमामहेश्वरव्रतकथा** **Ms No. P. 8000/29a**

Beginning :

उमामहेश्वरज्येष्ठपुत्रं सिद्धिविनायकम् ।
वन्दे श्री गणराजाख्यं सर्वकार्यार्थसिद्धये ॥
सुपुण्ये नैमिषारण्ये मानसाह्लादकारके ।
तत्र स्थित्वा महात्मनः पुण्यब्रह्मर्षयस्तथा ॥

End :

तस्य तद्वचनं श्रुत्वा नैमिषारण्यवासिनः ।
शिवलिङ्गार्चनरताः व्रतमेतत्प्रचक्रमे ।
व्रतस्यास्य प्रभावेन प्राप्नुयुस्ते परमां गतिम् ॥

Colophon :

इति श्री ब्रह्मकैवल्यपुराणे उमामहेश्वरव्रतमाहात्म्यं समाप्तम् ॥

669

Sl No : 10007 **उमामहेश्वरव्रतकथा** **Ms. No. P. 8165/40**

Beginning :

सुपुण्ये नैमिशाराण्ये सर्वेषां च मनोरमे ।
तत्र स्थित्वा महात्मानः शौनकाद्या महर्षयः ॥

समागतं महात्मानं सूतपुत्रं दृढव्रतम् ।
पप्रच्छुर्मुनयः सर्वे पूजयित्वा यथाविधि ॥
सूतपुत्र महाभाग सर्वलोकोपकारक ।
व्रतं वदस्व देवर्षे सर्वाभीष्टप्रदायक ॥

End :

शिवलिङ्गार्चनरताः चक्रुः सर्वेमहाव्रतम् ।
व्रतस्यास्य प्रभावेन प्रापुस्ते परमां गतिम् ॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
व्रतस्यास्य फलं प्राप्य शिवलोकं स गच्छति ॥

Colophon

इति श्री ब्रह्मवैवर्तपुराणे उमामहेश्वरव्रतकथा सम्पूर्णा ॥

670

Sl. No : 16008 उमामहेश्वरव्रतकथा Ms. No : P. 8410/19

Beginning :

सुपुण्ये नैमिशारण्ये मानसाह्लादकारणे ।
तत्र स्थितामहात्मानः पुण्याराजर्षयस्तदा ॥
आगतं तु महात्मानं सूतं सर्वविदां वरम् ।
पप्रच्छुर्मुनयः सर्वे पूजयित्वा यथाविधि ॥

End :

श्वेतागस्त्यदधीच्याद्यैः सर्वैश्च मुनिपुङ्गवैः ।
भृङ्गिनारदयक्षैश्च सिद्धैश्च पुरुषादिभिः ॥
तस्माद्भवद्भिः कर्तव्यं अशेषैः मुक्तिकांक्षिभिः ॥
इह भुक्त्वा स्थिरान् भोगान् अन्ते शिवपदं व्रजेत् ॥

Colophon :

इति श्रीमार्कण्डेयपुराणे उमामहेश्वरव्रतकल्पं नाम पञ्चाशः सर्गः ॥

671

Sl. No. 16018 ऋषिपञ्चमीव्रतकथा Ms. No : P. 2268/19

Beginning :

सूत उवाच—

श्रुतानि देवदेवेश व्रतानि सुबहूनि च ।
सांप्रतं मे समाचक्ष्व व्रतं पापप्रणाशनम् ॥

ब्रह्मोवाच—

शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
ऋषिपञ्चमिविख्यातं सर्वपापप्रणाशनम् ॥

End :

व्रतस्यास्य प्रभावेन ज्ञानं जन्मान्तरे भवेत् ।
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ॥
सर्वपापविनिर्मुक्तः स्वर्गमाप्नोत्यसंशयम् ॥

Colophon :

इति स्कन्दपुराणे ऋषिपञ्चमीव्रतकथनं नाम पञ्चपञ्चाशः अध्यायः ॥

672

Sl. No : 16020 ऋषिपञ्चमीव्रतकथा Ms. No : P. 4218/46

Beginning :

श्रीकृष्ण उवाच—

अथान्यदपि राजेन्द्र पञ्चमी ऋषिसंज्ञिता ।
कथयिष्यामि मां (?) कृत्वा नारी पापात्प्रमुच्यते ॥

युधिष्ठिर उवाच—

कीदृशी पञ्चमी × कथं वै ऋषिसंज्ञिता ।
पातकान्मुच्यते कस्मान्नारी यदुकुलोद्भव ॥

End :

जगाम ब्रह्मभुवनं विमानेनार्कवर्चसा ।
स्तूयमानः सुरगणैः व्रतस्यास्य प्रभावतः ॥

एतच्छृण्वन्ति सततं ये पठन्ति द्विजोत्तमाः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ।।

Colophon

इति श्री ब्रह्माण्डपुराणे ऋषिपञ्चमीव्रतकथा संपूर्णा ।।

673

Sl. No : 16022 ऋषिपञ्चमीव्रतकथा Ms No . 5293/76

Beginning :

शौनकाद्या महात्मानः नैमिषारण्यवासिनः ।
दृष्ट्वा सूतं महाप्राज्ञं पप्रच्छुर्व्रतमुत्तमम् ।।
प्रसीद भगवन् सूत प्रसन्नाम्बुजलोचन ।
नारायणपदाम्भोजमकरन्दमधुव्रत ।।

End :

किमत्र व्रतचर्णेन जन्मान्तरसहस्रके ।
महापापं चोपपापं विगतं भवति ध्रुवम् ।।
येषां ऋषीणां च तपोधनानां
व्रतेन सम्यक्तेन मनुष्यलोके ।
अवाप्य कामानखिलांश्च तत्र
लोके परे-सिन्नुपयान्ति सौख्यम् ।।

Colophon :

इति श्री ब्रह्माण्डपुराणे ऋषिपञ्चमीव्रतकल्पः सम्पूर्णः ।।

674

Sl. No : 16031 ऋषिपञ्चमीव्रतकथा Ms, No : P. 8165/5

Beginning :

ऋषयः —

वद सूत महाभाग व्रतं पापप्रणाशनम् ।
रजःसम्पर्कदोषघ्नं स्त्रीपुंसामखिलेष्टदम् ।।
इति पृष्टः स मुनिभिः सूतपौराणिकोत्तमः ।

सूत उवाच —

यथाश्रुतं प्राग्व्यासेन गुरुणा च तपस्विना ।।

End :

येषां ऋषीणां च तपोधनानां
व्रतेन सांगेन मनुष्यलोके।
निस्तीर्य नार्यो निखिलं च पापं
लोकं हरेरप्युपयान्ति निर्मलाः ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे ऋषिपञ्चमीव्रतमाहात्म्यं संपूर्णम् ॥

675

Sl. No : 16040 ऋषिपञ्चमीव्रतकथा Ms No : P.9760/9

Beginnin :

देवदेवारविन्दाक्ष भक्तानामभयप्रद ।
श्रीकृष्ण कमलाकान्त पाह्यस्मान् त्वत्परायणान् ।
अन्यद्व्रतं समाचक्ष्व श्रोतृणामघनाशकृत् ॥
श्रीकृष्ण उवाच —
राजेन्द्र ऋषिपञ्चम्या गाथां वक्ष्यामि ते शृणु।
श्रुत्वा योषित्पुमान् वाऽपि तस्मात् पापात्प्रमुच्यते ॥

End :

व्रतेन साङ्गेन मनुष्यलोके
सम्यगृषीणां च तपोधनानाम् ।
निस्तीर्य नार्यो निखिलञ्च पापं
लोकेऽत्र नूनं त्रिदिवं प्रयान्ति ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे ऋषिपञ्चमीव्रतकल्पः समाप्तः ॥

676

Sl. No : 16042 ऋषिपञ्चमीव्रतकथा Ms: P.No. 9945/19

Beginning :

शतानीक उवाच —
श्रुतानि देवदेवेश व्रतानि विविधानि च ।
साम्प्रतं मे समाचक्ष्व व्रतं पापप्रणाशनम् ॥

ब्रह्मोवाच —

शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।

ऋषिपञ्चमीति विख्यातं सर्वदोषनिवारणम् ॥

End :

अस्माकं सततं सन्तु समाहितफलप्रदाः ।

वाचिकं मानसं पापं कायिकं यच्च दुष्कृतम् ॥

तत्सर्वं विलयं यातु व्रतस्यास्य प्रभावतः ।

ये करिष्यन्ति मनुजा यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे ऋषिपञ्चमीव्रतकथाश्रवणं सम्पूर्णम् ॥

677

Sl: No : 16053 एकादशीव्रतकथा **Ms. No : C, 2650**

Beginning :

सूत उवाच —

इदमन्यत्प्रवक्ष्यामि व्रतं त्रैलोक्यविश्रुतम् ।

सर्वपापप्रशमनं सर्वपुण्यफलप्रदम् ॥

\+ \+ \+ \+ \+ \+

एकादशीव्रतं नाम सर्वकामफलप्रदम् ।

End :

इति सन्तुष्टचेतास्तु तस्य पुत्रस्य धीमतः ॥

हरिपूजाविधानं च यथावत् समबोधयत् ।

इत्येतद्वो मुनिशना (?) यथावत्कथितं मया ॥

सङ्कोचविस्तराभ्यां च किमन्यत् कथयाम्यतः ॥

Colophon :

इति श्री बृहन्नारदीयपुराणे एकादशीव्रतकथा समाप्ता ॥

678

Sl. No. 16054 कारुपर्वव्रतकथा Ms. No : P; 2862/13

Beginning :

कारुपर्वं प्रवक्ष्यामि × द्वारार्चनमुत्तमम् ।
× × निर्मितं पूर्वं लोकोपद्रवित्रकारकम् ॥ (?)
अधिवासं च पूर्वेद्युः यथाविभवविस्तरम् ।
तं पत्न्या सह × × पूजयेदधिदैवतम् ॥
कृसरं पायसं चैव शर्करं सघृतं तथा ।

End :

आर्द्रादिनप्रवर्षाणि नक्षत्राणि त्रयोदशी ।
येन निर्दिश्य विधिना बलिरद्दिसमाह्वयम् ॥
प्रति सन्त × रं कार्यं धनधान्यसमृद्धये ।
ततः सृष्टा हि वै देवाः प्रयच्छन्ति मनोरथम् ॥

Colophon:

इति श्री ब्रह्माण्डपुराणे कारुपर्वविधिः ॥

679

Sl. No ; 16055 कृत्तिदार्दीपव्रतकथा Ms No : P; 9643/52

Beginning :

कार्तिके मासि विप्रेन्द्र यत्त्वया कथितं पुरा ।
चतुर्दशी महापुण्या मम × × प्रभो ॥
अतिप्रकाशमायाति तस्मात्त्वं वक्तुमर्हसि ।

आङ्गीरसः —

यः कुर्यात् प्रयतो भूत्वा चतुर्दश्यां तु कार्तिके ।

End :

इति कल्पोक्तविधिना चतुर्दश्या हरार्चनम् ।
कार्तिक्यामाचरेत् सम्यक्सर्वकामार्थसिद्धये ॥
यः कुर्यात्कार्तिके मासि चतुर्दश्यां शिवार्चनम् ।
भुक्त्वेह सकलान् भोगान अन्ते शिवपदं लभेत् ॥

Colophon :

इति श्री स्कान्दपुराणे कार्तिकचतुर्दशीव्रतकथाश्रवणं समाप्तम् ॥

680

Sl. No : 19056 कृत्तिकादीपव्रतकथा **Ms. No : P. 2268/23**

Beginning

सत्यभामा —

भगवन् सर्वभूतेश सच्चिदानन्दविग्रह ।
दीपपूजाविधिं श्रोतुमिच्छामि कृपानिधे ॥ (?)
देशकालद्रव्यपात्रनियमानि मम प्रभो ॥

End :

जननमरणनाशं प्राप्य दुःखेन नाशं (?)
भवति विगतबन्धः भक्तियुक्तश्च विष्णौ ।
अगणितगुणबन्धः दीपदानप्रभावात्
अगणितगुणयुक्तं विष्णुलोकं प्रयाति ॥

Colophon :

इति नारदीये दीपव्रतमाहात्म्यं सम्पूर्णम् ॥

681

Sl. No : 160 57 कृत्तिकादीपव्रतकथा **Ms. No : C. 3032/64**

Beginning :

देवदेव महादेव भक्तानुग्रहकारक ।
प्रसन्नो यदि देवेश ममाभीष्टं वद प्रभो ॥

शिव उवाच —

याचस्व गिरिजे देवि वरं च मनसेप्सितम् ।
गोप्याद्गोप्यतरं किं वा नास्ति चाग्रे तव प्रिये ॥

End :

नित्यदीपं तु देवेशि घृतेनैव तु कारयेत् ।
घृतस्य नियमो नास्ति नित्यदीपे सुरार्चिते ॥

गव्यं वा माहिषं वाऽपि नित्यदीपे तु वै घृतम् ।
आज्यमानं पात्रमानं सुपु + + + + ॥

Colophon :

— — —

682

Sl. No. 16058 कूर्मजयन्तीव्रतकथा Ms. No : P. 7918/47

Beginning :

ब्रह्मणः सदने पूर्वं कथितं कीर्तिवर्धनम् ।
सर्वपापप्रशमनं + + + + ॥
ब्रह्माणं मुनिवृन्दैश्च सेव्यमानं सुरोत्तमैः ।
तं दृष्ट्वा नारदस्तुष्टो विधातारं विधेः सुतः ॥
+ + + +

End :

तस्मात्कूर्मजयन्त्याख्यं व्रतं सम्यक्समाचरेत् ।

श्रीनारदः --
कथं कार्यं व्रतमिदं सर्वप्राणि + + प्रदम् ।
ब्रह्मन् × लं पुण्यं तस्मान्मे × × ॥

Colophon :

— — —

683

Sl. No : 16059 कृष्णजयन्तीव्रतकथा Ms. No P 4218/16

Beginning ::

ईश्वर उवाच —
उवाच गिरिजानाथः पुरा कैलासभूधरे ।
सर्वलोकहितार्थाय पार्वतीप्राणनायकः ॥

देव्युवाच —
कदा नराणां विश्वात्मन् नित्यं दुष्कृतचेतसाम् ।
पुत्रदारगृहद्रव्यसंसक्तजडचेतसाम् ॥

End :

व्रतं कृत्वेदमाख्यानं श्रुत्वा साक्षतपाणिना ।
सर्वयज्ञफलं प्राप्य पश्चात्सर्वे (?) हरिं व्रजेत् ।
य इदं पुण्यमाख्यानं यः शृणोत्यघनाशनम् ।
तस्य पुत्राश्च पौत्राश्च वर्धन्ते (?) सुकृते शुभे ॥

Colophon :

इति श्री पद्मपुराणे उमामहेश्वरसंवादे कृष्णजयन्तीव्रतकथा संपूर्णा ॥

684

Sl. No : 16060 कृष्णजयन्तीव्रतकथा Ms. No : P. 6293/20

Beginning :

नारद उवाच—

जयन्त्याश्चैव माहात्म्यं कथयस्व पितामह ।
यत् श्रुत्वाऽहं गमिष्यामि विष्णोः परमं पदम् ॥

ब्रह्मोवाच—

शृणु वत्स प्रवक्ष्यामि प्रभावं चाष्टमीव्रतम् ।
जयं पुण्यस्य कुरुते क्षयं पापचयस्य च ॥

End :

तस्मान्मया द्विजश्रेष्ठ कथितां पक्षवर्धिनीम् ।
श्रोतव्यं व्रतमाहात्म्यं पुनरेव सुखावहम् ॥
यः शृणोति नरो भक्त्या कृष्णजन्माष्टमीव्रतम् ।
सर्वतीर्थफलावाप्तिः भवति तस्य देहिनः ॥

Colophon :

इति जयन्तीपूजाविधिः ॥

685

Sl. No 16065 कृष्णजयन्तीव्रतकथा Ms. No : P : 8758/7

Beginning :

ईश्वर उवाच—

उवाच गिरिजा देवं पुरा कैलासभूधरे ।
सर्वलोकहितार्थाय पार्वती प्राणनायकम् ॥

पार्वत्युवाच—

कथं शङ्कर विश्वात्मन् नित्यं दुष्कृतचेतसः ।
पुत्रदारगृहद्रव्यसंसक्ताश्च इमे जनाः ॥

\+ + + + +

End :

कपिलागोसहस्रं तु यो ददाति दिने दिने ।
तत्फलं समवाप्नोति जयन्त्याः समुपोषणात् ॥
व्रतं कृत्वेदमाख्यानं श्रुत्वा साक्षतपाणिना ।
सर्वतीर्थावगाहे च सर्वयज्ञायुतं फलम् ॥
यदिदं पुण्यमाख्यानं यः शृणोत्यघनाशनम् ।
तस्य पुत्राश्च पौत्राश्च वर्धन्ते सुकृते शुभे ॥

Colophon :

इति श्री पद्मपुराणे कृष्णजयन्तीव्रतं संपूर्णम् ॥

686

Sl. No : 1607। कृष्णजयन्तीव्रतकथा Ms No : P; 9945/27

Beginning :

सूतः—

शृणुध्वं ऋषयः सर्वे नैमिशारण्यवासिनः ।
श्रीकृष्णचरितं यच्च सर्वं वक्ष्यामि तत्वतः ॥
उदये चाष्टमी किंचिन्नवमी सकला यदि ।
भवेच्च बुधवारेण प्राजापत्यर्क्षसंयुता ।

End :

जयन्ती बहुलैः पक्षैः चाष्टमी रोहिणी युता ॥
इत्येता कथिता पुण्या जयन्ती पापनाशनी ।
जयन्त्याश्चैव माहात्म्यं यः पठेत् शृणुयादपि ।
सर्वपापविनिर्मुक्तो यान्ति विष्णोः परं पदम् ॥

Colophon :

इति श्री स्कन्दपुराणे जन्माष्टमीव्रतकथाश्रवणं संपूर्णम् ॥

687

Sl. No. 16074 कृष्णजयन्तीव्रतकथा Ms. No : C 158/3

Beginning :

अथ कृष्णादिमासेन कृष्णाष्टम्यां जन्माष्टमीव्रतम् । तच्चार्धरात्र
व्यापिन्यांकार्यं – रोहिणीसहिताकृष्णमासि भाद्रपदेऽष्टमे ।
अर्धरात्रे तु योगोऽयं तारापत्युदये तथा ।
नियतात्मा शुचिः सम्यक् प्रजां तत्र प्रवर्तयेत् ॥
इति विष्णुधर्मोत्तरे तस्य कालश्चोक्तः ।

End :

गीयते विधिवत् सम्यक् मुनिभिस्तत्त्वदर्शिभिः ।
सार्वकामकमेवैतत् कृत्वा कामानवाप्नुयात् ॥
एतत्ते सर्वमाख्यातं व्रतानामुत्तमं व्रतम् ॥
मम सान्निध्यकृत् राजन् किं भूयः श्रोतुमिच्छसि ॥

Colophon :

इति श्री भविष्योत्तरपुराणे जन्माष्टमीव्रतकथा समाप्ता ॥

688

Sl. No : 16076 कृष्णजयन्तीव्रतकथा Ms. No : P. 158/6

Beginning :

व्यासः —
निवृत्ते भारते युद्धे कृतशौचो युधिष्ठिरः ।
उवाच वाक्यं धर्मात्मा कृष्णं देवकिनन्दनम् ॥
युधिष्ठिरः—
त्वत्प्रसादाच्च गोविन्द निहताः शत्रवो रणे ।
कर्णश्च निहतः सैन्ये त्वत्प्रसादात् किरीटिना ॥
+ + + + + +
अधुना श्रोतुमिच्छामि कृष्जन्माष्टमीव्रतम् ।
जन्माष्टमीव्रतं ब्रूहि विस्तरेण ममाच्युत ॥

End :

सा × कामिकामेवैतत् कृत्वा कामानवाप्नुयात् ।
एतत्ते सर्वमाख्यातं व्रतानां उत्तमं व्रतम् ॥
मम सान्निध्यकृत् राजन् किं भूयः श्रोतुमिच्छसि ॥
भविष्योत्तरपुराणे जन्माष्टमीव्रतकथा समाप्ता ॥

अथाङ्गपूजा ॥ श्रीकृष्णाय नमः पादौ पूजयामि ॥ श्रीपतये नमः जानुनी पूजयामि ॥ .... वसुदेवपुत्राय नमः सर्वाङ्गं पूजयामि । केशवादिकृष्णान्त चतुर्विंशतिनामानि ॥

Colophon :

— — —

689

Sl No : 16076 कृष्णजयन्तीव्रतकथा Ms. No C 3032/14

Beginning :

अथ जन्माष्टमीकथा । अरुण उवाच—
यदनन्तफलं लोके परत्र च महाफलम् ॥
यत्कृत्वा न पुनर्भावी तन्मे कथय भास्कर ॥
भास्कर उवाच—
सार्वभौमः पुरा चासीत् हरिश्चन्द्रोमहीपतिः ।
तस्य तुष्टो ददौ ब्रह्मा विमानं कामगं शुभम् ॥

End :

ततस्तद्वचनादेव हरिश्चन्द्रो महीपतिः ।
व्रतं चकार यत्नेन वासुदेवपदं ययौ ॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सर्वपापैर्विनिर्मुक्तः याति विष्णोः परं पदम् ॥

Colophon :

इति स्कन्दपुराणे जन्माष्टमीकथा संपूर्णा ॥

690

Sl. No : 16077 कृष्णजयन्तीव्रतकथा **Ms. No. C. 3730/20**

Beginning :

नारद उवाच—

सुदुर्लभानां पापानां निष्कृतिं नरकापहम् ।

पितामह उवाच—

शृणु वत्स प्रवक्ष्यामि प्रभावं चाष्टमीव्रते ।

चयं पुण्यस्य कुरुते क्षयं पापस्य कर्मणः ॥

End :

अलक्ष्मीहरणं नित्यं सर्वमङ्गलदायकम् ।

क्षीरं मङ्गलमायुष्यं अतश्शान्तिं प्रयच्छ मे ॥

कृष्णमूर्तिदानम् ।

गोपालकृष्णप्रतिमां सर्वलक्षणसंयुताम् ।

तुभ्यं सम्प्रददे विप्र प्रीयतां गोपिकापतिः ॥

तदनन्तरं पुनः पूजां कुर्यात् ॥

Colophon :

इति स्कन्दपुराणे ब्रह्मनारदसंवादे कृष्णजयन्तीव्रतकथा संपूर्णा ॥

691

Sl. No : 16078 केदारव्रतकथा **Ms. No : P. 2370/75**

Beginning :

श्री सूत उवाच—

यस्य प्रसादाद्भुवनं ध्रियते सचराचरम् ।

तं प्रणम्य महादेवं भगवन्तमुमापतिम् ॥

केदारव्रतमाहात्म्यं सर्वकल्याणकारणम् ॥

End :

कथेयं कथिता वेदे नृणां कलिमलापहा ।

य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ॥

विमुक्तः सर्वपापेभ्यः रुद्रलोके महीयते ॥

Colophon :

इति श्रीस्कन्दपुराणे केदारखण्डे उमामहेश्वरसंवादे केदारकल्पमाहात्म्यं सम्पूर्णम् ॥

692

Sl. No : 16079 केदारव्रतकथा Ms. No : P ,4218/44

Beginning :

युधिष्ठिर उवाच—

धर्मा बहुविधा प्रोक्ताः त्वयाऽनेन फलान्विताः ।

इदानीं श्रोतुमिच्छामि व्रतं संपत्करं शृणु ॥

श्रीकृष्ण उवाच—

शृणु आर्य प्रवक्ष्यामि केदारव्रतमुत्तमम् ।

आधारं सर्वजन्तूनां सदा विजयकारणम् ॥

End :

य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।

स मुक्तः सर्वपापेभ्यो शिवलोके महीयते ॥

नमोऽस्तु सर्वजगतः परहितनिरता च भवन्ति ।

भवन्ति दीपगणप्रियशान्तिशान्ति सर्व × भवेत् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे केदारव्रतकथा संपूर्णा ॥

693

Sl. No : 16090 केदारव्रतकथा Ms. No : P ,8410/23a

Beginning :

युधिष्ठिरः—

केन व्रतेन मे देव सर्वसंपत्करं भवेत् ।

तद्व्रत ब्रूहि सर्वज्ञ यद्यस्ति करुणा मयि ॥

श्री कृष्णः—

केदारस्य व्रतं राजन् सर्वसौभाग्यदायकम् ।

भुक्तिमुक्तिप्रदं नृणां स्त्रीणां चैव विशेषतः ॥

End :

अश्वमेधसहस्राणां यत्फलं सूरिभिः श्रुतम् ।
तदनेन व्रतेनैव लभते नात्र संशयः ।।
येनेदं व्रतमाहात्म्यं कथितं विश्रुतं तथा ।
किंनु व्रते कृते पुंसां अलभ्यं भुवनत्रये ॥

Colophon :

इति श्री भविष्योत्तरपुराणे केदारव्रतमाहात्म्यं संपूर्णम् ॥

694

Sl· No 16092 केदारव्रतकथा Ms. No P; 9760/15

Beginning :

पुरा कैलासशिखरे मण्डपे रत्ननिर्मिते ।
विचित्ररत्नकलशैः हाराँरत्नैश्च भूषणैः ॥
प्रणम्य पार्वतीमूर्तिः भर्तारमिदमब्रवीत् ।
तव पारत्वमस्माकं अतः प्राप्तं जगत्प्रभो ।
तस्य व्रतस्य सिद्ध्यर्थं व्रतं सम्यगिदं प्रभो ॥

शङ्कर उवाच —

शृणु देवि प्रवक्ष्यामि केदारव्रतमुत्तमम् ।
धर्मार्थकाममोक्षाणां एतदेव प्रकल्पितम् ॥
मासि भाद्रपदे शुक्ले + + + +

End :

ततश्च त्रिषु लोकेषु दुर्लभं नास्ति किञ्चन ।
व्रतं चाकुर्वते पुंसः न लभ्यं भुवनत्रयम् ॥

Colophon :

इति श्री भविष्योत्तरपुराणे केदारव्रतकल्पः समाप्तः ॥

695

Sl. No : 16097 केदारव्रतकथा Ms. No C 2525/2b

Beginning :

श्रीमत्केदारदेवस्य व्रतं पापप्रणाशनम् ।
प्रवक्ष्ये परमो भक्त्या सर्वकाम्यार्थसिद्धये ॥

कैलासशिखरे रम्ये हेमप्राकारशोभिते ।
आस्थानमण्टपे दिव्ये ब्रह्मादिभिरुपासितः ॥

End :

ये कुर्वन्ति व्रतमिदं सर्वसम्पत्करं शुभम् ।
सर्वदानफलं चैव प्राप्नुवन्ति न संशयः ॥
सर्वतीर्थफलं याति सर्वदानफलं भवेत् ।
ये कुर्वन्ति व्रतमिदं शिवलोकं प्रयान्ति हि ॥

Colophon :

इति श्री स्कन्दपुराणे केदारव्रतं सम्पूर्णम् ॥

696

Sl. No : 16098 केदारव्रतकथा Ms. No : C. 2525/2a

Beginning :

युधिष्ठिर उवाच—
धर्माः बहुविधाः प्रोक्ताः इहामुत्रफलप्रदाः ।
इदानीं श्रोतुमिच्छामि वद कृष्ण व्रतं मम ॥
श्रीकृष्ण उवाच—
शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
पार्वत्या चरितं पूर्वं शरीरार्थं शिवस्य च ॥

End :

त्वमपि श्रद्धया राजन् कुरु व्रतमिदं महत् ।
तथैव धर्मराजो ऽपि कृत्वा राज्यमवाप सह ॥
ये च शृण्वन्ति सततं कारयन्ति च ये मुदा ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :
इति श्रीस्कन्दपुराणे कृष्णयुधिष्ठिरसंवादे केदारेश्वरकथा समाप्ता ॥

697

Sl. No : 16101 कोकिलाव्रतकथा Ms No : P. 8209/2

Beginning :

युधिष्ठिरः—

स्वभर्तरतिसम्बन्धे महास्नेहो यथा भवेत् ।

कुलशीलं तथाऽऽचक्ष्व × मम जगद्गुरो ॥

कृष्ण उवाच—

यमुनायास्तटे पूर्वं मधुरानगरी शुभा ।

तस्यां शत्रुघ्ननामाऽभूद्राजा राघवनन्दनः ॥

End :

एतस्माज्जायते द्रव्यं द्वितीया लभते सुतान् ।

तृतीया चापि सौभाग्यं प्राप्नुयान्नात्र संशयः ॥

Colophon :

इति वाराहे कोकिलाव्रतं सम्पूर्णम् ॥

698

Sl. No : 16102 कौमुदद्वादशीव्रतकथा Ms. No : P. 9256/3

Beginning :

प्रलयो:- — —प्रपद्येऽहं वसुन्धराम् ।

महावराहः दंष्ट्र प्र· ल्लिकोशमधुर·ग्रिम् ॥

क्वापि कल्पान्तरे — — न्ते खुरदष्ने समुद्धृताम् ।

वहते मेदिनीमुत्तां महते पोत्रि·ं ·म. ॥

श्री भगवानुवाच—

जागरे तु विशालाक्षि जानतो वाऽप्यजानतः ।

यो मे भक्त्या प्रगायन्ते भक्त्या × व्यवासितः ॥

End :

यद्दोषाद्विनिर्मुक्तः सोमशर्मा महायशाः ।

जातो भागवतो भक्त्या मम कर्मपरायणः ।

— — —श्चापि सुश्रोणि मम दैवो ऽगायकः ॥

कृत्वा तु विपुलं कर्म स ब्रह्मत्वमुपागतः।
× फलं देवि कथितं तु समासतः॥
यस्तु गायति सुश्रोणि कौमुदद्वादशीं पुमान्।
सर्वसङ्गान् परित्यज्य मम लोकं स गच्छति॥

Colophon:

इति वराहपुराणे वराहभूमिसंवादे चत्वारिंशोऽध्यायः॥

699

Sl. No 16103 गजगौरीव्रतकथा Ms No P. 2370/72

Beginning:

ऋषयः ऊचुः—
मुनिस्सनातनो नाम समीगत्पार्वतीपते।
पश्यन् पुराणि पुण्यानि प्रययौ हस्तिनापुरीम्॥
पूजितो धृतराष्ट्रेण गान्धार्या च सुपुत्रिका।

End:

राज्यादिभोगसुखमुत्तमाशु भोक्तुं
इच्छन्ति चैतदनुमोक्षसुखं च मर्त्याः।
ते शङ्करप्रणयिनीवरगन्धहस्ती
कुम्भे धरित्रीव्रतवती परिपूजयन्ति॥ (?)

Colophon:

इति श्री स्कन्दपुराणे गजगौरीव्रतं संपूर्णम्॥

700

Sl. No: 16104 गजगौरीव्रतकथा Ms. No: P. 4218/42

Beginning:

ऋषयः ऊचुः—
पुरा तु नैमिषारण्ये ऋषयो वेदपारगाः।
सूतपुत्रं महाभागं इदं वचनमब्रवीत्॥ (?)
गौरीव्रतानि लोकेषु क्रियन्ते दानिसम्भवैः।
तेषां व्रतानामुत्कृष्टं गौरीव्रतमनुत्तमम्॥

End :

इत्थं व्रतस्य माहात्म्यं व्याख्यातं मुनिसत्तम ।
ये शृण्वन्ति तदाख्यानं शृण्वन्ति श्रद्धयान्विताः ॥
पुत्रपौत्रैः परिवृताः धनधान्यसमन्विताः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्री स्कन्दपुराणे सूतऋषिसंवादे गजगौरीव्रतकथा संपूर्णा ॥

701

Sl. No : 16105 गजगौरीव्रतकथा Ms. No : P ;5293/38

Beginning :

पूजान्ते तु महागौरीदोरकं दक्षिणे करे ।
तत्र व्रतप्रदा चैव दद्वितीयां चोडशस्तथा ॥
इति दोरबन्धनम् ।
मुनिस्सनातनो नाम समीपात्पार्वतीपतेः ।
पश्यन् पुराणि पुण्यानि प्रययौ हस्तिनापुरीम् ॥

End :

गजकुम्भस्थितां गौरीं पुत्रपौत्रसमृद्धये ।
राज्यान्वितं शुभमनुत्तममाशु भोक्तुं
पृच्छन्ति ये तदनु मोक्षसुखं च मर्त्याः ।
ते शङ्करप्रणयिनीं वरगन्धहस्ति
कुम्भोपरि स्थिततरां परिपूजयन्ति ॥

Colophon :

इति श्री स्कान्दपुराणे गजगौरीव्रतकल्पः सम्पूर्णः

702

Sl. No : 16107 गजगौरीव्रतकथा Ms No : P .8410/56

Beginning :

ऋषिरुवाच—

मुनिः सनातनो नाम समीपात् पार्वतीपतेः ।
पश्यन् पुराणि रम्याणि प्रययौ हस्तिनापुरीम् ॥

पूजितो धृतराष्ट्रेण गान्धार्या सहपुत्रया ।
किञ्चिद्विश्रम्य नगरीं पश्यन् प्राह मुनीश्वरः ॥

End :

तस्यां तद्व्रतमाहात्म्यात् तनयालोकविश्रुताः ।
आसीत् सकलसौभाग्यं लक्ष्मीराज्यमकण्टकम् ॥
राज्यश्रियं सुखमनुत्तममायुरर्थान्
इच्छन्ति येऽमलमनोथशसीह मर्त्याः ।
ते शङ्करप्रणयिनीवरगन्धहस्ति
कुम्भोपरि स्थितवतीं परिपूजयन्ति ॥

Colophon :

इति श्रीस्कान्दे गजगौरीव्रतमाहात्म्यं संपूर्णम् ॥

703

Sl. No : 16113 गजगौरीव्रतकथा Ms No C. 3032/44

Beginning

कुन्त्यां वनादुपेतायां हस्तिनापुरमुत्तमम् ।
आनीतायां नरेन्द्रेण तनयैः पञ्चभिःसह ॥
तस्याः कुशलप्रश्नार्थं आजगामाथ माधवः ।
अभिवन्द्य सुखासीनं देवदेवं जनार्दनम् ॥

End :

एतद्व्रतं सकलदुःखविनाशदक्षं
सौभाग्यराज्यफलदं सुखमाचरन्ति ।
यद्योषितः सुखमनन्तमिहोपभुज्य
गौरीसमीपमुपयान्ति जनास्त × ॥

Colophon :

इति श्रीमद्भविष्योत्तरपुराणे गजगौरीकथा संपूर्णा ॥

704

Sl. No : 16116 गरुडपञ्चमीव्रतकथा Ms No : P. 1720/7

Beginning :

गरुड उवाच—

शृणु देवि प्रवक्ष्यामि पन्नगेन्द्रस्य पूजनम् ।
तस्मिन् संपूजिते गौरि विष्णुस्संपूजितो भवेत् ॥
इन्द्रादिलोकपालाश्च पूजिताः स्युर्न संशयः ॥

End :

पन्नगेन्द्र नमस्तेऽस्तु लक्ष्मीकान्तसुवारक ।
मयि त्वं कृपयाऽऽविष्टः गृहीश्च वरदो भव ॥
ब्राह्मणे दक्षिणां दद्यात् स याति परमां गतिम् ॥

Colophon :

इति श्री गारुडपुराणे उमामहेश्वरसंवादे गरुडपञ्चमीव्रतकथाश्रवणं सम्पूर्णम् ॥

705

Sl. No : 16118 गरुडपञ्चमीव्रतकथा Ms. No : P.4257/4

Beginning :

श्री सूतः—

कैलासशिखरे रम्ये सर्वदेवनिषेविते ।
वज्रवैडूर्यमाणिक्यखचिते हेमपीठके ॥
सुखोपविष्टं भूतेशं पार्वती परया मुदा ।
पप्रच्छ व्रतमेतत्तु सर्वकामफलप्रदम् ॥

End :

याश्च कुर्वन्ति सततं नदशोपि दत्तो विभु । (?)
न भर्तृमरणं तासां सौभाग्यं चाप्नुयुस्तथा ॥
ये च शृण्वन्ति सततं द्विजा पृच्छन्ति शीलिनः ।
तथा कामं च सौभाग्यं प्राप्नुयुर्न संशयः ॥

Colophon

इति श्री स्कान्दपुराणे उमामहेश्वरसंवादे गरुडसंवादे गरुडपञ्चमीव्रतकथाकल्पः सम्पूर्णः॥

706

Sl. No. 16124 गायत्रीचातुर्मास्यव्रतकथा Ms. No : C 3410/1

Beginning :

श्रीपार्वत्युवाच —

सदाशिव महादेव सर्वजीवदयापर । +
इदानीं श्रोतुमिच्छामि गायत्रीव्रतपूर्वकम् ॥
अङ्गमङ्गं प्रधानाङ्गं व्रतं साङ्गं कथं भवेत् +
गायत्रीव्रतमाहात्म्यं गायत्रीमन्त्रसिद्धिदम् ।
गायत्रीमन्त्रसिध्यर्थं वक्ष्येऽहं प्राणवल्लभे ॥

End :

यथा कालानुसारेण तथा कर्म समाचरेत् ।
इति नित्यं च कुर्याद्वा ब्रह्मलोकमवाप्नुयात् ॥

Colophon :

इति श्रीब्रह्मतान्त्रिके चातुर्मास्यसन्धानानुक्रमणिकाविधियोगोनाम षष्ठोऽध्यायः॥

707

Sl. No : 16126 गोद्वादशीव्रतकथा Ms. No : P.2370/44

Beginning :

पार्वत्युवाच—

सुरूपत्वं सुसौभाग्यं सौख्यमायुष्यवर्धनम् ।
धनधान्यसमृद्धिश्च .... ॥
यद्व्रतेन भवन्त्याशु तद्व्रतं ब्रूहि शंकर ॥

End :

प्रतिपश्यन् प्रसन्नात्मा भुञ्जीत सह बन्धुभिः ।
एवं यः कुरुते देवि व्रतं सर्वसमृद्धये ॥
व्रतस्य जायते वृद्धिः सर्वान् कामानवाप्नुयात् ॥

Colophon :

इति श्रीस्कान्दपुराणे गोद्वादशीव्रतं संपूर्णम् ॥

708

Sl. No : 16127 गोपद्मव्रतकथा **Ms No. P. 2370/60**

Beginning :

सूत उवाच—

ब्रह्मविष्णुमहेशाना: ऋषयश्च तपोधना: ।
दिक्पाला द्वादशादित्या: वसव: काल एव च ॥
चित्रगुप्तश्च गन्धर्वा: कृष्णव्यासौ च नारद: ।
अन्य एवं महात्मान: पुराणस्मृति पारगा: ॥

End :

नैषां यमकृता बाधा भविष्यति न संशय: ।
ये कुर्वन्ति व्रतमिदं लभन्ते पदमुत्तमम् ॥
इह भुक्त्वा सुखं चान्ते विष्णुसायुज्यमाप्नुयात् ॥

Colophon

इति श्रीपद्मपुराणे गोपद्मव्रतकल्प: समाप्त: ॥

709

Sl. No : 16133 गोपद्मव्रतकथा **Ms. No : P. 8165/15**

Beginning :

सूत उवाच—

शृणुध्वमृषय: सर्वे व्रतानामुत्तमं व्रतम् ।
सर्वपापप्रशमनं सर्वकामफलप्रदम् ॥
मोक्षदं कुर्वतां भक्त्या नाम्ना गोपद्मसंज्ञिकम् ।
अत्रैवादाहरन्तीमं इतिहासं पुरातनम् ॥

End :

एवं य: कुरुते भक्त्या व्रतानामुत्तमं व्रतम् ।
इह भुक्त्वा तु विपुलान् भोगानन्ते हरिं व्रजेत् ॥
ये पठन्तीदमाख्यानं शृण्वन्ति श्रद्धयाऽन्विता: ।
तेन समस्तसमृद्धाश्च मोक्षं यान्ति न संशय: ॥

Colophon :

इति श्रीपद्मपुराणे गोपद्मव्रतमाहात्म्यं संपूर्णम् ॥

710

Sl. No: 16145 गोपद्मव्रतोद्यापनकथा Ms: No. P 4180/85

Beginning:

युधिष्ठिरः—

देव देव जगन्नाथ गोपद्मव्रतमुत्तमम्।
उद्यापनं ममाचक्ष्व केन चीर्णमिदं व्रतम्॥

श्रीकृष्णः—

आषाढे शुक्लपक्षस्य द्वादश्यां तु समाचरेत्।
गोपद्मव्रतमाख्यातं तद्विधानं ब्रवीमि ते॥

End:

एवं व्रते तु सा कुन्ती साम्राज्यं श्रियमश्नुते।
सुपुत्रं लभते कुन्ती सौभाग्यसुखप्रदम्॥ (?)
सोऽद्यापनमिदं राजन् तामहाचरितव्रत र। (?)
धनधान्यं च सौभाग्यं पुत्रपौत्रप्रदं नृणाम्॥

Colophon:

इति भविष्योत्तरपुराणे गोपद्मोद्यापनं सम्पूर्णम्॥

711

Sl. No: 16147 चन्द्रसूर्यव्रतकथा Ms No: P. 6496/55

Beginning:

ऋषय ऊचुः—

सूतसूत महाबुद्धे सर्वशास्त्रविशारद।
तापत्रयातिबद्धानां नराणां कामदं शुभम्॥
नारीणां च नराणां च पुत्रपौत्रफलप्रदम्॥

End:

य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः।
सर्वसम्पत्समृद्धश्च स याति परमां गतिम्॥

Colophon:

इति श्रीस्कन्दपुराणे उमामहेश्वरसंवादे चन्द्रसूर्यव्रतकथा सम्पूर्णा॥

712

Sl. No. 16148 चातुर्मास्यव्रतकथा Ms. No P; 3126/2

Beginning :

सूत: —

इत्युक्त्वा क्रोडरूपेण धरणी हरिणी तथा ।
पुन: पप्रच्छ तं देवी प्रणमन्ती मुहुर्मुहु: ॥

धरणी —

× × तथान्येभ्यो नारदादित्य एव च ।
× × दैवं निश्चयं चक्र × × व शक्रादयोऽपरे ॥
मुनयो देवगन्धर्वा यक्षराक्षसपन्नगा: ।
नृणां × भक्तिरेकैव भवबन्धविमोक्षणे ॥

End :

सर्वर्द्धि गते तस्मिन् सर्वपुण्यकृतं भवेत् ।
\+ \+ \+ \+ \+
चातुर्मास्यमाहात्म्यं इदं गुह्यतमं विभो ॥
इदानीं श्रोतुमिच्छामि × था वृत्रो हत: पुरा ।

Colophon :

इति श्री वाराहपुराणे धरणीवराहसंवादे चातुर्मास्यमाहात्म्ये सप्तत्रिंशोऽध्याय: ॥

713

Sl. No ; 16150 ज्येष्ठालक्ष्मीव्रतकथा Ms No : C. 3032/29

Beginning :

ज्येष्ठाष्टमीकथाप्रारम्भ: — सूत उवाच —

कैलासशिखरे रम्ये समासीनं जगत्प्रभुम् ।
नमस्कृत्य प्रसन्नास्यं परिपप्रच्छ पार्वती ॥

पार्वत्युवाच —

देवदेव जगन्नाथ जगदानन्दकारण ।
अहं त्वां प्रष्टुमिच्छामि लोकानां हितकाम्यया ॥

End :

प्राप्नुवन्ति महाभोगान् सर्वैरपि समन्वितः ।
पतिपुत्रसमायुक्तः यास्यन्ति परमां गतिम् ॥
ज्येष्ठालक्ष्मी प्रतिगृह्णातु ज्येष्ठालक्ष्मी ददाति च ।
ज्येष्ठालक्ष्मी तारकोभाभ्यां ज्येष्ठादेवि नमो नमः ॥

Colophon :

इति भविष्योत्तरपुराणे ज्येष्ठाष्टमीव्रतकथा सम्पूर्णा ॥

714

Sl. No. 16152 ज्योतिस्तम्भव्रतकथा Ms. No : P, 1720/5

Beginning :

ऋषय ऊचुः —
वद सूत महाभाग सर्वशास्त्रार्थकोविद ।
येन व्रतेन नारीणां सौमङ्गल्यं विवर्धते ॥
पुत्रपौत्रप्रवृद्धिश्च पशुधान्यार्थसंपदः ।
भीमेशाख्याव्रतं नाम सर्वसंपत्करं शुभम् ॥

End :

इतीदं कथितं विप्राः व्रतानामुत्तमं व्रतम् ।
एतत् शृण्वन्ति सततं श्रावयिष्यन्ति मानवाः ॥
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्री स्कान्दे पुराणे भीमेशाख्यव्रतकथाश्रवणं संपूर्णम् ॥

715

Sl. No : 16162 ज्योतिस्तम्भव्रतकथा Ms No : P: 8778/7

Beginning :

ऋषय.—
वद सूत महाभाग सर्वशास्त्रार्थपारग ।
येन व्रतेन नारीणां सौमङ्गल्यं च वर्धनम् ॥

पुत्रपौत्रसमुद्दिश्य पशुधान्यार्थसम्पदः ।

सूत उवाच—

शृणुध्वमृषयः सर्वे व्रतानामुत्तमं व्रतम् ।

End :

रत्नस्तम्भशताकीर्णं दिव्यरत्नैरलंकृतम् ।
कोणे कोणे रत्नमयं धनराशिः पदे पदे ॥
हस्त्यश्वगोधनयुतं नगरं सर्वतो सुखम् ।
चित्रवर्णमयी दृष्ट्वा भर्तारं मदनाकृतिम् ।
दृष्ट्वा तु विस्मिता × × ×

Colophon :

— — —

716

Sl. No : 16170 तुलसीव्रतकथा **Ms. No : P. 4335/3)**

Beginning :

श्यामवर्णां सुपद्माक्षीं वरदाभयशोभिताम् ।
पद्मद्वयधरां देवीं ध्यायामि तुलसीं सदा ॥

ध्यानम् ।

कृष्णानन्दाश्रुसम्भूते वरदे तुलसि स्वयम् ।
त्वामद्य विभजाम्येवं कमलासनवल्लभे ॥

End :

इदमुक्तं त्वया देवि तुलसीपूजनं व्रतम् ।
विष्णुप्रीतिकरं पुण्यं दारिद्र्यस्य च नाशनम् ॥
य इदं शृणुयाद्भक्त्या श्रावयेद्वाप्यनिन्दितः ।
सर्वान् कामानवाप्नोति सर्वपापैः प्रमुच्यते ॥

Colophon :

इति श्री स्कन्दपुराणे उमामहेश्वरसंवादे तुलसीपूजाविधानं सम्पूर्णम् ॥

717

Sl. No : 16172 तुलसीव्रतकथा Ms. No : P. 5865/41

Beginning :

सूत उवाच —

येन चीर्णेन लोकेऽस्मिन् लभन्ते योषितः फलम् ।
तद्व्रतं (?) भगवान् ब्रह्मा × म ब्रूहि समाहितः ॥
शृणु न्यासं प्रवक्ष्यामि दुर्लभं व्रतसञ्चरेत् ।
सर्वलोकेषु नष्टेषु नष्टे स्थावरजङ्गमे ॥

End :

इदं व्रतं महापुण्यं ऐहिकामुष्मिकं फलम् ।
यः करोति सदा भक्त्या सोऽपि याति परमां गतिम् ॥
आयुर्वृद्धिं धनं तेज पुत्राश्च + + + दा ।
ये: कुर्वन्ति तुलसीपूजां तस्य सम्भवति ध्रुवम् ॥

Colophon :

इति श्री ब्रह्माण्डपुराणे तुलसीव्रतं समाप्तम् ॥

718

Sl. No : 16173 तुलसीव्रतकथा Ms. No : P. 9333/15

Beginning :

श्री नारदः —

रोप्यते येन विधिना तुलसी पूज्यतेऽपि सा ।
तमाचक्ष्व महादेव मय्यनुग्रहकारणात् ॥

श्री महादेवः —

शुभे पक्षे शुभे वारे शुभर्क्षे च शुभोदये ।
केशवार्थं शुभांशे च रोपयेत् तुलसीं व्रते ॥

End :

भोजयेत् तुलसीप्रीतौ परमान्नेन वर्णिनम् ।
वत्सरं भार्गवे वारे वन्ध्या पुत्रमवाप्नुयात् ॥

Colophon :

इति श्री स्कन्दपुराणे कुमारसंहितायां तुलसीमाहात्म्ये मासपूजाफलं नाम द्वितीयोऽध्यायः ॥

719

Sl. No : 16177 दशरथगौरीव्रतकथा Ms. No · P . 1865/47a

Beginning :

ऋत्रिरुवाच—

पूजयन्त्यश्च ललितां सर्वसौभाग्यदायिनीम् ।
स्त्रियो व्रतपरा यस्याः न वैधव्यं लभेत् क्वचित् ॥
याः काश्चिद्देवताः सर्वाः मनुजोरगराक्षसाः ।
ताः सर्वा नाशमायान्ति ललितापूजने कृते ॥
दशरथेन कृतं चीर्णं वृद्धिसन्तानकारणम् ॥

End :

न स्पृशन्ति च पापानि दारिद्र्यं व्रतिनं सदा ।
धनं धान्यं च सौभाग्यं पुत्रपौत्रादिवर्धनम् ॥
यः पठेत् प्रातरुत्थाय शृणोति च तथापरम् ।
स सर्वपापनिर्मुक्तः सर्वसिद्धिमवाप्नुयात् ॥

Colophon :

इतिस्कन्दपुराणे दशरथगौरीव्रतकल्पः सम्पूर्णः ॥

720

Sl. No : 16178 दशाफलव्रतकथा Ms: No. P .2370/6

Beginning :

सूत उवाच —

कृत द्यूते च विजिते सानुजे पाण्डुनन्दने ।
वनं प्रयाते दुःखार्ता कुन्ती प्राह हरिं तदा ॥
त्वयि स्थिते महादेव वासुदेव कृपानिधे ॥

End :

साम्राज्यं तेन संप्राप्य जित्वा शत्रूनकण्टकम् ।
पालयामास सुखिनी व्रतस्यास्य प्रभावतः ॥

सूत उवाच —

अतश्चैतद्व्रतं विप्र ये चरन्ति समाहिताः ।

विमुक्तास्सर्वदुःखेभ्यः प्राप्नुयुस्सिद्धिमीप्सितम् ॥

Colophon :

इति श्रीभव्योत्तरपुराणे दशाफलव्रतं [व्रतकथा] संपूर्णम् [र्णा] ॥

721

Sl. No : 16186 दशाफलव्रतकथा Ms No P 9964/60

Beginning :

ग्रन्थान्तरे दशाफलकथा ।

कृतघ्नद्यूतविजिते सानुजे धर्मनन्दने ।

वनं प्रयाते दुःखार्तां कुन्तीं प्राह हरिस्तदा ॥

नमस्कृत्य समाश्वास्य प्रोवाच मधुरं वचः ।

कृतं बुन्ति विषादेन व्रतं वक्ष्यामि ते शुभम् ।

नाम्ना दशाफलं सद्यः सर्वदुःखनिवारणम् ॥

End :

साम्राज्यं ते सुखं प्राप्य जित्वा × कण्टकम् ।

शताश्चैव व्रतं विप्राः ये चरन्ति समाहिताः ।

विमुक्ताः सर्वदुःखेभ्यः प्राप्नुयुःसिद्धिमिष्टताम् ॥

Colophon:

इति श्रीस्कन्दपुराणे दशाफलव्रतकथाश्रवणं संपूर्णम् ॥

722

Sl. No : 16188 दानफलव्रतकथा Ms No : P .2370/55

Beginning :

सूत उवाच —

पितृगेहे वर्तमाना कुन्ती व्यासं ददर्श ह ।

नमस्कृत्वा तु सा भक्त्या पाद्यार्घ्याचमनीयकम् ॥

दत्त्वा संप्रार्थितं व्यासं कुन्ती मुकुलिताञ्जलिः ॥

End :

ये पटन्तीदमाख्यानं शृण्वन्ति श्रद्धयाऽन्विताः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥
सर्वदानफलं प्राप्य सूर्यलोके महीयते ॥

Colophon :

इति श्री पद्मपुराणे उमामहेश्वरसंवादे दानफलव्रतं संपूर्णम् ॥

723

Sl. No : 16197 दीपदानव्रतकथा **Ms. No : P. 9147/3**

Beginning :

श्री ब्रह्मा—

शृणु दीपस्य माहात्म्यं कार्तिके केशवप्रिये ।
वा प्रोक्ते तु कृष्णेन धर्मजं प्रयुधीरेतम् ॥
कार्तिके तु शुभे मासि दीपदानं प्रशस्यते ।
परदीपमपि प्राज्ञः प्राज्वलन् स्वर्गमाप्नुयात् ॥

End :

जगाद तं महाभाग राजा भव सुधर्मिणः ।
सुवर्ण भो श्रिः तान कार्यां सङ्कल्प्य ... ॥
विष्णोः मद्मनि कर्तव्यं दीपदानमनुत्तमम् ।
यद्यत्र क्रियते कर्म स्वल्पं न याति चाक्षयम् ॥

Colophon :

इति श्रीवायुपुराणे दीपदानप्रशंसनं नाम प्रथमोऽध्यायः ॥

724

Sl. No : 16200 धनुर्मासपूजाव्रतकथा **Ms. No : P. 6000/48**

Beginning :

सूत उवाच—

अतः परं प्रवक्ष्यामि कोदण्डस्थे दिवाकरे ।
हरेः पूजाविधिं राजन् सर्वपापप्रणाशनम् ॥
कृते भारते युद्धे पा × विष्णुः सनातनः ।
युधिष्ठिरः स्वयं प्रीत्या निजगाद गदाग्रजम् ॥

End :

येन पुण्यप्रभावेन केशवांघ्रिसरोरुहे।
भक्तिं सर्वार्थदां प्राप्य विष्णुसायुज्यमाप्नुहि ॥
ये पठन्तीममध्यायं भक्त्या शृण्वन्ति ये नराः।
धनुर्मासार्चनो × ते प्राप्नुवन्ति हरेः पदम् ॥

Colophon :

इति श्री विष्णुरहस्ये धनुर्मासप्रयुक्तविष्णुपूजाविधिः समाप्तः ॥

725

Sl. No : 16201 धारणपारणव्रतकथा Ms. No : P. 4218/20

Beginning :

युधिष्ठिर उवाच —
कृष्ण कृष्ण महाबाहो वासुदेव जनार्दन।
नमस्ते पुण्डरीकाक्ष प्रसीद पुरुषोत्तम ॥
भीष्मादिजन्यबधबन्धुमहौघसङ्घं
हन्तुं वदस्व मम कारणमञ्जसा विभो।
येनेन्द्रियाणां मम नास्ति निग्रहः
तेषां निकामाय वरं व्रतं हरे ॥

End :

इतीदं प्रतिभाष्या (?) तु कृष्णस्तु स्वपुरं ययौ।
पूज्यमानाः पौरजनैः समस्तैः पाण्डुपुत्रकैः ॥
युधिष्ठिरोऽपि राजर्षिः चकारेदं महाव्रतम्।
विमुक्तः सर्वपापेभ्यो वशी कृष्णे व्रती भवेत् ॥ (?)

Colophon :

इति श्री स्कान्दपुराणे कृष्णयुधिष्ठिरसंवादे धारणपारणकथा सम्पूर्णा ॥

726

Sl. No : 16205 नरकचतुर्दशीव्रतकथा Ms. No : P. 6847/4

Beginning :

अथ पौर्णिमान्तमासेन कार्तिकचतुर्दशी नरकचतुर्दशी। तस्यान्तिकतैलस्नान
मुक्तं भवे।

कार्तिकस्य सिते पक्षे चतुर्दश्यां निशामुखे ।
यमदीपं बहिर्दद्यादपमृत्युविनाशनम् ॥

End :

शिवरात्रेस्तिथौ तस्य लिङ्गस्यापि प्रपूजया ।
अक्षय्यान लभते भोगान् शिवसायुज्यमाप्नुयात् ॥
यदि स्युर्ममादर्शगेनाश्च तिथयस्त्रय: ॥ (?)
दीपदानादिकार्येषु कर्तव्या पूर्वसंयुता ॥

Colophon

इति नरकचतुर्दशीदीपदानकथा समाप्ता ॥

727

Sl. No : 16207 नागपञ्चमीव्रतकथा **Ms. No : C. 3032/)**

Beginning :

कैलासशिखरे रम्ये सर्वदेवनिषेविते ।
रत्नवैडूर्यमाणिक्यरचिते हेमपीठके ।
सुखोपविष्टमासीनं पार्वती परया मुदा ॥
पप्रच्छ व्रतमेतद्धि सर्वकामफलप्रदम् ॥

End :

याश्च कुर्वन्ति सततं न विपद्यिवते भुवि ।
न भर्तृमरणं तासां सौभाग्यं चाप्नुयुस्तथा ॥
ये शृण्वन्ति सततं द्विजैः प्रच्छन्नशीलिनः ।
यथाकामं च सौभाग्यं प्राप्नुयुर्ना संशयः ॥

Colophon :

इति श्रीस्कन्दपुराणे उमामहेश्वरसंवादे नागपञ्चमीव्रतंकथा सम्पूर्णा ॥

728

Sl. No : 16209 निरशनभानुवारकथा **Ms No : P. 4218/36**

Beginning :

कैलासशिखरे रम्ये रत्नकान्तिसमन्विते ।
द्रुमैः फलयुतैः पुष्पैः शोभिते शुभदर्शने ॥

कल्पवृक्षप्रसूनैश्च अलङ्कारस्थिते शुभे ।
रत्नसिंहासनासीनं शङ्करं लोकशङ्करम् ॥

End :

गङ्गादिसर्वतीर्थेषु सर्वदानेषु यत्फलम् ।
तत्फलं समवाप्नोति अन्नाभावार्कवासरात् ॥
जन्मजन्मान्तरे पापं ज्ञानाज्ञानकृतं महत् ।
तत्सर्वं नाशमायाति सूर्यलोकं च गच्छति ॥

Colophon :

इति श्रीस्कन्दपुराणे उमामहेश्वरसंवादे अपक्रमानुवारव्रतकथा सम्पूर्णा ॥

729

Sl. No : 16210 निरशनभानुवारव्रतकथा Ms No. P. 6000/5

Beginning :

ऋषयः—
वद सूत महाभाग सर्वशास्त्रार्थपारग ।
येन व्रतेन मर्त्यानां सर्वपापक्षयो भवेत् ॥

सूतः—
शृणुध्वं ऋषयस्सर्वे वेदशास्त्रार्थपारगाः ।
यदुक्तं ब्रह्मगर्भेण पुरा मगधभूभुजा ॥

End :

सम्यक् कृत्वा व्रतं साङ्गं संसिद्धिं परमं ययौ ॥

सूतः—
तस्मादेतद्व्रतं विप्राः कुरुध्वं भक्तिसंयुताः ।
इति सूतवचः श्रुत्वा चक्रुः सर्वे महर्षयः ।
तैस्समभ्यर्चितः सूतो ययौ बदरिकाश्रमम् ॥

Colophon :

इति श्रीमदितिहाससंग्रहे वेदगर्भवज्रबाहुसंवादे अपक्रमानुवारव्रतकथाश्रवणं संपूर्णम् ॥

730

Sl. No : 16020 नृसिंहजयन्तीव्रतकथा Ms. No : P. 6000/3

Beginning :

नारद:—

राधे शुक्लचतुर्दश्यां सन्ध्याकाल उदाहुते ।
स्वातीयुक्ते मन्दवारे प्रादुरासीन्नृकेसरी ॥
तस्या रक्षोरवासंतु यः पूजामर्चनं निशि ।
कुरुते (?) निशार्दूल तस्य पुण्यं वदामि वः ॥

End :

तस्मात्सर्वप्रयत्नेन मानवो बुद्धिमान्यदि ।
नारसिंह जां कृत्वा व्रतं सम्यक् समाचरेत् ॥
इतीदं कथितं पुण्यं आयुरारोग्यवर्धनम् ।
शृणुयाच्छ्रावयेद्वाऽपि स मानवहा (?)कः ॥

Colophon:

इति श्री नरसिंहपुराणे नृसिंहजयन्तीव्रतकथा सम्पूर्णा ॥

731

Sl. No : 16218 नृसिंहजयन्तीव्रतकथा Ms No. P. 4218/24

Beginning :

श्री सनत्कुमारः—

देव व्रतस्य माहात्म्यं विधानं तत्फलं मम ॥ (?)
अत्राधिकारिणः कालं देवं च वद मे प्रभो ॥

ब्रह्म उवाच—

राधे शुक्लचतुर्दश्यां सन्ध्यायां ग्रुभानिते । (?)
मन्दवारे नृसिंहोऽभूत् त्रेतायां आदिहत्रके ॥

End :

व्रतं लक्ष्मीनृसिंहस्य सकृत्कुर्वन्ति ये नराः ।
ते पुत्रपौत्रसहिताः मोदन्ते चिरकालम् ॥

सनत्कुमारः सकलार्यवैदिकान्
कथामपूर्वां मुनयो × धाय ।
अनुग्रहार्थाय समस्तदेहिनां
यदन्तिकं दिव्यमगान्मुनीन्द्रः ॥ (?)

Colophon :

इति श्रीमद्भविष्योत्तरपुराणे नृसिंहजयन्तीव्रतकथा संपूर्णा ॥

732

Sl. No. 16223 पक्षप्रदोषव्रतकथा **Ms. No : C 3730/15**

Beginning :

व्रतार्के हेमाद्रौ, स्कान्दे च । व्यासः—
उभयोरुभयोः तथा रात्रौ सोपवासं त्रिलोचनम् ।
द्रष्टव्यं प्रथमे यामे मुच्यते सर्वपातकैः ॥
मदनरत्ने, स्कान्दे । देव्युवाच—
देव केन विधानेन प्रदोषव्रतमुत्तमम् ।
विधातव्यं नरैःस्त्रीभिः कुलसंतानसिद्धये ॥

End :

ये प्राप्य दुर्लभमिदं मनुजाश्शरीरं
कुर्वन्ति हन्त परमेश्वर पादपूजाम् ।
धन्यास्त एव निजपुण्यजितत्रिलोकाः
तेषां पदांबुजरजो भुवनं पुनाति ॥

Colophon :

इति श्रीब्रह्मोत्तरखण्डे पक्षप्रदोषमहिमानुवर्णनं नाम एकोनत्रिंशोऽध्यायः ॥

733

Sl. No : 16224 पक्षप्रदोषव्रतकथा **Ms No : C,3743/2**

Beginning :

अगस्त्यः—
पक्षे पक्षे प्रदोषे तु महेश्वरसमर्चनम् ।
त्रैवर्णिकाः प्रकुर्वन्ति नित्यं वेदविदो द्विजाः ॥

दधीचिः—

पक्षप्रदोषपूजां यो नरः कोऽपि द्विजोऽपि सन् ।
स तु स्वदैवतं त्यक्त्वा संसारमधिगच्छति ॥

End :

उमया सहितं रुद्रं सुवर्णेन च कारयेत् ।
रौप्येन वृषभं कृत्वा कलशोपरि पूजयेत् ॥
ब्रह्माद्यावाहयेत्तत्र लिङ्गतो भद्रमण्डले ।
स्वशाखोक्तविधिना हुनेत् घृतविलोदनम् ॥
पृथक् शिवशिवामन्त्रैरष्टोत्तरशतद्वयम् ।

Colophon :

इति स्कान्दपुराणे पक्षप्रदोषव्रतकथाश्रवणं सम्पूर्णम् ॥

734

Sl. No 16226 बलीन्द्रव्रतकथा **Ms No : C 3417/2**

Beginning :

पुरा युधिष्ठिरो राजा भ्रातृभिः परिवारितः ।
स्वर्कीयराज्यलाभार्थमुपायमनुचिन्तयन् ॥
कृष्णं कमलपत्राक्षं + पर्यपृच्छत्समाहितः ।
इति सम्प्रार्थितः कृष्णः + वक्तुं समुपचक्रमे ॥

श्री कृष्णः—

युधिष्ठिर महाप्राज्ञ सावधानमनाः शृणु ।
पुरा हिरण्यकशिपोः पौत्रो दानवसत्तमः ॥
विरोचन इति ख्यातः + + + ।
शक्रादीन् समरे जित्वा त्रिलोकान् प्रशशास ह ॥

End :

एवं ये कुरुते मर्त्याः प्रतिवर्षं महोत्सवम् ।
ते लभन्ते सुखं सर्वे महाविष्णोः प्रसादतः ।
ये शृण्वन्ति कथामेतां तेऽपि सौख्यं समाप्नुयुः ॥

इति श्री भविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे बलीन्द्रव्रतकथा सम्पूर्णा ॥

735

Sl. No : 16227 **बिन्दुद्वादशीव्रतकथा** Ms No P 4218/90

Beginning :

ऋषय: ऊचु: —

सूत सर्वार्थतत्त्वज्ञ सर्वकामफलप्रदम् ।
इदानीं श्रोतुमिच्छामो विष्णुप्रीतिकरं व्रतम् ॥

सूत: —

श्रृणुध्वं मुनय: सर्वे व्रतं सर्वार्थसिद्धिदम् ।
लक्ष्मीनारायणप्रीतिकरं सौभाग्यकारणम् ॥

End :

पापापहं सुकृतवर्धनमादिविष्णो:
संप्रीणनं सकलभोगविवर्धनञ्च ।
विष्णो: पदप्रदमनन्तसुखप्रदं च
पुत्रार्थलाभकरमेतदजादिवन्द्यम् ॥

Colophon :

ति श्री भविष्योत्तरपुराणे बिन्दुद्वादशीव्रतं सम्पूर्णम् ॥

736

Sl. No : 16228 **बिन्दुद्वादशीव्रतकथा** Ms No. P. 6000/10

Beginning :

ऋषय ऊचु: —

वद सूत महाभाग सर्वशास्त्रार्थपारण ।
येन व्रतेन नारीणां सर्वपापक्षयो भवेत् ॥

सूत उवाच —

श्रृणुध्वमृषय: सर्वे व्रतानामुत्तमं व्रतम् ।
बिन्दुद्वादशकं नाम सर्वपापक्षयो भवेत् ॥

End :

रूपलावण्यसम्पन्ना सर्वाभरणभूषिता ।
दिव्यं विमानमारुह्य वैकुण्ठमगमत् क्षणात् ॥

य इदं कीर्तयेन्नित्यं श्रावयेद्वा समाहितः ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

Colophon :

इति श्री स्कन्दपुराणे बिन्दुद्वादशीव्रतकथाश्रवणं संपूर्णम् ॥

737

Sl No : 16234 **बिल्वपत्रव्रतोद्यापनकथा** **Ms No : P. 7488/10**

Beginning :

कैलासशिखरे रम्ये मुनिसिद्धनिषेविते ।
रत्नसिंहासने रम्यं सुखासीनं महेश्वरम् ॥

पार्वत्युवाच—

देवेश सर्वलोकेश लोकानां हितकारक ।
संशयं परिपृच्छामि बिल्वपत्रफलं वद ॥

ईश्वर उवाच –

शृणु देवि प्रवक्ष्यामि देवतामुनिभिः सह ।
बिल्वपत्रफलं सम्यक् वक्ष्यामि शृणु विस्तरात् ॥

End :

यद्व्रतं कारयेद्धीमान × × त्यलोकिनान् ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्रीलिङ्गपुराणे उमामहेश्वरसंवादे बिल्वपत्रव्रतोद्यापनं समाप्तम् ॥

738

Sl. No : 16236 **बुधाष्टमीव्रतकथा** **Ms. No : P. 2370/15**

Beginning :

सूत उवाच —

वनवासगताः पार्थाः युधिष्ठिरपुरोगमाः ।
देवक्यास्तनयं दृष्ट्वा पप्रच्छुर्दुःखकर्शिताः ॥
कृष्ण कृष्ण कृपालुस्त्वं त्वन्निवार्या दुखोत्तमाः ॥

End :

सर्वान् कमानवाप्नोति सोमलोकं स गच्छति ।
यस्त्वष्टमीं बुध युतं समवाप्य भक्त्या
संपूजयेच्चिन्त्रयुतं जलकुम्भसंस्थम् ।
पक्वान्नवस्त्रसहितं सहिरण्यकं च
तस्य + + + यमपुरं न कदाचिदेव ॥

Colophon :

इति भविष्योत्तरपुराणे बुधाष्टमी [व्रत कथा] सम्पूर्णा ॥

739

Sl. No : 16240 बुधाष्टमीव्रतकथा Ms. No. P. 7486/41

Beginning :

कैलास शिखरे रम्ये सुखासीनं महेश्वरम् ।
प्रीत्या प्रणम्य सा गौरी पप्रच्छ व्रतमुत्तमम् ॥
+ + + + +
यत्कृत्वा सुमहद्घोरात् मुच्यते नरकार्णवात् ॥

ईश्वर उवाच—

शृणु देवि रहस्यं हि व्रतानामुत्तमं व्रतम् ।
यो नरकिर् निरयाद्घोरात् संसारार्णवसागरम् ।
नरकं नैव पश्यामि तन्मे ब्रूहि सुकेशव ॥

End :

बुधः सोमपुत्रो राजा पुरूरवपिता च नः ।
धर्म त्वं नः प्रसन्नोऽहं गृहाणार्घ्यं नमोऽस्तु ते ॥
सोमात्मज नमस्तेऽस्तु बुधराज नमो नमः ।
इनाकान्त नमस्तुभ्यं सर्वकामप्रदे नमः ॥

Colophon :

इति श्री भविष्योत्तरपुराणे बुधाष्टमीव्रतकल्पः सम्पूर्णः ।

740

Sl No: 16245 मङ्गलगौरीव्रतकथा Ms. No: P ,1720/9

Beginning :

नन्दिकेश्वर उवाच—

श्रुतानि देवदेवेश व्रतानि सुबहूनि च ।

पूजनं मङ्गलं गौर्याः अधुना कथ्यतां प्रभो ॥

ईश्वर उवाच —

शृगु नन्दिन् व्रतं पुण्यं गौर्या आराधनं परम् ।

End :

ये शृण्वन्ति व्रतं देव्याः कथयन्ति प्रयत्नतः ।

ऽवैधव्यं सुपुत्रत्वं सौभाग्यं चापि दधीत ॥

Colophon :

इति श्री भविष्योत्तरपुराणे स्कन्दनन्दीश्वरसंवादे मङ्गलगौरीव्रतकथाश्रवणं संपूर्णम् ॥

741

Sl. No : 16252 मङ्गलगौरीव्रतकथा Ms No P 8410/51

Beginning :

सूत उवाच —

